TEXT CUT WITHIN
THE BOOK ONLY

TEXT FLY WITHIN
THE BOOK ONLY

TEXT PROBLEM
WITHIN THE
BOOK ONLY

UNIVERSAL
LIBRARY
OU_176650
LIBRARY
UNIVERSAL

OSMANIA UNIVERSITY LIBRARY

Call No. K. 294.5 Accession No. K 4902

Author K173

Title

This book should be returned on or before the date last marked below

॥ अथ श्रीमद्भागवत विजय०कन्नड टीका तृ०स्कं० प्रारभ्यते ॥

श्रीवेदव्यासायनमः ॥ यल्लीलाजलराशिलोललहरीस्नानक्षमाणा नृणा संसारोदधिराशु शुष्यतितरामग्न्युग्रशुष्कैंधवत् ॥ यस्माद्विश्वमशेषमुद्भवति यस्तत्त्वं परं योगिनां श्रीमंतं तमुपास्महे सुमनसामिष्टप्रदं विट्ठलं ॥ १ ॥ अगाधश्रीमद्भागवतजलराशौ मणिगणं तृतीयस्कंधोदभ्रममनवगाहं मृगयति ॥ निमज्योन्मज्यार्थेऽनुपदमनुरक्तेऽमलधियः कृपालेशं संतः खलु विदधतां मय्यनुपदं ॥ २ ॥

श्रीविष्णुतीर्थगुरुभ्योनमः ॥ श्रीवेदव्यासायनमः ॥ श्रीहयग्रीवायनमः ॥ सृष्टिस्थितिलयादीनां कारणं जगतःप्रभुं ॥. भक्तानां ज्ञानदं देव कपिलं प्रणमाम्यहम् ॥ १ ॥ इन्नु तृतीयस्कंधक्के व्याख्यानमाडतक्क विजयध्वजतीर्थरु तावु माडतक्क ई व्याख्यानक्के विघ्नबरबारदेंदु (बंद विघ्नगळु दूरागलेंदु) ई स्कंधदल्लि होगळिसिगोळ्ळुव श्रीहरिय चरित्रसहितवाद मंगळाचरणेयन्नु माडुवरु. याव परमात्मन लीलेयंत समुद्रद चचलवाद थेरेगळल्लि स्नानमाडुवदक्के समर्थराद मनुष्यरिगे संसारवेंब समुद्रवु अग्नियल्लि हाकि तेगेद ओणगिद काष्टदंते अत्यंतवागि ओणगुवदु. [इल्लि ' संसारोदधिः आशु अग्न्युग्रशुष्कैंधवत् नरां शुष्यति ' एंबल्लि संसारवेंब समुद्रवु अग्नियल्लि हाकल्पट्ट (हाकि तेगेद) ओणगिद कट्टिगेयंते अतिशयवागि ं.. गुवदु, एंब दृष्टांतवु सरियागुवदिल्लवु; अग्नियल्लि हाकिद हसिकट्टिगेयु ओणगिदंते संसारवु अतिशयवागि ओणगुवदु. एंदेर दृष्टांतवु सरियागबहुदु: ओणगिद कट्टिगेयु ओणगिदंते एंब मातु ह्यागे संभविसीतु ? एंदेर– कट्टिगेयल्लि नीरिन भागवु (हसियु) इरुववरेगू आ कट्टिगिगे हसीकट्टिगे एन्नुवरु आ नीरिन भागवु (हसियु) सूर्यतापदिंदागली गाळियिंदागली होयितेंदेर अदे कट्टिगिगे ओणकट्टिगे एन्नुवरु. यद्यपि आ कट्टिगेयोळगिन नीरिन भागवु होगि ओणगिद कट्टिगे एंदेनिसिगोंडाग्यू अदरल्लि (होसकट्टिगेयल्लि) रसभागवु (एण्णियु) इरुवदु. इंथ एण्णेयुळ्ळ ओणकट्टिगेयन्नु अग्नियल्लि हाकि तेगेदरे (करकाडिसिदरे) आ ओणकट्टिगेयोळगिन एण्णेसत्तु, अदक्के कट्टिगे एव हेसरु इद्दाग्यू आ कट्टिगेयु एनू केलसक्के बारदंते ह्यागे इरुवदो, अदरंतेये श्रीहरिय कथा श्रवणमननादिगळल्लि मग्नगद सज्जनरिगे संसारवेंब समुद्रवु एनू हसिइल्लदंते ओणगुवदु. अंदरे संसारदोळगिन सत्वरजस्तमोगुणगळ व्यापारवु निल्लुवदेंदु तात्पर्यवु.] मत्तू याव परमात्मनिंद सकलजगत्तु उत्पन्नवागुवदो. यावनु योगिगळिगे तत्वनेनिसुवनो. उत्तम मनःसुळ्ळ तन्न भक्तरिगे (देवतिगळिगे) अभीष्टयन्नु कोडतक्क ऐश्वर्यनिधियाद विट्ठलनेंब नामउळ्ळ आ परमात्मनन्नु नावु उपासने माडुवेवु. ई श्लोकदल्लि ' यल्लीलाजलराशि ' एंब अर्धभागदिंद विदुर-मैत्रेयसंवादवु हेळिदंतायितु; ' यस्माद्विश्वमशेषमुद्भवति ' एंब पदगळिंद सृष्टिक्रमवु हेळिदंतायितु: ' तत्वंपरंयोगिनां ' एंबदरिंद कपिलदेवहूतीसंवादवु हेळिदंतायितु. ॥ (१) ॥ ई तृतीयस्कंधक्के व्याख्यान माडुवदु बहळकठिणवाह्दरिंद सुललितवागि व्याख्यानवु जरुगुतंते विजयध्वजतीर्थरु सज्जनर कृपेयन्नु प्रार्थिसुवरु– अळतेयिल्लद श्रीमद्भागवतवेंब समुद्रदल्लि एरडने जनरिंद मुळुगुवदक्के अशक्यवाद तिरगणीमडुविनंतिरुव ई तृतीयस्कंधवन्नु प्रतियोंदु पदद अर्थ माडुवदक्के. द्रव्यापेक्षियाद कुशलपुरुषनु अगाध समुद्रदल्लि एरडने जनरिंद मुळुगुवदक्के अशक्यवाद तिरगणीमडुविनालि मुळुगि एद्दु अनेक रत्नसमूहगळन्नु ह्यागे हुडुकुवनो. अदरंतेये वेदांतार्थवेंब रत्नसमूहवन्नु हुडुकुवदक्के बहु विचारमाडतक्क विजयध्वजतीर्थनेंब नन्नल्लि निर्मलबुद्धियुळ्ळ सज्जनरु मेलिंद मेले परमकृपेयन्नु माडली. ॥ (२) ॥ ३१०

श्रीशुक उवाच ॥ एवमेतत्पुरा पृष्टो मैत्रेयो भगवान्किल ॥ क्षत्त्रा वनं प्रविष्टेन त्यक्त्वा स्वगृहमृद्धिमत् ॥ १ ॥

अत्र मुमुक्षूणां स्वस्वयोग्यभगवदपरोक्षज्ञानोत्पत्तौ प्रधानसाधनं भक्तिरेव तत्साधनमितरत्सर्वमिति प्रपंच्यते तत्र सूतः शौनकप्रश्नपरिहाराय शुकपरीक्षित्संवादं कथयति एवमिति। यथाहं च त्वया एतत्प्रमयंप्रति पृष्टः एवं तथा क्षत्त्रापि विदुरेणापि भगवत्तत्त्वकालज्ञा मैत्रेयः पृष्ट इत्यन्वयः। ऋद्धमत्स्वगृह त्यक्त्वत्यनेन वैराग्यं प्रथमसाधनमिति सूचितं ॥ १ ॥

मोक्षापेक्षेयुळ्ळ जनरिगे परमात्मन स्वस्वयोग्य अपरोक्ष (प्रत्यक्ष) ज्ञानवु हुट्टुवदक्के भक्तिये मुख्यसाधनवु. आ भक्तियु हुट्टुवदक्के मिक्काद यावत्तू साधनगळु एंदु ई अध्यायदल्लि हेळल्पडुवदु; आ मोदल्ल सूतपुराणिकनु हिंदिन स्कंधदल्लि शौनकरु तन्नन्नु प्रश्नमाडिद्दक्के उत्तर हेळुवदक्कागि. शुकाचार्यरु परीक्षिद्राजनिगे हेळिद मंगतियन्ने हेळुवनु. श्रीशुकमुनिगळु अन्नुवरु– हे परीक्षितने ई प्रमेयवन्नु तिळकोळ्ळुवदक्के नीनु ह्यागे नन्नन्नु प्रश्नमाडिदियो. इदरतेये ऐश्वर्यदिंद समृद्धवाद स्वकीयराद कौरवर मनियन्नु बिट्टु तीर्थयात्रेगागि वनवन्नु प्रवेशमाडिद विदुरनु, त्रिकाल ज्ञानिगळाद मैत्रेयरन्नु प्रश्नमाडिदनु. ' विदुरनु मनेयन्नु बिट्टु ' एंदु हेळुवदरिंद एल्ल साधनगळल्लि वैराग्यवु मोदलने साधनवेंदु सूचने माडल्पडुवदु. ॥ १ ॥

यदा त्वयं मंत्रकृद्वो भगवानखिलेश्वरः ॥ पौरवेंद्रपुरं हित्वा प्रविवेशात्मसात्कृतं ॥ २ ॥

विदुरमैत्रेयसंवादं घटयितुं तीर्थयात्राकालापदेशेन प्रश्नबीजमुत्थापयति यदात्विति । वःपितामहानामर्थे मंत्रकृत् संधिकृत् संधिकार्येऽनुत्पन्ने पौरवेंद्रपुरं हस्तिनापुरं त्यक्त्वा आत्मसात्कृतमुपप्लाव्याख्यपुरं यदा प्रविवेश तदा विदुरस्तीर्थयात्रार्थं गतइति शेष इत्यन्वयः । अत्र तुशब्देन। " युद्धकालेतु विदुरस्तीर्थयात्रां गतोपि सन्। प्राय आस्ते गजपुरे पांडवानां हितेच्छयेति " वाक्यं विशिनष्टि अनेन विदुरेण तीर्थसेवा कदाचित्कृता न युद्धकालमारभ्य तत्समाप्तिपर्यंतमित्युक्तं भवति॥ २॥

श्रीशुकाचार्यरु विदुरमैत्रेयर संवादवन्नु हेळुवदक्के आ विदुरनु यावाग्ये तीर्थयात्रेगे होरटनेंबदन्नु हेळुत्त. अवनु मैत्रेयरन्नु प्रश्नमाडुवदक्के कारणवन्नु होरगेडुवुवरु–हे परिक्षितने निम्म पितामहराद पांडवर सलुवागि राज्यसंबंधवाद अनुसंधान (मध्यस्थिगि) माडुवदक्के कौरवरन्नु कुरितु सर्वम्वामियाद श्रीकृष्णनु होदाग्ये आ होदकार्यवु अनुकूलवागदिरलु हस्तिनापुरवन्नु बिट्टु तम्म स्वाधीनवाद (पांडवरिगे विराटराजनिंद कोडल्पट्ट उपप्लाव्यपट्टणवन्नु यावाग्यो प्रवेशमाडिदनो. आग्ये विदुरनु तीर्थयात्रेक्के होदनु. ई श्लोकदल्लि 'कुरुपांडवर युद्धकालदल्लि विदुरनु तीर्थयात्रेक्के होदाग्यू पांडवर हितार्थवागि बहळागि हस्तिनापुरदल्लि इरुत्तिद्दनु ' एंब श्रीमदाचार्यर वाक्यवु ' तु ' शब्ददिंद सूचिसल्पट्टितु. हींगे हेळुवदरिंद विदुरनु तीर्थयात्रेक्के स्वल्पुकालहोगिद्दनु; युद्धप्रारंभदिंद समाप्तिपर्यंतर हस्तिनापुरदल्लिये इद्दनेंदु हेळल्पडुवदु–(अथवा हस्तिनापुरद मुत्तमुत्तलिद्द तीर्थगाळिगे होगुत्त ई युद्धवार्तेयन्नु केळुत्तलिद्दनु. –या.) ॥ २ ॥

परीक्षिदुवाच ॥ कुत्र क्षत्तुर्भगवता मैत्रेयेणास संगमः ॥ कदा वा सहसंवाद एतद्वर्णय नः प्रभो ॥ ३ ॥

तीर्थनिषेविणो विदुरस्य सामान्यतो ज्ञातमैत्रेयसंगकालघटनापि राजा देशविशेषबुभुत्सया पृच्छति कुत्रेति । कुत्र कस्मिंस्तीर्थविशेषे पुरान्निर्याणहेतुरपि वक्तव्य इत्यतो वर्णयेत्युक्तं ॥ ३ ॥

१. स्वाधीनं । –(या.)

विदुरनु तीर्थयात्रेगे होगि मैत्रेयरिंद कूडिद कालवन्नु साधारण (अंदाज) तिळकोंडु परीक्षितनु विशेषवागि (स्पष्ट) तिळकोळ्ळुवदक्के आ विदुरनिगू मैत्रेयरिगू यावदेश-दल्लि भेट्टेयायितेंबदन्नु प्रश्नमाडुवनु– परीक्षितनु अन्नुवनु--हे शुकमुनिगळे आ विदुरनिगू मैत्रेयरिगू याव तीर्थदल्लि भेट्टियायितु, अवरवर प्रश्नोत्तरगळु यावाग्ये नडेदवु हागू आ विदुरनु मनिबिट्टु होरडुवदक्के एनु कारणवायितु? ई विषयवन्नु नमगे हेळबेकु. ॥ ३ ॥

न ह्यल्पार्थोदयस्तस्य विदुरस्यामलात्मनः ॥ तस्मिन्वरीयसि प्रश्नः साधुवादोप बृंहितः ॥ ४ ॥

विविदिषा लौल्यकारणमाह नहीति । हिशब्दो हेत्वर्थः यस्मादल्पार्थोदयो न तस्माद्वर्णयेत्यर्थः अत्रापि हेतुमाह साध्विति । " साधुस्त्रिषूचिते सौम्ये सज्जने वार्द्धुषौ पुमानिति " यादवः ॥ ४ ॥

आ विदुरमैत्रेयसंवादवन्नु तिळकोळ्ळुवदक्के इष्टु याके त्वरवु (आतुरवु) एंदरे हेळुवनु–आ श्रेष्ठराद मैत्रेयरल्लि, निर्मलवाद मनःसुळ्ळ विदुरन प्रश्नेयु ' साधुवादोपबृंहितः ' श्रीविष्णुवे मोदलाद महनीयर कथेगळन्नु प्रतिपादनमाडतक्कद्दाद्दरिंद (आ विदुरमैत्रेयसंवादवु) स्वल्पु प्रयोजनउळ्ळद्दल्लवु, संपूर्ण प्रयोजनवुळ्ळदु. (आदकरण आ विषयवन्नु केळबेकेंदु इष्टु हवणिकेयु.) साधु-एंब शब्दवु मूरुलिंगगळल्लि योग्यपुरुषनल्लि सज्जनरल्लि बड्डीव्यवहारमाडतक्कवनल्लि उपयोगिसल्पडुवदु ॥ ४ ॥

सूत उवाच ॥ स एवमृषिवर्योऽयं पृष्टो राज्ञा परीक्षिता ॥ प्रत्याह तं सुबहुवित्प्रीतात्मा श्रूयतामिति ॥ ५ ॥

सूतः शौनकप्रश्नपरिहाराय तत्संवादं कथयति स एवमिति । बहुपूर्णतायामितिधातोर्देवादिसज्जननिषेवितं पूर्णं भगवंतं वेत्तीति सुबहुविदिति तज्ज्ञानफलमाह प्रीतात्मेति । प्रियोहिज्ञानिनोत्यर्थमितिस्मृतेः । प्रसन्नमना वा श्रूयतामित्यनेन वक्तव्यार्थे आदरं जनयति उच्यमानं सहेतुकं चेच्छ्रद्धां जनयति अस्य कथं तदित्यत उक्तमितीति "इतिहेतुप्रकरणप्रकारादिष्विति" यादवः ॥ ५ ॥

सूतनु शौनकर प्रश्नेक्के उत्तरवन्नु हेळुवदक्के शुकपरीक्षित् संवादवन्नु हेळुवनु– सूतनु अन्नुवनु–' सुबहुवित् ' बहु एंब धातुवु पूर्ण एंब अर्थवन्नु हेळुवद्दरिंद सकल देवतिगळे मोदलाद सज्जनरिंद सेव्यमाननाद (पूजितनाद) सर्वपूर्णनाद परमात्मनन्नु तिळिदवराद, हागू ज्ञानिगळिगे नाने परमप्रियनेंदु गीतादल्लि श्रीकृष्णनु हेळिदंते परमात्मन ज्ञानदिंदले अत्यंतप्रीतराद अथवा प्रसन्नमनसुळ्ळ आ ऋषिश्रेष्ठराद शुकमुनिगळु ई प्रकार परीक्षिद्राजन प्रश्नेयन्नु केळि तावु ईमुंदे हेळतक्क संगतियु सयुक्तिकवादकारण केळतक्क जनरिगे विश्वास हुट्टतक्कंदेंदु तिळिसुत्त ई मुंदे हेळतक्क संगतियन्नु केळतक्कंदेंदु हेळुवरु– ' इति ' एंबदु हेतुवाचकवू प्रकरणवाचकवू प्रकारवाचकवू इत्यादेंदु यादवकोशदल्लि हेळिरुवदु. ॥ ५ ॥

श्रीशुक उवाच ॥ यदा तु राजा स्वसुतानसाधून्पुष्णन्नधर्मेण विनष्टदृष्टिः ॥ भ्रातुर्यविष्ठस्य सुतान्विबंधून्प्रवेश्य लाक्षाभवने ददाह ६

विदुरस्य तीर्थयात्रायां निमित्तमाह यदात्विति । अत्र यदाशब्दो हेत्वर्थः " यदातदेति हेत्वर्थे कालार्थेपि च भण्यत " इति वचनात् अधर्मेणेत्यस्यावधारणार्थे तुशब्दः विनष्टा भगवद्विषया दृष्टिर्यस्य स तथा असाधूनन्यायवर्तिनः अधर्मेण धर्मविरुद्धकर्मणा यविष्ठस्य कनिष्ठस्य विबंधून् लौकिकबंधुरहितान् लाक्षाभवने लाक्षो-पगूढगृहे ददाह यदा यस्मात्तदा तस्मादित्येको हेतुः ॥ ६ ॥

विदुरनु तीर्थयात्रेगे होगुवदक्के निमित्तवन्नु हेळुवरु– ई श्लोकदल्लि ' यदा ' एंब शब्दवु हेतुवाचकवागिरुवदु. यदा-तदा-एंब अव्ययगळु हेत्वर्थदल्लियू कालवाचकदल्लियू इरुववेंदु वचनउंटु; हागू ई श्लोकदल्लिय ' तु ' शब्दवु धृतराष्ट्रनु माडिद अधर्मवु निश्चयवेंदु हेळुवदु. (शुकाचार्यरु हेळुवरु– हे परीक्षितने) भगवद्विषयक ज्ञानहीननाद धृतराष्ट्रराजनु अन्यायमा-र्गदल्लिद्द तन्न मक्कळन्नु धर्मविरुद्धवाद कार्यगळिंद संरक्षिसुत्त, तन्नहोर्तु लौकिकबंधुगळिल्लद तन्न तम्मन मक्कळाद धर्मभीमादिगळन्नु अरगिन मनेयल्लि प्रवेशमाडिसि याव कारण सुडिसिदनो आदकारण विदुरनु मने बिडुवदक्के इदु १ ने कारणवु. ॥ ६ ॥

यदा सभाया कुरुदेवदेव्याः केशाभिमर्शं सुतकर्म गर्ह्यं ॥ न वारयामास नृपः स्नुषाया अस्रैर्हरंत्याः कुचकुंकुमानि ॥ ७ ॥

अयमेको हेतुरित्याह यदेति । नृपो धृतराष्ट्रः कुचकुंकुमान्यस्रैर्नेत्रजलैर्हरंत्याः क्षालयंत्याः स्वस्य स्नुषायाः कुरुदेवस्य युधिष्ठिरस्य देव्याः पट्टाभिषिक्तायाः द्रौपद्याः सभायां गर्ह्यं निंद्यं सुतस्य दुःशासनस्य कर्म केशाभिमर्शं कबरीभारपरामर्शलक्षणं न निवारयामास यदा यस्मात्तस्मात् ॥ ७ ॥

आ विदुरनु मने बिडुवदक्के मत्तोंदु कारणवन्नु हेळुवरु– हागू धृतराष्ट्रराजनु तन्न सभेयल्लि, कुचगळल्लि लेपन माडिद कुंकुमसदृशवाद केसरगंधवन्नु तन्न दुःखोद्रेक-(अतिशयदुःख)-दिंद बंद कण्णीरुगळिंद तोळेयुत्तलिद्द, तन्न सोसीयाद कुरुकुल श्रेष्ठनाद धर्मराजन पट्टद राणीयाद द्रौपदिय वेणीभारवन्नु (हेळलन्नु) स्पर्शमाडिद (हिडिदु जग्गिद) तन्न मगनाद दुःशासनन निंद्यकार्यवन्नु तिळिदाग्यू एलो इंथ केलसवन्नु माडतक्कद्दल्ल, बेडेंदु अवनन्नु यावकारण बिडिसलिल्लवो. ॥ ७ ॥

द्यूतेत्वधर्मेण जितस्य साधोः सत्यावलंबस्य वनागतस्य ॥ न याचतोऽदात्समयेन दायं तमोजुषाणो यदजातशत्रोः ॥ ८ ॥

अयं तृतीयो हेतुरित्याह द्यूतेत्विति। तुशब्दोऽवधारणार्थः अधर्मेणेत्यनेन संबध्यते साधुत्वादीनि पितृधनदानयोग्यत्वहेतव इति प्रकाशनायोक्तानीति अवलंब आधारयष्टिः दायं स्वस्य प्राप्तियोग्यं पितृधनं वनवासावसानसमये नादादिति यत्तस्मादितिशेषः तत्र हेतुः तम इति। तमो यथार्थज्ञानग्लानिकारणं पुत्रवचनं जुषाणः सेवमानोंऽगीकुर्वाण इत्यर्थः ॥ ८ ॥

१. दुःखोद्रेकेण निर्गतनेत्रजलैः कुचयोर्लिप्तकुंकुमानि कुंकुमकेसरयुक्तगंधलेपमितियावत् हरंत्याः क्षालयंत्याः अनेन विशेषणद्वयेन धृतराष्ट्रस्य अतीव निर्घृणत्वं सूचयति । –(**या.**)

मूरने कारणवन्नु हेळुवरु– धृतदल्लि केवल अधर्मदिंदले पराजितनागि सत्यवेंब बडिगेयन्नु कैय्यल्लि हिडिदिद्द-(सत्यवन्ने अवलंबिसिद)रिंद वनदिंद तेरळिद यारसंगडवादरू शत्रुभाववन्नु माडदिद्द धर्मराजनिगे अवन प्रतिज्ञानुसारवागि वनवास-अज्ञातवासगळु मुगिद नंतर योग्यरीतियिंद दोरेयतक्क अवन तंदेय द्रव्यभागवन्नु धृतराष्ट्रराजनु तन्न यथार्थज्ञानवु मुचि अज्ञानवन्नु तंदुकोडतक्क पुत्रनाद दुर्योधनन वाक्यवन्नु अंगीकरिसि यावकारण कोडलिल्लवो, आ कारणदिंदलू धर्मराजनु तंदेय द्रव्यभागक्के बाध्यनागिद्दनेंबदक्के साधुत्ववेमोदलाद विशेषणगळन्नु कोट्टिरुवरु. ॥ ८ ॥

यदातु पार्थप्रहितःसभाया जगद्गुरुर्यानि जगाद कृष्णः ॥ न तानि पुंसाममृतायनानि राजोरु मेने हतपुण्यलेशः ॥ ९ ॥

चतुर्थ हेतुमाह यदात्विति। पार्थेन युधिष्ठिरेण प्रहितः प्रेषितः पुंसाममृतायनानि मोक्षादिसकलपुरुषार्थसाधनानि हतः पुण्यलेशो यस्य स तथा लिशअल्पीभावइतिधातुः अनेन पापं बहुलं पुण्यमल्पं तदपि नष्टमित्युक्तं भवति इदमेव सुखलेशविनाशकारणमित्यस्मिन्नर्थे तुशब्दः गुरुमात्रस्यापि वाक्यं ग्राह्यं किमु जगद्गुरोरित्यभिप्रायेण तथोक्तं ॥ ९ ॥

नाल्कने कारणवन्नु हेळुवरु–धर्मराजनिंद राज्यद अनुसंधानार्थवागि कळिसल्पट्ट जगद्गुरुवाद श्रीकृष्णनु (धृतराष्ट्रन) सभेयल्लि सकलजनरिगू मोक्षादिपुरुषार्थक्के साधकवाद मातुगळन्नु (अत्यंत उभयतरिगू हितवाद मातुगळन्नु) हेळिदाग्यू 'हतपुण्यलेशः' धृतराष्ट्रराजनु मोदले तन्नल्लि पापवु बहळागित्तु, इद्द यत्किंचित् पुण्यवन्नूसह कळकोंडु आ श्रीकृष्णनु हेळिद मातुगळन्नु हितकरवागि तिळकोळ्ळलिल्लवु; आ इद्दष्टु पुण्यवु होगुवदक्के कारणवेनेंदरे साधारणवागि लोकदल्लि तनगिंत श्रेष्ठराद गुरुगळन्नु मीरिदरूसह पुण्यवु होगुवदु; ई श्रीकृष्णनंतू जगद्गुरुवु, इंथवन मातुमीरिद मेले यावत्तू पुण्यवु होयितेंदेनु हेळतक्कदु ' ई अर्थवन्नु ' तु ' शब्दवु हेळुवदु. ॥ ९ ॥

यदोपहूतो भवनं प्रविष्टो मंत्राय पृष्टः किलपूर्वजेन ॥ अथाह तं मंत्रदृशां वरीयान्यन्मंत्रिणो वैदुरिकं वदंति ॥ १० ॥

ततः किं विदुरस्य तीर्थयात्रायामित्यतो विशेषहेतुमाह यदेति। पूर्वजेन ज्येष्ठेन यदोपहूतो भवनं प्रविष्टो विदुरो मंत्राय स्वकर्तव्यतालोचनाय पृष्टः किं कार्यं तद्ब्रवीहि इति अथ तदा मंत्रदृशां मंत्रज्ञानां वरीयांस्तं धृतराष्ट्रमाह मंत्रदृग्वरीयस्त्वं कुतइति तत्राह यदिति। वैदुरिकं विदुरेणोक्तं यद्यस्मात्तस्मादितिशेषः कृष्णे संधिकार्यमनुत्पाद्योपप्लाव्यंगतेसत्युपहूतइति अस्मिन्नर्थे किलशब्दः ॥ १० ॥

मुंदे विदुरनु तीर्थयात्रेगे होगुवदक्के मत्तेनु कारणवाथितु ' एंदरे. मोदलिगिंत मत्ते हेच्चिन कारणवन्ने हेळुवरु– श्रीकृष्णनु संधिकार्यक्कागि (मध्यस्तिगीसल्लुवागि) बंद आ कार्यवु अनुकूलवागदे अवनु पुनः उपप्लाव्यपट्टणक्के होदनंतर. तनगे ज्येष्ठनाद धृतराष्ट्रराजनिंद करिसिगोळ्लपट्टु यावाग्ये विदुरनु धृतराष्ट्रन मनिगे प्रवेशमाडलु आ धृतराष्ट्रनु ई समयदल्लि

१. यद्यस्मादन्यमंत्रिणः वैदुरिकं विदुरेणोक्तमेव स्वराज्यादिके प्रतिवंदति। तस्मात् राजनीतिसंप्रदायप्रवर्तकइत्युक्तं भवति। –(**या.**)

पांडवर विषयवागि एनु माडतक्कदेंबदन्नु नीने हेळु एंदु विदुरनन्नु प्रश्नमाडलु आग्ये आलोचने-(युक्ति)गळन्नु हेळुववरल्लि श्रेष्ठनाद विदुरनु आ धृतराष्ट्रनिगे याव नीतिगळन्नु उपदेशमाडिदनो आ नीतिगळेन्न एरडने मंत्रिगळु तम्म राजकीव्यवस्थेगळल्लि उपयोगिसुवरु. (अदे विदुरनीतिएंदु लोकदल्लि अद्यापि प्रख्यातवागिरुवदु) आद्दरिंदले नीतिगळन्नु हेळुववरल्लि विदुरने श्रेष्ठनेनिसुवनु. ॥ १० ॥

अजातशत्रोः प्रतियच्छ दायं तितिक्षतो दुर्विषहं तवागः ॥ सहानुजो यत्र वृकोदरो हि स्वशत्रुहा यं त्वमलं बिभेषि ॥ ११ ॥

किमाहेति तत्राह अजातशत्रोरिति। प्रतियच्छ प्रदेहि प्रदाने हेतुमाह सहानुजइति। हिशब्दो हेत्वर्थः यत्र यस्य युधिष्ठिरस्याभिप्रेतसाधक इतिशेषः किमसौ यम इति तत्राह यमिति। यं भीमंप्रति अत्रापि हेतुमाह स्वशत्रुहेति स्वस्य राज्यलक्षणद्रव्यस्य शत्रवो दुर्योधनादयः तान् हतवानिति निश्चितत्वात्तथा प्रयोगः ११

विदुरनु धृतराष्ट्रराजनिंग एनु नीतियन्नु हेळिदनेंदरे हेळुवरु–हे धृतराष्ट्रने सहनमाडलिक्के अशक्यवाद निंन अपराधवन्नु सहनमाडिकोंडिद्द (शत्रुभाववन्नु परित्यागमाडिद) धर्मराजन. (तंदेयसंबंधवाद) राज्यद अर्धभागवन्नु कोट्टुबिट्टु: याके कोडतक्कदेंदरे कारणवन्नु हेळुवनु–आ धर्मराजन अभिप्रायानुसारवागि राज्यवन्नु साधिसिकोट्टुवदक्के तन्न तम्मनिंद सहितनाद भीमसेननु सिद्धनागिरुवनु. (बप्पिगोंडिरुवनु): आदरेनायितु ' आ भीमसेननु कोलुतक्क यमदेवनो ' एंदरे हेळुवनु– (दुष्टसंहारमाडुव विषयक्के आ भीमनु यमदेवनकिंत हेच्चु भयंकरनादवनु आद्दरिंदले) याव भीमनन्नु कंडु नीनु बहळे अंजुविः नीनादरू याके अंजुवि एंदरे. आ भीमनु तन्न राज्यवेंब द्रव्यवु दोरेयुवदक्के शत्रुगळाद दुर्योधनमोदलादवरन्नु कोल्लुवनेंबदु निश्चितवे इरुवदु. ॥ ११ ॥

यदा तु पार्थान् भगवान्मुकुंदो गृहीतवान् स क्षितिदेवदेवः ॥ आस्ते स्वपुर्यां यदुदेवदेवो विनिर्जिताशेषनृदेवदेवः ॥ १२ ॥

गाज्यप्रदाने बलवद्धेत्वंतरंचाह यदात्विति। क्षितिदेवाः ब्राह्मणाः तेषां देवः पूज्यः मुक्तिमपि ददाति किमुगाज्यमित्यतो मुकुंदइति। एवंविधसामर्थ्यवान् पार्थान् गृहीतवानिति यदा तस्माच्च सोपि न दूरस्थ इत्याह आस्तइति। स्वेषां पांडवानां पुर्यामुपप्लाव्याख्यायामास्त इति यस्मात्तस्माच्च सांप्रतं सावसर इत्याह विनिर्जितेति १२

पांडवरिंगे राज्यकोडबेकेंबदक्के बलिष्ठवाद एरडने कारणवन्नादरू हेळुवनु– 'क्षितिदेवदेवः' भूसुररादं ब्राह्मणरिंगे उपास्यमूर्तियागि मोक्षवन्नुसह कोडतक्क याव श्रीकृष्णनु पांडवरिंगे राज्यकोडिभुवदेनाश्चर्यवु ! इंथ महासामर्थ्यवुळ्ळ आ श्रीकृष्णनु पाडवर पक्षवहिसिरुवनु. आ कृष्णनादरू एल्लियो. दूर इरुवनेंदल्लवु. समर्थराद यादवर सैन्यदोडने भूभाररादं एल्ल राजरन्नू जयिसिदवनागि आ पाडवरु इरतक्क उपप्लाव्यपट्टणदल्लिये शेरिरुवनु. (आदकारण पांडवर राज्यवन्नु अवश्यवागि कोडतक्कदेंदु तात्पर्यवु.) ॥ १२ ॥

१. आगः अपराधं। –(**या.**)

स एष दोषः पुरुषद्विडाम्ते गृहं प्रविष्टो यमपत्यबुद्ध्या ॥ पुष्णासि कृष्णाद्विमुखो गतश्रीस्त्यजाश्वथैनं कुलकौशलाय ॥ १३ ॥

पुत्रसंवादाभावाद्युधिष्ठिराय राज्यं न दत्तमिति धृतराष्ट्राभिप्रायं विद्वान्विदुरो विष्णुर्वैष्णवद्वेषिणः पुत्रस्यापि परित्यागः श्रेयानिति वक्ति सएषइति । हे ज्येष्ठ त्वं यमपत्यमत्या न पतति कुलं यस्मात्तदपत्यामिति बुद्ध्या पुष्णासि स एष गृहं प्रविष्टः आस्त इत्यन्वयः कीदृशः दोषः पापात्मा पुरुषं पूर्णषड्गुणं विष्णुं द्वेष्टीतिपुरुषद्विट् कुतः कृष्णाद्विमुखः उपलक्षणमेतत् तद्भक्तविमुखश्चातएव गतश्रीः श्रीप्रसादरहितः यत एवंविधोऽथ तस्मात् कुलकौशलायाशु कालक्षेपमंतरेणैनं दुर्योधनं त्यजेत्यन्वयः ॥ १३ ॥

ನನ್ನ ಪುತ್ರನಾದ ದುರ್ಯೋಧನನ ಸಮ್ಮನಿಯಿಲ್ಲದ್ದರಿದ ಧರ್ಮರಾಜನಿಗೆ ರಾಜ್ಯವನ್ನು ಕೊಡಿಲಿಲ್ಲವೆಂಬ ಧೃತರಾಷ್ಟ್ರನ ಮನೋಭಿಪ್ರಾಯವನ್ನು ತಿಳಿದ ವಿದುರನು (ಆ ಪಾಂಡವರಿಗೆ ರಾಜ್ಯಕೊಡದೆ ಇರುವದಕ್ಕಿನಲ್ಲ) ಶ್ರೀವಿಷ್ಣುವಿಗೂ ಆ ವಿಷ್ಣುವಿನ ಭಕ್ತರಿಗೂ ದ್ವೇಷಿಯಾದ ನಿನ್ನ ಪುತ್ರನನ್ನು ಬಿಡುವದೇ ಶ್ರೇಯಸ್ಕರವಾದದ್ದೆಂದು ಹೇಳುವನು– ಹೇ ಜ್ಯೇಷ್ಠನಾದ ಧೃತರಾಷ್ಟ್ರನೆ ಯಾವನಿಂದ ಕುಲವು ನರಕಕ್ಕೆ ಬೀಳುವದಿಲ್ಲವೊ. ಆ ಮಗನಿಗೆ 'ಅಪತ್ಯ' ನೆಂದನಿಸಿಕೆಂದು ಹೇಳುವದರಿಂದ. ಯಾವ ನಿನ್ನ ದುರ್ಯೋಧನನನ್ನು ಏಕೆ 'ಅಪತ್ಯ' ನೆಂದು ತಿಳಿದು ನೀನು ಸಂರಕ್ಷಿಸುವಿಯೊ. ಆ ದುರ್ಯೋಧನನು ನಿನ್ನ ಮನಿಯಾಳಿ ಶೇರಿಸಿರುವನಲ್ಲ! ಅವನು ಏಕೆವನೆಂದರೆ 'ದೋಷः' ಮೂಲಪಾಪಸ್ವರೂಪಿಯಾದ ಕಲಿಪುರುಷನು, ಹಾಗೂ ಪೂರ್ಣಷಡ್ಗುಣನಾದ ಶ್ರೀಕೃಷ್ಣನ ದ್ವೇಷಿಯು. ಮತ್ತು ಆ ಕೃಷ್ಣನ ಭಕ್ತರಿಗೆ ವಿರೋಧಿಯಾದವನು: ಆದ್ದರಿಂದಲೆ ಲಕ್ಷ್ಮೀದೇವಿಯ ಅನುಗ್ರಹವಿಲ್ಲದವನು. ಅವನು ಇಂಥ ದುರ್ಗುಣಿಯಾದ್ದರಿಂದ (ಯಾವ ಒಬ್ಬಪುರುಷನಿಂದ ಕುಲಕ್ಕೆ ಹಾನಿ ಯಾಗುವದೊ. ಆ ಕುಲಕ್ಷೇಮಾರ್ಥವಾಗಿ ಆ ಪುರುಷನನ್ನು ಪರಿತ್ಯಾಗಮಾಡಬೇಕೆಂದು ನೀತಿಶಾಸ್ತ್ರದಲ್ಲಿ ಹೇಳಿದ್ದರಿಂದ) ನಿನ್ನ ಕುಲಕ್ಕೆ ಕ್ಷೇಮವಾಗಬೇಕೆಂದು ನಿನಗೆ ಇಚ್ಛೆಯಿದ್ದರೆ ತಡಮಾಡದೆ ಈ ದುರ್ಯೋಧನನನ್ನು ಮನೆಬಿಟ್ಟು ಹೋಗಲಿ ಹಾಕು. ೧೩

इत्यूचिवांस्तत्र सुयोधनेन प्रवृद्धकोपस्फुरिताधरेण ॥ असत्कृतः सत्स्पृहणीयशीलः क्षत्ता सकर्णानुजसौबलेन ॥ १४ ॥

स्ववचनादिकं धृतराष्ट्रेण नांगीकृतमित्येतावता विदुरस्य तीर्थयात्राकारणविरागहेतुः कः प्राप्त इति तत्राह इतीति । इतिशब्द आदिवचनः एवमादिवाक्यमुक्तवान् प्रकारवचनो वा स्फुरणं संचलनं तत्र ज्येष्ठस्य पुरतः असत्कृतो धिक्कृतः ॥ १४ ॥

ತನ್ನ ಮಾತುಗಳನ್ನು ಧೃತರಾಷ್ಟ್ರನು ಅಂಗೀಕಾರಮಾಡಲಿಲ್ಲವೆಂದು ಇಷ್ಟು ಮಾತ್ರವೆ ವಿದುರನು ತೀರ್ಥಯಾತ್ರೆಗೆ ಹೊಗುವದಕ್ಕೆ ವೈರಾಗ್ಯಕಾರಣವಾಯಿತೆ. ಏದರೆ ಹೇಳುವರು– ಈ ಪ್ರಕಾರವಾಗಿ ಧೃತರಾಷ್ಟ್ರನಿಗೆ ಹಿತವಾದವನ್ನು ಹೇಳಿದ ವಿದುರನು. ಸಜ್ಜನರಿಂದ ಅಪೇಕ್ಷಿಸತಕ್ಕ ಸದ್ಗುಣವುಳ್ಳವನಾದರೂ (ಆಗ್ಯೆ) ಕರ್ಣ-ದುಃಶಾಸನ-ಶಕುನಿಗಳಿಂದ ಸಹಿತವಾಗಿ ಅತ್ಯಂತಕೋಪದಿಂದ ಅಗಲಾಡಿಸತಕ್ಕ ಕೆಳದುಟಿಯುಳ್ಳ ದುರ್ಯೋಧನನಿಂದ ನಮ ಅಣ್ಣನಾದ ಧೃತರಾಷ್ಟ್ರನ ಎದುರಿಗೆ ಅವಮಾನಿತನಾದನು ॥ ೧೪ ॥

क एनमत्रोपजुहाव जिह्मं दास्याः सुतं यद्बलिनैव पुष्टः ॥ तस्मिन्प्रतीपः परकृत्य आस्ते निर्वास्यतामाशु पुराच्छ्वसानः ॥ १५ ॥

१. सद्भिः स्पृहणीयं अपेक्षणीयं शीलं यस्य सः । –(**या.**)

धिक्कारप्रकारमाह क एनामिति । दास्याः सुतमित्याक्रोशे षष्ठी उपजुहावाहूतवान् जिह्मं वक्रहृदयं यस्य पुंसो बलिनोऽपवर्जितान्नेन तस्मिन्पुंसि प्रतीपः विरोधी परेषां मम विरोधिनां पांडवानां कृत्ये कार्ये आस्ते यस्मात्तस्मादितिशेषः निर्वास्यतां निष्कास्यतां श्वसानः श्वासमात्रावशेषो स्वकृतोदोषः स्वस्यैवेति सूचनाय शानच्प्रयोगः ॥ १५ ॥

ಆ ಅವಮಾನಸಂಗತಿಯನ್ನು ಹೇಳುವರು– ದುರ್ಯೋಧನನು ಅದ್ದು) ಏಲೊ ದೂರ ಈ ದಾಸಿಪುತ್ರನನ್ನು ಯಾರು ಕರ್ನಂದಿರಿ ' ದಾಸಿಪುತ್ರನೆಂದು ಆಕ್ರೋಶದಿಂದ ಆಡಿದ್ದು. ಈ ವಿದುರನು ವಕ್ರಹೃದಯವುಳ್ಳವನು; ಯಾಕೆಂದರೆ ಯಾವ ನಮ್ಮಿಂದ ಕೊಡಲ್ಪಟ್ಟ ಅನ್ನದಿಂದಲೆ ಇಷ್ಟು ಪುಷ್ಟನಾಗಿರುವನೊ. ಆ ನಮ್ಮಲ್ಲೆ ವಿರೋಧಿಯಾಗಿ (ನನಗೆ ಹೋಗಲಿ ಹಾಕೆಂದು) ನಮ ವಿರೋಧಿಗಳಾದ ಪಾಂಡವರ ಕಾರ್ಯಸಾಧನಮಾಡುವ ತಾತ್ಪರ್ಯವುಳ್ಳವನಾಗಿರುವನಲ್ಲ: ಆದ್ದರಿಂದ ಇವನನ್ನು ಮೈಮೂರೆ ಹೋಗದೆ ಶ್ವಾಸ ಮಾತ್ರ ಉಳಿಸಿ ಹೊಗಲಿ ಹಾಕರಿ. ತಾನು ಮಾಡಿದ ದೋಷದ ಫಲಭೋಗವನ್ನು ತಾನೆ ಉಣ್ಣಲಿ. ಏಂದು ತಿಳಿಸುವದಕ್ಕೆ ' ಶ್ವಸಾನः ' ಏಂಬಲ್ಲಿ ಶಾನಚ್ ಪ್ರತ್ಯಯ ವಿರುವದು. ॥ ೧೫ ॥

स इत्थमत्युल्बणकर्णबाणैर्भ्रातुः पुरो मर्मसु ताडितोऽपि ॥ स्मयन् धनुर्द्वारि निधाय मायां गतव्यथोऽयादुरु मानयानः ॥ १६ ॥

संभावितस्य ताडनात्प्रागेव निर्गमनं श्रेय इति भावं श्लोकद्वयेन सूचयन्नाह स इति । भ्रातुर्धृतराष्ट्रस्य स्मयन् मंदस्मितं कुर्वन् मायां पुत्रइत्यादिस्नेहलक्षणां हरेर्बंधकशक्तिमुरु मानयानः बहु मन्वानः सोऽयाद्ययौ तीर्थमितिशेषः ॥ १६ ॥

ಸಂಭಾವಿತನಾದವನು ಇಂಥ ಪ್ರಸಂಗವು ಬಂದಾಗ್ಯೆ ಹೊಡಿಸಿಗೊಳ್ಳುವದಕ್ಕಿಂತ ಪೂರ್ವದಲ್ಲಿಯೆ ಮನೆಬಿಟ್ಟು ಹೊರಡುವದೆ ಶ್ರೇಯಸ್ಕರವಾದದ್ದು ಏಂಬ ಅಭಿಪ್ರಾಯವನ್ನು ಈ ಏರಡು ಶ್ಲೋಕಗಳಿಂದ ಸೂಚನೆಮಾಡುವ ಹೇಳುವರು– ಆ ವಿದುರನು ತನ್ನ ಅಣ್ಣನಾದ ಧೃತರಾಷ್ಟ್ರನ ಎದುರಿಗೆ ಈ (ಹಿಂದೆ ಹೇಳಿದ ಪ್ರಕಾರವಾಗಿ (ದುರ್ಯೋಧನನಿಂದ) ಕೆಟ್ಟಿಗೆ ಬಾಣ ಸದೃಶವಾದ ಮಾತುಗಳಿಂದ ಮರ್ಮಗಳಲ್ಲಿ ತಾಡಿತನಾದಾಗ್ಯೂ ಶಿಷ್ಟಾಗದೆ ಮುಗಳ್ನಗೆಯಿಂದ ನಗುತ್ತ (ಇವನು ನಮ್ಮನ್ನು ಬಿಟ್ಟು ಪಾಂಡವರಲ್ಲಿ ಶೇರಿ ನಮ್ಮಸಂಗಡ ಯುದ್ಧಮಾಡ್ಯಾನು ಏಬ ಸಂದೇಹನು ಕೌರವರಿಗೆ ಬರಬಾರದೆಂದು) ತನ್ನ ಧನುರ್ಯವನ್ನು ಅವರ ಮನೆಯ ಬಾಗಿಲಲ್ಲಿಟ್ಟು (ತಮ್ಮ ಅಣ್ಣನಾದ ಧೃತರಾಷ್ಟ್ರನ ಎದುರಿಗೆ ತನಗೆ ದುರ್ಯೋಧನನು ಇಷ್ಟು ಕೆಟ್ಟು ಮಾತುಗಳಾಡಿದಾಗ್ಯೂ ಧೃತರಾಷ್ಟ್ರನು ಆ ದುರ್ಯೋಧನನಿಗೆ ಏನೂ ಪ್ರತಿಯಾಗಿ ಮಾತಾಡದಿದ್ದನ್ನು ಕಂಡು) ಅಹಾ! ಪುತ್ರನೆಬ ಮಮತೆಯು ಬಹಳ ಹೆಚ್ಚಿನದು. ಇದೆ ಪರಮಾತ್ಮನ ಬಂಧಕಶಕ್ತಿಯ ಮಹಿಮೆ. ಏಂದು ತಿಳಿದು ತೀರ್ಥಯಾತ್ರೆಗೆ ಹೊರಟನು. ॥ ೧೬ ॥

स निर्गतः कौरवपुण्यलब्धगजाह्वयात्तीर्थपदः पदानि ॥ अन्वाक्रमत्पुण्यचिकीर्षयोर्व्यामधिष्ठितो यानि सहस्रमूर्तिः ॥ १७ ॥

पुण्यलब्ध इत्यनेन हस्तिनपुरमपि पुण्यक्षेत्रमिति सूचयति । तीर्थपदो हरेः पदानि स्थानानि सहस्रमूर्तिः अनंतमूर्तिः । " तदेतत्सहस्रंतत्सर्वमितिश्रुतिः " ॥ १७ ॥

१. अनेन सम्यक् ताडनपूर्वकमिति सूचयति । –(**या.**) २. कर्णबाणैः कर्णयोर्बाणतुल्यैः वचनैः । –(**या.**) ३. धनुर्निधाय पांडवानां संगत्या अस्माभिरयं योत्स्यतीति तेषां शंकां परिहर्तुं धनुर्निधानमिनिध्येयं । –(**या.**)

कौरवर पुण्यदिंद दोरेद हस्तिनापुरवेंब क्षेत्रदिंद होरटु आ विदुरनु पवित्रस्वरूपनाद परमात्मन स्थान (क्षेत्र)गळन्नु नोडबेकेंदु अनंतमूर्तियाद परमात्मनु सकलक्षेत्रगळल्लि सन्निहितनागिरुवनेंदु श्रुतियल्लि हेळिदंते आ परमात्मनु यावयावक्षेत्रगळल्लि विशेषवागि संनिहितनागिरुवनो. भूमंडलदल्लिद्द आ क्षेत्रगळन्नेल्ल पुण्यसंपादनेगागि संचारमाडिदनु ॥ १७ ॥

वनेषु पुण्योपवनाद्रिकुंजेष्वपंकतोयेषु सरित्सरःसु ॥ अनंतलिंगैः समलंकृतेषु चचार तीर्थायतनेष्वनन्यः ॥ १८ ॥

एतदेव विशिनष्टि वनेष्विति । तीर्थानां शुद्धजलानामायतनेषु स्थानेषु नित्यशुद्धस्य हेरः सन्निधानस्थानेषु वा पुण्यशब्दः प्रत्येकमभिसंबध्यते उपवनेषु पुरोपकंठवनेषु अद्रिषु श्रीपर्वतादिषु कुंजेषु सह्यगिरिव्रजाद्यणुतरपर्वतेषु वनेषु वृंदावनेषु सेव्यत्वे हेतुमाह अपंकेति । सरित्सु गोदावर्यादिनदीषु सरःसु पुष्करादिषु अनंतस्य हरेर्लिंगैः प्रतिमाभिः सम्यगलंकृतेषु ॥ १८ ॥

आ विदुरनु याव याव स्थानगळल्लि संचरिसिनेंबदन्ने विस्तरिसुवरु– ' तीर्थायतनेषु ' पवित्रोदकवुळ्ळ स्थळगळल्लि, अथवा नित्यशुद्धनाद परमात्मन विशेषसंनिधानवुळ्ळ स्थळगळल्लियू, ' वनेषु ' वृंदावनमोदलाद पुण्यवनगळल्लियू, ' उपवनेषु ' पट्टण सुत्तलू इरतक्क मनोहरवाद तोटगळल्लियू, ' अद्रि ' श्रीशैलमोदलाद पर्वगळल्लियू, ' कुंजेषु ' लतागृहगळिंद शोभितवाद सण्ण सण्ण पर्वतगळ गुंपु उळ्ळ संह्याद्रि मोदलाद पर्वतगळल्लियू, केसरु इल्लद स्वच्छोदकपूर्णवाद गोदावरी मोदलाद नदिगळल्लियू, पुष्करमोदलाद पुण्यसरोवरगळल्लियू, अनंत शब्दवाच्यनाद परमात्मन प्रतिमेगळिंद अलंकृतवाद क्षेत्रगळल्लियू, तन्न संगड एरडने जनरू इल्लदंते ओब्बने आ विदुरनु संचरिसिदनु. ॥ १८ ॥

गा पर्यटन्मेध्यविविक्तवृत्तिः सदाप्लुतोऽधः शयनावधूतः ॥ अलक्षितः स्वैरवधूत (वेषो) केशो व्रतानि चेरे हरितोषणानि ॥१९॥

चरणं विशिनष्टि गामिति । गां भूमिं मेध्यैः शुद्धैः विविक्तैः पृथग्भूतैः वृक्षात्पतितैः पत्रादिभिः वृत्तिराजीविका जीवनं यस्य स तथोक्तः यद्वा शुद्ध एकांतस्थले वृत्तिरवस्थानं यस्य स तथा अधःशयनेन स्थंडिले शयनेन अवधूतः रजोरूषितदेहः स्वैः स्वकीयैरलक्षितोऽविज्ञातोऽवधूताः वायुनोद्धूताः केशा यस्य स तथा यद्वा अवधूतवेषवद्वेषो यस्य स तथाकीदृशानि व्रतानि हरितोषणानि यानि यानि व्रतानि चेरे तानि तानि सर्वाण्यपि हरिप्रसादजनकानीत्यर्थः अनेनोद्देश्यदेवतावशीकरणसमर्थानीति व्रतशब्दनिर्वचनं सूचितं वृञ् वरण इतिधातोः व्रियतेनेनेतदित्यस्मिन्नर्थे व्रतमिति रूपं सिद्ध्यति ॥ १९ ॥

आ विदुरन संचारवु यावप्रकार वायितेंदरे हेळुवरु– तीर्थक्षेत्रगळिंगे संचरिसुत्त विदुरनु ' मेध्यविविक्तवृत्ति ' पवित्रवृक्षगळिंद केळगे बिद्दिरुव यलिगळन्नु भक्षणमाडि उपजीवनमाडुत्त– अथवा शुद्धवाद एकांतस्थानदल्लिये कृतुगोळ्ळुत्त, पवित्रोदकगळल्लि अवगाहन (स्नान) माडुत्त, नेलदमेले मलगुवदरिंद धूळिहत्तिद देहउळ्ळवनागि, स्वकीय जनरिंद काणिसिगोळ्ळदे, ' अवधूतकेशः ' गाळिंगे हारुतक्क कूदलु उळ्ळवनागि (अंदरे जटागळन्नु हरिविकोंडु अथवा (पाठांतर) अवधूतवेषः=अवधूत=दिगंबरनंते वेषउळ्ळवनागि, श्रीहरिप्रीतिकरवाद व्रतगळन्नु माडिदनु, आ विदुरनु याव याव व्रतगळन्नु माडिदनो, अवेल्ल श्रीहरिप्रसादक्के कारणवादद्दवेंदु हेळल्पडुवदु. वृञ् (वरण) एंब धातुवु ई माडुतक्क कार्यदिंद ई विषयवन्नु बेडिकोळ्ळु एंब

अर्थवन्नु हेळुवदरिंद ' व्रत ' वेंब रूपवु सिद्धवागुवदु. इदरिंद याव देवतावुद्देशवागि पूजेयन्नु माडुवरो, आ देवतियन्नु वशमाडिकोळ्ळुतक्क सामर्थ्यउळ्ळ उपायगळिंगे व्रतवेंब हेसरु इरुवदु, एंदु सूचने माडल्पडुवदु. ॥ १९ ॥

इत्थं व्रजन्भारतमेव वर्ष कालेन यावद्गतवान्प्रभासं ॥ तावच्छशास क्षितिमेकचक्रामेकातपत्रामजितेन पार्थः ॥ २० ॥

कर्मभूमित्वाद्भारतवर्षमेवाटितवान् नान्यदित्यस्मिन्नर्थे एवशब्दः केनचित्कालेन यावद्यदा तावत्तदा पार्थोऽजितेन कृष्णेनोक्तविधिना एकचक्रामेकाज्ञां एकमेवातपत्रं श्वेतच्छत्रं यत्र सा तथा तां क्षिनिवासगत्योरितिधातोः सर्वत्र सन्निवासः सुगमनं चोराद्युपद्रवो नास्तीत्येतत्सूचनाय क्षितिमिति प्रायोजि इत्थमित्यनेन नियमभंगो नास्तीति मृच्यते ॥ २० ॥

ई प्रकार आ विदुरनु कर्मभूमियाद भरतखंडवन्नुमात्र, सर्वत्र संचरिसुत्त स्वल्पकालदल्लिये प्रभासवेंबक्षेत्रक्के बंदनु. इवनु आ प्रभासक्षेत्रक्के बरुवष्टरल्लि ' अजितेन ' श्रीकृष्णनु हेळिद मार्गानुसारवागि, धर्मराजनु ' एकचक्रां ' तन्नोळ्गनदे आज्ञेयु नडेयतक्क, तन्नोळ्गनदे श्वेतच्छत्रवुळ्ळ याव राज्यदल्लि प्रजरु सौख्यदिंद वासमाडुवदक्कू चोरभयविल्लदंते सर्वत्र संचारमाडुवदक्कू अनुकूलवुळ्ळ भूमियन्नु शासनमाडलारंभिसिदनु. हींगे हेळुवदरिंद धर्मराजनु तन्न याव नियमक्क भंगबरदंते राज्यपालिसुत्तिद्दनेंदु सूचितवागुवदु. ॥ २० ॥

तत्राथ शुश्राव सुहृद्विनष्टिं वनं यथा वेणुजवन्हिनाश्रयं ॥ संस्पर्धया दग्धमथानुशोचन् सरस्वतीं प्रत्यगियाय तूष्णीं ॥२१ ॥

प्रभासतीर्थागमनेन कश्चिदर्थविशेषः सूचितः कोसाविति तत्राह तत्रेति । अथ प्रभासक्षेत्रगमनानंतरं तत्र प्रभासे तिष्ठन् विदुरः सुहृदां यदूनां विनष्टिं विप्रशापनिमित्तविनाशं शुश्रावेत्यन्वयः । " विदुरस्तु प्रभासस्थः शापं संक्षेपतोऽशृणोत । यदूनां विस्तरात्पश्चादुद्धवाद्यमुनामनु " इतिवचनात् । विप्रशापेन भविष्यंतं यदुविनाशं श्रुतवान् अन्यथा महाभारतविरोधः स्यादित्यर्थः तज्जिज्ञासुस्तत्रागमत्किं नेत्याह यथेति । वायुनोद्धूतवेणुसंघर्षणलक्षणसंस्पर्शोत्थितवन्हिना तदाश्रयं वनं यथा दग्धं भविष्यति तथा विप्रशापहेतुसंस्पर्धयान्योन्यमर्मस्पर्शनवचनोत्थितकलहवन्हिना दहिष्यत्स्वकुलं अनुशोचन् अथ प्रत्यक्सरस्वतीं पश्चिमवाहिनीं नाम्ना सरस्वतीं नदीमियायेत्यन्वयः । तूष्णीमित्यनेन दुःखेन क्षेत्रवासिनो नापृच्छादिति सूचयति ॥ २१ ॥

विदुरनु प्रभासक्षेत्रक्के बरुवदरिंद एनो ओंदु विशेषवु तोरिदंतागुवदु; अदु एनु विशेषवेंदरे हेळुवरु– ' अथ ' विदुरनु प्रभासक्षेत्रक्के होदनंतर आ प्रभासक्षेत्रदल्लिद्दाग्ये तन्न अंतःकरणिगळाद यादवरिगे ब्राह्मणर शापनिमित्तवागि नाशवुंटायितेंदु संगतियन्नु केळिदनु. ' विदुरनु प्रभासक्षेत्रदल्लिद्दाग्ये यादवरिगे बंद शापवृत्तांतवन्नु संक्षेपदिंद केळिदनु; आनंतर यमुनातीरदल्लि उद्धवन दर्शनवादमेले आ उद्धवन मुखदिंद विस्तारवागि केळिदनु; आ प्रकृतक्के ब्राह्मणर शापदिंद मुंदे यदुकुलनाशवागुवदेंदु केळिदनु ' एंदु हींगे अर्थ हेळतक्कदे होर्तु यादवरु मृतराद संगतियन्नु केळिदनेंदर्थवल्लवु. याकेंदरे हागे अर्थ हेळिदरे महाभारतदल्लि हेळिद अर्थक्के विरोध बरुवदु. हागादरे आ संगतियन्नु विचारिसुवदक्कागिये आ प्रभासक्के बंदनेनु,

एंदरे अल्लवु. (अकस्मात्तागि अल्लिगे बरुत्तिरलु आ वार्तेयन्नु केळि) गाळिबीसिद बिदरुवनवु ओंदक्कोंदु तगलि आ संघर्षण- (तिक्कोण) दिंद उत्पन्नवाद अग्नियिंदले ह्यागे सुडुवदो हागे ब्राह्मणर शापवे कारणवागियुळ्ळ स्पर्धेयिंद ओब्बरिगोब्बरु मर्मद मातुगळन्नाडुत्त आ कलहवेंब अग्नियिंद मुंदे यदुकुलवु सुट्टुहोगुवदेंदु मनसिनल्लिये शोकवडुत्त पश्चिमाभिमुखळागि हरियतक्क सरस्वतीनदियन्नु कुरितु तन्न दुःखदिंद क्षेत्रदल्लिद्द जनगळसंगडा माताडदे होदनु. ॥ २१ ॥

तस्यांत्रितस्योशनसो मनोश्च पृथोरथाग्नेरसितस्य वायोः ॥ तीर्थं सुदासस्य गवां गुहस्य यच्छ्राद्धदेवस्य स आसिषेवे ॥ २२ ॥

दुःखाग्निसंतप्तः तत्र सरस्वत्यां मर्तुं किं गत इति तत्राह तस्यामिति । अनेन विदुरस्य शास्त्रज्ञानाधिक्यं सूचयति । यतः संसारः क्षणभंगुरइति तीर्थस्नानादिना शुद्धांतःकरणस्य भगवदपरोक्षज्ञानेन पुरुषार्थः स्यादित्यनेन तीर्थस्नानमकारि नान्यो व्यापार इति ॥ २२ ॥

दुःखाग्निसंतप्तनाद विदुरनु आ सरस्वतीतीरके मृतनागबेकेंदु होदनेनु, एंदरे हेळुवरु– आ विदुरनु आ सरस्वती तीरदल्लिद्द त्रितनेंब ऋषिय तीर्थवन्नू, उशना एंब ऋषिय तीर्थवन्नू, मनुएंबवन तीर्थवन्नू, पृथु एंबवन तीर्थवन्नू, अग्नितीर्थवन्नू, वायुतीर्थवन्नू, सुदासतीर्थवन्नू, गोतीर्थवन्नू, गुहतीर्थवन्नू, श्राद्धदेवन तीर्थवन्नू सरियागि संचरिसिदनु. ईप्रकार तीर्थगळल्लि संचारमाडुवदरिंद आ विदुरनिगे मोदलिगिंत हेच्चागि शास्त्रज्ञानवु उंटायितेंदु सूचिसल्पडुवदु तीर्थगळल्लि स्नानमाडोणमोदलाद्दरिंद संसारवु क्षणभंगुरवेंदु ज्ञानवागि अंतःकरुणशुद्धियिंद परमात्मन अपरोक्षज्ञानवागि मोक्षवेंब पुरुषार्थवु दोरेयुवदेंदु तिळिदु आ विदुरनु तीर्थगळल्लि स्नानमाडिदने होर्तु एरडने बुद्धियिंदल्लवु. ॥ २२ ॥

अन्यानि चेह द्विजदेवदेवैः कृतानि नानायतनानि विष्णोः ॥ प्रत्यंकमुख्याकितमंदिराणि यद्दर्शनात्कृष्णमनुस्मरंति ॥ २३ ॥

न केवलं नदीतीर्थान्येव निषेवितानि किंतु तद्देशभवानि क्षेत्राणीत्याह अन्यानिचेति । इह नद्यां सुराष्ट्रेच कीदृशान्यायतनानि प्रत्यंकाः सम्यक् लक्षणवंतो ब्रह्मादयस्तेषां मुख्यो विष्णुस्तस्य प्रतिमाभिरंकितानि चिन्हितानि मंदिराणि येषु तानि तथा । "ब्रह्मा प्रत्यंकवान् सम्यग्विष्णुर्लक्षणवत्तम" इति । प्रत्यंकं मुख्यमायुधश्रेष्ठं चक्रं तदंकितानीति व्याख्यानं चिंत्यं निघंटुकारैस्तथानभिहितत्वादिति येषां क्षेत्राणां दर्शनात् ॥ २३ ॥

आ विदुरनु केवल नदीतीर्थगळल्लि मात्र स्नानमाडुत्त होदनेंदल्लवु, आया नदिगळ समीपदल्लिद्द क्षेत्र- (दोड्डदोड्ड देवालय)गळन्नुसह नोडुत्त होदनेंदु हेळुवरु– आ सरस्वती नदीतीरदल्लियू सुराष्ट्रदेशदल्लियू इद ब्राह्मणश्रेष्ठरिंद स्थापितवाद मच्छ, कूर्म, वराह मोदलाद अनेक प्रतिमेगळुळ्ळ अनेक विष्णुदेवालयगळन्नू मत्ते केलवु ' प्रत्यंकमुख्यांकितमंदिराणि' प्रत्यंकाः एंदरे उत्तमवाद मूवत्तेरडु लक्षणगळिंद संपन्नराद ब्रह्मनेमोदलाद देवतिगळु अवरिगे मुख्यनाद अंदरे आ देवतिगळिगिंत अत्युत्तमलक्षणवुळ्ळ श्रीविष्णुवु ' प्रत्यंकमुख्य ' नेनिसुवनु. याव

१. तस्यां सरस्वत्यां विद्यमानं त्रितस्य तन्नामकस्य ऋषेः तीर्थमिति प्रत्येकं षष्ठ्यंतेन संबध्यते । यत् तृतादीनां तीर्थं तत् । स विदुरः आसिषेवे सम्यक् सेवितवान् । –(**या.**)

प्रतिमेगळ संदर्शनदिंद श्रीकृष्णनन्नु स्मरणेमाडुवरो अंथपरमउत्तमोत्तम लक्षणगळुळ्ळ श्रीविष्णुप्रतिमेगळिंद अलंकृतवाद (स्वयंव्यक्तस्थानगळन्नु नोडुत्त होरटनु. प्रत्यंकमुख्यवेंदरे आयुधगळल्लि श्रेष्ठवाद चक्रवेंदु अर्थमाडि आ चक्रचिन्हवुळ्ळ स्थानगळन्नु एंदु केलवरु व्याख्यान माडिरुवरु. आ विषयक्के योचने माडतक्कदु यार्केंदरे ' प्रत्यंकमुख्य ' वेंदरे आयुधश्रेष्ठवाद चक्रवेंदु याव निघंटु (कोश) काररु अर्थ माडिल्ल. ॥ २३ ॥

ततस्त्वतिव्रज्यसुराष्ट्रमृद्धं सौवीरमत्स्यान् कुरुजांगलांश्च ॥ कालेन तावद्यमुनामुपेत्य तत्रोद्धवं भागवतं ददर्श ॥ २४ ॥

विदुरस्य तीर्थसेवायां तात्पर्याधिक्यं सूचितमृद्धमित्यनेन अन्यथा समृद्धदेशत्यागे कारणाभावात् कालेन केनचिदितिशेषः ॥ २४ ॥

आमेले बहु संपन्नवाद सुराष्ट्रदेशवन्नु दाटि सौवीरदेशवन्नू मत्स्यदेशवन्नू कुरुदेश जांगलदेशगळन्नू दाटि केलवु दिवसगळमेले यमुनातीरक्के बंदु विदुरनु अल्लि भगवद्भक्तनाद उद्धवनन्नु कंडनु. ई श्लोकदल्लि समृद्धवाद सुराष्ट्रदेशवन्नु बिट्टु एंदेन्नुवदरिंद विदुरनिगे तीर्थयात्रेयल्लिये अतिशय तात्पर्यवित्ते होर्तु एरडने यावसंबंधवाद योचने इद्दिल्ल हागिद्दरे ऐश्वर्यसंपन्नदेशवन्नु बिट्टु अवनु एंदिगू बरुत्तिद्दिल्ल. ॥ २४ ॥

स वासुदेवानुचरं प्रशांतं बृहस्पतेराप्तनयं प्रतीतं ॥ आलिंग्य गाढं प्रणयेन भद्रं स्वानामपृच्छद्भगवत्प्रजानां ॥ २५ ॥

तत्र तीर्थस्नानमंतरेणोद्धवं दृष्ट्वानेन किमकारि तन्मह्यं ब्रूहीति परीक्षितो हार्दं चोद्यं परिहरति स इति । प्रशांतमित्यादिविशेषणत्रयेणोद्धवस्य भगवन्निष्ठाया वैराग्यस्य शास्त्रज्ञानस्यप्रख्यातेश्चाधिक्यं सूचयति । भगवान् कृष्णः प्रजा पुत्रो येषां ते तथोक्तास्तेषां अपृच्छदिति द्विकर्मको धातुः तेनोद्धवमित्यन्वेतव्यं॥ २५॥

अल्लि तीर्थस्नानद होर्तु विदुरनु उद्धवन दर्शनदिंद मत्तेनु माडिदनेंबदन्नु ननगे हेळबेकेंब परीक्षितन मनदोळगिन संदेहवन्नु परिहरिसुवरु– आ उद्धवन दर्शनानंतर विदुरनु श्रीकृष्णन भृत्यनाद. भगवन्निष्ठा बुद्धिवुळ्ळ बृहस्पत्याचार्यरिंद नीतिशास्त्रवन्नु अध्ययनमाडिद, बहु प्रसिद्धनाद आ उद्धवनन्नु अत्यंत स्नहदिंद विशेषवागि आलिंगने माडिकोंडु तन्न स्वकीयराद. श्रीकृष्णन तायितंदिगळेमोदलाद बांधवर क्षेमसंगतियन्नु प्रश्नमाडिदनु. मेले हेळिद ' प्रशांत ' मोदलाद मूरु विशेषणगळिंद उद्धवनल्लि भगवन्निष्ठाबुद्धियू वैराग्यवू शास्त्रज्ञानद प्रख्यातियू बहळागि इर्त्तेंदु हेळल्पडुवदु. ई श्लोकदल्लि उद्धवनन्नु कुशलवन्नु प्रश्नमाडिदनेंदु द्विकर्मक प्रयोगविरुवदु. ॥ २५ ॥

कच्चित्पुराणौ पुरुषौ स्वनाभ्यपद्मानुवृत्त्येह कलावतीर्णौ ॥ आसात उर्व्याः कुशलं विधाय कृतक्षणौ कुशलं शूरगेहे ॥२६॥

१. जांगलदेशोपि कुरुदेशांतर्गतः । अतः कुरुजांगलानीत्युक्तं । –(**या.**) २. प्रतीतं प्रख्यातं वासुदेवानुचरं प्रशांतं प्रकर्षेण भगवन्निष्ठायुक्तं बृहस्पतेः सकाशात् प्राप्तनयं अधीतनीतिशास्त्रं । –(**या.**)

स्वो विष्णुस्तस्य नाभ्यो नाभिजातः पद्मो ब्रह्मा तस्यानुवृत्त्या प्रार्थनालक्षणसेवया कृतक्षणौ कृतावसरौ । कच्चित्कामप्रवेदनइति वचनात् प्रश्नार्थे वर्तते कच्चि-शब्दः । " पद्मो ब्रह्मा समुद्दिष्टः पद्माश्रीरपि चोच्यत " इति च । " लोकानां सुखकर्तृत्वमपेक्ष्य कुशलं विभोः । पृच्छते सततानंदात्कथं तस्यैव पृच्छत " इति वचनात् । हरेः कुशलप्रश्नो लोकानां सुखकर्तृत्वमपेक्ष्येति ज्ञातव्यं ॥ २६ ॥

आ कुशलप्रश्नमाडिद संगतियन्ने हेळुवरु -हे उद्धवने. ' स्वनाभ्यपद्मानुवृत्या ' ' स्व '=श्रीविष्णुविन ' नाभ्य '=नाभियिंद उत्पन्ननाद ' पद्म ' चतुर्मुखब्रह्मन ' अनुवृत्या ' प्रार्थनेएंब सेवेयिंद. ई भूलोकदल्लि अवतारमाडिद बहुपुरातनपुरुषराद रामकृष्णरु भूभारवन्निळिसि आ भूदेवीगे क्षेमवन्नु कोट्टु तावु अवतारमाडिद केलसवन्नु मुगिसिगोंडु वसुदेवन मनेयल्लि क्षेमदिंदिरुवरो ' ई श्लोकदल्लि ' कच्चित् ' एनवु अपेक्षेयन्नु केळुवदरल्लिरुवदिंदु वचनविदरिंद प्रश्नार्थकवागि उपयोगिसल्पट्टिदे. ' पद्म ' एंदरे ब्रह्मदेवनेंतलू लक्ष्मीदेवी एंतलू हेळल्पडुवदरिंद इल्लि ब्रह्मनेंदु अर्थमाडिरुवरु: मत्तू विदुरनु श्रीकृष्णनु क्षेमदिंदिरुवनो एंदु प्रश्नमाडिरुवदु. ईग्ये श्रीहरियु लोकक्के सुखकोट्टिरुवनो एंब तात्पर्यवे होर्तु सदा सुखरूप-नागिरतक्क परमात्मनिगे क्षेमदिंदिरुवनो एंदु प्रश्नमाडुव कारणवे इल्लवु एंदु आचार्यरु हेळिरुवरु. ॥ २६ ॥

कच्चित्कुरूणां परमः सुहृन्नो भामः स आस्ते सुखमंगशौरिः ॥ यो वै स्वसॄणा पितृवद्ददाति वरान्वदान्यो वरतर्पणेन ॥ २७ ॥

भामः पूज्यः वदान्यो दानशीलः वरतर्पणेन भर्तृतर्पणेन ॥ २७ ॥

एलै अत्यंत अंतःकरणियाद उद्धवने. कुतिये मोदलाद तन्न तंगंदरिगू आ तंगंदर पतिगळिगू अवरवरु बेडिद पदार्थगळन्नु (हेण्णुमक्कळिगे) तंदेयु कोट्टंते कोट्टु संतोषबडिसतक्क बहुदानशीलनाद, हागू नम्म कौरवरिगे अत्यंत अंतःकरणियाद. पूज्यनाद. आ वसुदेवनु सौख्यदिंदिरुवनो ? ॥ २७ ॥

कच्चिदरूथाधिपतिर्यदूनां प्रद्युम्न आस्ते सुखमंग वीरः ॥ यं रुक्मिणी भगवतोऽभिलेभे आराध्य विप्रान् स्मरमादिसर्गे ॥ २८ ॥

यदूनां वरूथाधिपतिः सेनापतिः आदिसर्गे पूर्वजन्मनि स्मरं कामं विप्रानाराध्येति कथनं लोकवानेतानां ब्राह्मणप्रसादेन स्वाभीष्टावाप्तिरिति प्रदर्शनपरं नतु स्वार्थपरमित्यभिप्रायः ॥ २८ ॥

हे प्रियनाद उद्धवने. हिंदिन जन्मदल्लि मन्मथनागिद्दवनन्नु ब्राह्मणर आराधनेयिंद. श्रीकृष्णनिंद रुक्मिणियु यावनन्नु पुत्रनंनागि पडेदळो, आ रुक्मिणिय पुत्रनाद. यादवर सेनापतियाद, महावीरनाद प्रद्युम्ननु क्षेमदिंदिरुवनो ? रुक्मिणियु ब्राह्मणरन्नु आराधनमाडि मगनन्नुपडेदळेंब मातु लोकदल्लि स्त्रीयरिगे ब्राह्मणर सेवेयिंद पुत्रोत्पत्तिये मोदलाद अभीष्टगळु दोरेयुववेंदु तोरिसुवदक्के हेळल्पट्टिरुवदे. होर्तु रुक्मिणिय संबंधवाददल्लवु. ॥ २८ ॥

१. वरशब्दः स्वसॄणां ये भर्तारः पतयः तत्परः तत्तर्पणेन स हेति व्याख्येयं । स्वसॄणां तत्पतीनां च तृप्तिं करोतीति भावः । -(या.)

कच्चित्सुखं सात्वतवृष्णिभोजदाशार्हकाणामधिपः स आस्ते ॥ यमभ्यषिंचच्छतपत्रनेत्रो नृपासनार्धिं परिहृत्य दूरात् ॥ २९ ॥

सात्वतामधिपः उग्रसेनः । शतपत्रनेत्रः पुंडरीकाक्षः नृपासनार्धिं सिंहासनं मम नाभूदिति य आधिः मनोगतं दुःखं तं परिहृत्य । " आधिर्मनोवरूथं च आत्मा स्वामीति चोच्यत " इति । पुंस्याधिर्मानसीव्यथेत्यमरः॥ २९ ॥

' कंसवधानंतर यादवर सिंहासनाधिपत्यवु तनगे दोरेयलिल्लवेंब मनोव्यथेयन्नु दूरदल्लिये परित्यागमाडिद (अंदरे आ संबंधवाद दुःखवु श्रीकृष्णनिगे लेशमात्रवु इल्लवेंदु हेळल्पडुवदु.) कमलदंते विशालवाद नेत्रगळुळ्ळ श्रीकृष्णनु यावनन्नु यादवराज्यदल्लि पट्टाभिषेक माडिदनो: सात्वत, वृष्णि. भोज. दशार्हक. एंब अवांतर भेदवुळ्ळ यादवरिगे अधिपतियाद उग्रसेनराजनु सौख्यदिंदिरुवनो ? इल्लि ' आधि ' एंदरे मनसिन व्यथे एदु अर्थ माडबारदु. यावंदरे, श्रीकृष्णनिगे व्यथेयु एंदू इल्लवाद्दरिंद ' आधि ' एंदरे केवल मनःसु एंदु इष्ट अर्थ माडबेकु. आ मनःसु श्रीकृष्णन स्वरूपवेंदु हेळल्पडुत्तदे. ॥ २९ ॥

कच्चिद्धरेः सौम्य सुतः सदृक्ष आम्तेऽग्रणी रथिनां साधु सांबः ॥ असूत यं जांबवती व्रताढ्या देवं गुहं योंऽबिकया धृतोऽग्रे ३०

सदृक्षः पुत्रत्वयोग्यः । दक्षइतिपाठे कर्तव्यत्वेन युगपदनेकेषु कार्येषु प्राप्तेष्वव्यामोहेन क्रमेण कर्ता दक्षइत्यर्थः । अग्रे पूर्वजन्मनि अंबिकया पार्वत्या धृतो गर्भ इतिशेषः ॥ ३० ॥

हे सौम्यनाद उद्धवने. पूर्वजन्मदल्लि पार्वतीदेविय गर्भदल्लि उत्पन्ननाद षण्मुखनेंबवनन्नु बहु व्रतगळन्नु माडि कृष्णपत्नियाद जांबतीयंबवळु याव योग्यनाद पुत्रनन्नु पडेदळो; ' दक्षः ' एंब पाठ विद्दरे माडतक्क अनेक कार्यगळु एक कालक्के बंदोदगिदाग्यू यावकेलसगळू हेच्चुकडिमे यागदंते ह्यागे माडबेकेंब योचने इल्लदे अवुगळ क्रमानुसारवागि आया कार्यगळन्नु माडलु समर्थनाद. रथिकरल्लि श्रेष्ठनाद आ सांबनेंबवनु क्षेमदिंदिरुवनो ? ॥३०॥

क्षेमं स कच्चिद्युयुधान आस्ते यः फाल्गुणाल्लब्धधनूरहस्यः ॥ लेभेऽजसाधोक्षजसेवयैव गतिं तदीया यतिभिर्दुरापां ॥ ३१ ॥

युयुधानः सात्यकिः फाल्गुणादर्जुनात् । अनेन धनुर्वेदज्ञानाधिक्यं भगवत्प्रियतमत्वं च प्रष्टव्यत्वे हेतुरिति सूचयति एवमुत्तरत्राप्यूह्यं ॥ ३१ ॥

यावनु अर्जुननिंद धनुर्विद्येय रहस्यवन्नु संपादिसिदनो, हागू श्रीकृष्णन सेवेयिंदले यतिगळिंदलू दोरेयुवदक्के अशक्यवाद (मोक्षगतियन्नु) आ परमात्मन ज्ञानवन्नु सरियागि संपादिशिदनो. आ ' युयुधानः ' सात्यकियु क्षेमवो ? विदुरनु ई सात्यकियन्नु केळुवदक्के कारणवेनेंदरे इवनल्लि धनुर्विद्येयु अधिकवागिद्दरिंदलू इवनु श्रीकृष्णनिगे प्रियनाद्दरिंदलू इवनल्लि ममतेयिंद केळिदनु इदे प्रकारमुंदादरू अवरवर गुणगळ लोभदिंद प्रश्नमाडिदनेंदु तिळियतक्कदु. ॥ ३१ ॥

कच्चिदबुधः स्वस्त्यनमीव आस्ते श्वफल्कपुत्रो भगवत्प्रपन्नः ॥ यः कृष्णपादांकितमार्गपांसुष्वचेष्टत प्रेमविभिन्नधैर्यः ॥३२॥

अनमीवो निष्पापः श्वफल्कपुत्रोऽक्रूरः प्रेम्णा भक्त्या विभिन्नं नष्टं धैर्यं रजोवेष्टनाहंकाररूपं मनो यस्य स तथा ॥ ३२ ॥

मत्तू यावनु श्रीकृष्णनन्नु करेयुवदक्के गोकुलक्के होगुवाग्ये मार्गदल्लि श्रीकृष्णन पादचिन्हगळु मूडिद धूळिगळल्लि होरळाडिदनो ? ' प्रेमविभिन्नधैर्यः ' हागू श्रीकृष्णनल्लि परम-भक्तियिंद राजदूतनाद नानु ई बीदियल्लिद्द धूळियल्लि ह्यागे होरळाडबेकेंब, रजोगुणदिंद मुच्चिद अहंकारवन्नु बिट्टनो: पापरहितनाद श्रीकृष्णनिगे शरणागतनाद, ज्ञानियाद, श्वफल्कनेंबवन पुत्रनाद अक्रूरनु क्षेमवो ' ॥ ३२ ॥

कच्चिच्छिवं देवकभोजपुत्र्या विष्णुप्रजाया इव देवमातुः ॥ या वै स्वगर्भेण बभार देवं त्रयी यथा यज्ञवितानमर्थं ॥ ३३ ॥

विष्णुः प्रजा पुत्रो यस्याः सा विष्णुप्रजा तस्याः देवकश्चासौ भोजश्च देवकभोजः नाम्ना देवकः कुलेन भोजः तस्य पुत्र्याः देवक्याः देवमातुरदितेरिव विष्णुप्रजाया इति योजना । यज्ञो विष्णुर्वितानो विभूतिः । विष्णुविभूतिरूपमर्थं प्रतिपाद्यं यागलक्षणमर्थं वा । कादाचित्कं देवक्यागर्भधारणं । त्रय्या अर्थधारणं सनातनमतस्तन्निदर्शनं कथं स्यादित्यत उक्तं वा इति दृष्टांतदार्ष्टांतिकयोरेकदेशसाम्येनालं तत्प्रसिद्धेरिति ॥ ३३ ॥

' यज्ञवितानमर्थं ' श्रीविष्णुविन विभूतिरूपार्थवन्नु अथवा तन्निंद हेळतक्क यज्ञलक्षणवाद अर्थवन्नु वेदवु ह्यागे धरिसिरुवदो ? आ प्रकार यावाकेयु श्रीविष्णुविनन्नु गर्भदल्लि धरिसिरुवळो? मत्तू देवतिगळ ताथियाद अदितिदेवियंते श्रीविष्णुवु यावाकेय पुत्रनागि अवतरिसिरुवनो, भोजराजन वंशदल्लि उत्पन्ननाद देवकराजन पुत्रियाद आ देवकीदेवियु क्षेमदिंदिरुवळो ? आदरे, इदरल्लि वेदवु श्रीविष्णुविन विभूतिरूपार्थवन्नु सर्वदा धरिसिरुवदु, ई देवकीयु श्रीविष्णुविनन्नु स्वल्पुकालधरिसिरुवळु, आद्दरिंद आ वेदसाम्यवु देवकीगे ह्यागे एंदरे स्वल्पुमात्र धरिसिरुवदरिंदले साम्यवे होर्तु संपूर्णइरबेकेंदु नियमविल्लवु इष्टरिंदले लोकप्रसिद्धि इरुवदु. ॥ ३३ ॥

अपि स्विदास्ते भगवान्सुखं वो यः सात्वतां कामदुघोऽनिरुद्धः ॥ यमामनंति स्म हि शब्दयोनिं मनोमयं सत्त्वतुरीयमर्थं ॥३४॥

अनिरुद्धो भगवान्वा सुखमास्तेऽपिस्वित् किमित्यन्वयः । अनिरुद्धशब्दार्थं लक्षयति यःसात्वतामिति । न केवलं कामेन निरुणद्धि किंतु तत्तदिष्टदायक आश्रितानामतोऽनिरुद्धः पूज्यश्च । कामदुघइति च्छांदसपदप्रयोगेण सूचितं वैदिकत्वं स्पष्टमाह यमिति । शब्दो वेदो योनिर्ज्ञप्तिकारणं यस्य स तथोक्तस्तं । भद्रं नो अपिवातय मनइत्येवं रूपः शब्दः । ननु हे मनस्त्वं क्रतुं दक्षं दर्शनमुत भद्रं मंगलं विष्णुं प्रतिवातय गमयेति मनोविषयप्रतीतेः कथमस्य अनिरुद्धविषयत्वमत्राह मनोमयमिति । सर्वकार्येषु मनः प्रथयतीति मनोभिमानित्वादनिरुद्धस्य मनःशब्देन स एवोच्यते । " मनसावाअग्रेसंकल्पयति । मनएव मनुष्याणांकारणंबंधमोक्षयोरि-

त्यादः " । नो मनो भद्रं वातयेति मनसः कर्मत्वप्रतीतेः कथमनेन स उच्यते इतिचेत्सत्यं स एव तर्ह्यनिरुद्धः स्यात् । ननु हंत तर्हि मनःशब्दाभिधेयत्वं गतमत्राह सत्वेति । सत्वाच्चित्तात्तुरीयं चतुर्थं मनःशब्दार्थमनिरुद्धमामनंति । " मनोबुद्धिरहंकारश्चित्तमित्यंतरात्मनः । यद्विदुर्ह्यनिरुद्धाख्यं हृषीकाणामधीश्वरं । शारदेंदीवरश्यामं संराध्यं योगिभिः शनैरित्यादिना " । हे मनोनाथानिरुद्ध नो स्माकं क्रतुं संकल्पं दर्शनं ज्ञानं तत्त्वविषयं कुरु । हे भगवन्नो मनो दक्षं समर्थं क्रतुमध्वरं च भद्रं त्वं वा-तय प्रापयेत्युभयथापि हि तद्विषयत्वं संगच्छते । " दक्षौदर्शनपंडिताविति " यादवः । कामदुघत्वादिमाहात्म्यं हरेरितरत्रासंभावितं कथमस्मिन्योज्यतइत्यतो वाह यमिति । यं कामपुत्रं सत्वस्य बलविज्ञानपूर्णस्य चतुर्मूर्तेर्हरेस्तुरीयमर्थमनिरुद्धनामानं हरिमामनंतीत्यतो युक्तं तदावेशित्वात्तादृशमाहात्म्यकथनं । पृथ्वादौ दर्शनादिति ॥३४॥

हे उद्धवने, पूज्यनाद अनिरुद्धनु क्षेमदिंदिरुवनष्टे ? एंदु अन्वयवु ई श्लोकदल्लि हेळतक्क अनिरुद्ध शब्दद अर्थवु यारिगे संबंधिसुवदेंदरे हेळुवरु- (अंदरे कृष्णन पुत्रनाद प्रद्युम्नन, पुत्रनाद अनिरुद्धनिगे, ई एल्ल विशेषणगळेंदल्लवु आ निरुद्धनल्लिद्द अनिरुद्धनेंब परमात्मनिगे ई विशेषणगळु) ' यः सात्वतां कामदुघः ' याव अनिरुद्धनु प्रजरन्नु केवल स्वेच्छे यिंद निरोधमाडुवल्लिंदिष्टे अल्ल तन्नन्नाश्रयमाडिद भक्तजनरिगे अवरवरु अपेक्षिसिद्दन्नु कोडतक्कवनाद्दरिंद पूज्यनेनिसुवनु, ' कामदुघ ' एंब वेददल्लिय शब्दप्रयोगदिंद ई अनिरुद्धनु वेदप्रतिपाद्यनेंदु सूचिसिद अर्थवन्नु स्पष्टवागि हेळुवरु- ' यमामनंति स्म हि शब्दयोनिं ' शब्दस्वरूपवाद वेदवु याव (अनिरुद्ध) नन्नु तिळिसुवदक्के कारणवाद्दु, हागादरे ' भद्रंनो अपिवातय मनः ' एंबदोंदु शब्दस्वरूपवाद वेदवाक्यावित्तुवदु-इदर अर्थमाडिदरे ' हे मनःसे, नीनु यज्ञस्वरूपनाद अथवा कर्तृत्वशीलनाद समर्थनाद हागू परममंगळस्वरूपनाद श्रीविष्णु-विनन्नु हॊंदिसु ' एंदु ई श्रुत्यर्थवु मनः सिन विषयकवादद्देंदु तोरुवदु, हीगिरलु ई शब्दस्वरूपवाद श्रुतियु अनिरुद्धनन्नु ह्यागे हेळुवदेंदरे-अदक्के हेळुवरु- ' मनोमयं ' सकल कार्यगळल्लि एल्लजनर मनःसन्नु हरवुवनु आद्दरिंद मनःसिगे अनिरुद्धनु अभिमानियंदेनिसुवनु, आदकारण मेलेहेळिद श्रुतियल्लिय ' मनः ' शब्ददिंद ' अनिरुद्ध ' ने करिसि-गोळ्ळुवनु याव कार्यक्कागल्लि मोदलु मनःसिनिंद संकल्पमाडुव (योचनेमाडुव) नु. हागू मनुष्यर बंधनक्कू मोक्षक्कू मनोनियामकनाद अनिरुद्धने कारणनेंदु वचनगळिरुत्तवु ओल्लेदु, ' नोमनो भद्रं वातय ' एब श्रुतिगे-नंम मनःसन्नु क्षेमवागुवंते हॊंदिसु एंदु अर्थमाडिदरे, ई अर्थदल्लि मनःसिगे कर्मत्ववु दोरेयुवदु, आ पक्षदल्लि मनः शब्दवाच्यनु अनिरुद्धनेंदु ह्यागे अर्थमाडलागुवदु, एंदरे-निजवु. मनःसे अनिरुद्धनेंदु अर्थमाडिदरे, ई बाधकवु बरबहुदु. हागादरे मनःसे अनिरुद्धनेंदु अर्थमाडदेहोदरे मेलेहेळिद श्रुतियल्लिद्द मनःशब्ददिंद अनिरुद्धनेंदु करिसिगोळ्ळुवदु हेयितल्लवेंदरे-हेळुवरु-' सत्वतुरीयमर्थं ' चित्तदिंद नाल्कनेदाद मनःशब्दार्थवे अनिरुद्धनेंदु पंडितरु तिळियुवरु-(चित्तदिंद मनःसु नाल्कनेदु ह्यागेंदरे-) योगिगळिंद क्रमेण उपास्यनाद शरत्कालद करेकमलदंते श्यामवर्णउळ्ळ सकलेंद्रियगळिगे अधीश्वरनाद अनिरुद्धनेंब भगवद्रूपवु चित्त, अहंकार, बुद्धि, मनःसु एंब ई नाल्कक्के नियामकवादद्देंतलू ई नाल्करिंद करिसिगोळ्ळुवदेंतलू स्मृतिगळल्लि हेळिरुवदु. आदकारण (मेले हेळिद श्रुतियल्लि मनःपदवु कर्तृपरवागिरुवदु) हे मनःसिगे स्वामियाद, अनिरुद्धने नम्म संकल्पवन्नु ज्ञानवन्नु तत्वविषयवागि माडु. (मनःशब्दवन्नु कर्मपरमाडि अर्थवु) हे भगवंतने, नंम मनःसन्नु यावत्तू कार्यनिर्वाहसामर्थ्यवुळ्ळद्दन्नागियू नंम यज्ञवन्नु क्षेमवुळ्ळद्दन्नागियू हॊंदिसु एंदु ई प्रकार मनःशब्दवन्नु कर्तृपरवागि माडिदरू कर्मपरवागि माडिदरू सह मेले हेळिद श्रुतियु अनिरुद्धन परवागि अर्थवागुवदु मेले हेळिद श्रुतियल्लिद्द ' दक्ष ' शब्दक्के ज्ञानपरवागि ह्यागे अर्थवेंदरे-' दक्ष शब्दवु ज्ञानदल्लियू पंडितरल्लियू प्रयोगिसल्पडुवदेंदु यादवकोशदल्लि हेळुवदु ओल्लेदु अपेक्षितवाद्दन्नु कोडोणवे मोदलाद महात्म्येयु श्रीहरिय होरतु एरडनेयवरल्लि

संभविसुवदिल्लवाद्दरिंद अंथमहामहिमेगळु ई प्रद्युम्नन पुत्रनाद अनिरुद्धनल्लि ह्यागे संभविसुववु एंदरे–(मोदल्लु अर्थमाडिद) ' यमामनंति ' एंब पदगळिंदले हेळुवरु– ' सत्वतुरीयमर्थ बलदिज्ञानगळिंद पूर्णनाद श्रीमन्नारायणन; वासुदेव, संकर्षण, प्रद्युम्न, अनिरुद्ध, एंब नाल्कुस्वरूपमूर्तिगळल्लि नाल्कनेयवनाद अनिरुद्धनेंबवने ई प्रद्युम्नपुत्रनाद• अनिरुद्धनाद्दरिंद मेले हेळिद एल्ल महामहिमेगळु इवनल्लि संभविसुवदु, आदरे ई अनिरुद्धनु परमात्मन स्वरूपांशनेंदल्लवु. आ अनिरुद्धनेंब परमात्मन आवेशवु इवनल्लिरुवदरिंद आ मेले हेळिद एल्ल माहात्म्यगळु ई अनिरुद्धनल्लि अन्वयवागुववु. इदे प्रकारवागि पृथुराजने मोदलादवरल्लि व्यवहारवु कंडदे–॥ ३४ ॥

अपि स्विदन्ये च निजात्मदैवमनन्यवृत्त्या समनुव्रता ये ॥ हार्दिक्यसत्यात्मजचारुदेष्णगदादयः स्वस्ति चरंति सौम्य ॥ ३५ ॥

उक्तकुशलप्रश्नं प्रसिद्धाप्रसिद्धेष्वप्यतिदिशति । अपिस्विदिति ॥ ३५ ॥

मेले हेळिद कुशलप्रश्नवन्नु प्रसिद्धराद यादवरल्लियू अप्रसिद्धराद यादवरल्लियू सहतोरिसुवरु (अंदरे, आ विदुरनु सण्णदोड्डु एल्ल यादवरन्नू प्रश्नमाडिदनेंदु हेळुवरु–) हे सौम्यनाद उद्धवने, मत्ते केलवरु. सर्वदा तमगे मुख्यस्वामियाद श्रीकृष्णनन्नु इवने सर्वोत्तमनेंब बुद्धियिंद सर्वदा अनुसरणमाडिकोंडिरतक्क कृतवर्मनु हागू सत्यभामापुत्ररु, चारुदेष्णने मोदलादवरु रुक्मिणीपुत्ररु गदनेंबवनु वसुदेवनपुत्रनु इवरे मोदलादवरु क्षेमदिंद संचार माडुवरो ? ॥ ३५ ॥

अपि स्वदोर्भ्यां विजयाच्युताभ्यां धर्मेण धर्मः परिपाति सेतुं ॥ दुर्योधनोऽतप्यत यत्सभायां साम्राज्यलक्ष्म्या विजयानुवृत्या ३६

धर्मः धर्मपुत्रः विजयाच्युताभ्यां स्वदोर्भ्यां धर्मेण धर्मशास्त्रमनतिक्रम्य धर्मसेतुं परिपाति किमित्यन्वयः । यस्य युधिष्ठिरस्य सभायां दिग्विजयेनानुवृत्तिरनुगमनं यस्याः सा तथा विजयादर्जुनादनुवृत्तिर्यस्याः सा तथा विजयस्य हरेरनुवृत्तिर्यस्याः सा तथा वा श्रीमदादितरेषां धर्मसेतुलंघनं संभाव्यते नास्य तदस्तीति प्रश्नः ततएव धर्मइति प्रायोजि ॥ ३६ ॥

धर्मपुत्रनाद युधिष्ठिरनु तन्न एरडु भुजगळंतिरुव श्रीकृष्णार्जुनरिंद सहितनागि (अवरिंद पालितनागि) धर्मशास्त्रवन्नु मीरदंते धर्ममार्गवन्नु परिपालिसुवनो? याव युधिष्ठिरन सभेयल्लि ' विजयानुवृत्या ' दिग्विजयदल्लि बंदिरुव अथवा अर्जुननिंद तरल्पट्ट अथवा विजयशब्ददिंद करिसिगोळ्ळुव श्रीकृष्णन बेन्हत्तिबंदंथ साम्राज्यलक्ष्मियिंद दुर्योधननु बहुदुःखबट्टनष्टे; आ धर्मराजनु क्षेमवो? बहुशःलोकदल्लि ऐश्वर्यमदर्दिंद जनरु धर्ममर्यादेयन्नु मीरुवदु कंडदे आ प्रकार ई धर्मराजनु अल्लवेंदु तिळिसुवदक्के ' धर्मः ' एंब पदप्रयोगवु, ई प्रकार धर्मपरिपालनेय प्रश्नेयु संभविसुवदु. ॥ ३६ ॥ ३१८

किं वा कृताघेष्वघमत्यमर्षी भीमोऽहिवद्दीर्घतमं व्यमुंचत् ॥ यस्याघ्रिपातं रणभूर्नसेहे मार्गं गदायाश्च रतो विचित्रं ॥ ३७ ॥

भीमः कृताघेषु दुर्योधनादिषु अघं व्यमुंचत्किंवा पुनरपराधबुद्धिं मुक्त्वास्ते किं प्रश्ननिमित्तमाह । अत्यमर्षीति तस्यपराक्रममाह यस्येति अंघ्रिपाते निमित्तमाह मार्गमिति ॥ ३७ ॥

याव महापुरुषनु गदायुद्धवन्नु माडुवाग्ये मंडलाकृतियागि तिरुगुत्त अतिरोषदिंद भूमियन्नु पाददिंद ताडनमाडलु आ रणभूमियु यावन पादताडनेयन्नु सहन माडल्लिल्लवो आ महापराक्रमियाद; सर्पवु तनगे अपकारमाडिद पुरुषनन्नु बहुदिवसद मेलादरू प्रत्यपकारमाडदे बिडुवदिल्लवो, आ प्रकार परशत्रुगळ अपकारसहनमाडद आ भीमसेननु तन्नन्नु बाधेबडिसिद दुर्योधनादिगळन्नु (प्रत्यपकाररुपवागि) बाधेबडिसुवदन्नु बिट्टु कुळितिरुवनो? ह्यागे ई श्लोकदल्लि ' अघं व्यमुंचत् ' एंबदक्के पापवन्नु बिट्टनेंदर्थवल्लवु. ' कृताघेषु= ' अपराधमाडिद दुर्योधनादिगळल्लि ' अघंव्यमुंचत् ' प्रत्यपकारमाडुवदन्नु बिट्टनो[1] एंदु अर्थवु. ॥ ३७ ॥

कच्चिद्यशो धारथ यूथपानां गांडीवधन्वोपरतारिरास्ते[2] ॥ अलक्षितो यच्छरकूटगूढो मायाकिरातो गिरिशस्तुतोष ॥ ३८ ॥ ॥

रथयूथपानां यशो दधातीति यशोधाः यच्छरकूटेन यस्य शरपंजरेण गूढो निलीनः मायययच्छया किरातः गृहीतशबरवेषः ॥ ३८ ॥

रुद्रदेवनु तन्निच्छेयिंद किरातवेषवन्नु धरिसि युद्धमाडबेकेंदु बरलु यावातन बाणसमूहगळिंद मुचल्पट्टु तोरदंतागि यावन मेले बहु तुष्टनादनो, यावनु रथिकर समूहवन्नु पालिसतक्क सेनानायकर यशःसन्नु धरिसिरुवनो आ गांडीवधनुर्धारियाद अर्जुननु एल्ल शत्रुगळन्नु शांतमाडि सौख्यदिंदिरुवनो ? ॥ ३८ ॥

यमावुतस्वित्तनयौ च माद्र्याः पार्थैर्वृतौ पक्ष्मभिरक्षिणीव ॥ रेमात उद्धृत्य मृधे स्वरिक्थं सुधां सुपर्णाविव वज्रिवक्त्रात्[3] ॥ ३९ ॥

पक्ष्मभिरावृते अक्षिणीइव पार्थैरावृतौ रक्षितौ माद्र्यास्तनयौ यमौ वज्रिण इंद्रस्य वक्त्रात्सुपर्णौ गरुडौ सुधामिव मृधे युद्धे स्वर्वैरिमुखात् स्वरिक्थं निजराज्यारव्यं धनमुद्धृत्य रेमाते उतस्वित् किमित्यन्वयः । सुपर्णाविवितिदार्ष्टांतिकापेक्षया द्विवचनं ॥ ३९ ॥

कण्णोविगळिंद एरडु कण्णुगळु संरक्षितवागुवंते कुंतीपुत्रराद धर्मभीमार्जुनरिंद संरक्षितराद माद्रीपुत्रराद अवळिजवळिगळाद, नकुल, सहदेवरु, वज्रवन्नु धरिसिद इंद्रन बायियल्लिद अमृतवन्नु इब्बरु गरुडरु बंदु तेगेदुकोंडंते. शत्रुगळाद दुर्योधनादिगळ बायियल्लि शिकिद्द तम्म राज्यद भागवन्नु रणरंगदल्लि युद्धमाडि तेगेदुकोंडु ईग्ये संतोष बडुत्तिरुवरो ? ई श्लोकदल्लि–इब्बरु गरुडरंते एंब मातु गरुडन दृष्टांतउळ्ळ नकुलसहदेवरु इब्बराद्दरिंद इब्बरु गरुडरंते एंदु हेळल्पट्टदेये, होर्तु गरुडरु इब्बरिरुवरेंदल्लवु ॥ ३९ ॥

१. अघं व्युमुंचदित्यत्र स्वनिष्टं पापं तेष्वमुंचदिन्यथाप्रतीतिवारणायात्र विविक्षितमघशब्दार्थं दर्शयति । अघमिति ॥ पुनरपराधबुद्धिं प्रत्यपकारबुद्धिं । तथा चात्राघशब्दस्य प्रत्यपकारवाचकत्वं । –(या.) २. उपरताः अरयो यस्मात्सः । –(या.) ३. अमृतोपमा । यदि द्वौ गरुडौ इंद्रमुखात् अमृतमानयेतां तर्हि तद्वदित्यर्थः । –(या.)

अहो पृथापि ध्रियतेऽर्भकार्थे राजर्षिवर्येण विनापि तेन ॥ यस्त्वेकवीरोऽतिरथो विजिग्ये धनुर्द्वितीयः ककुभश्चतस्रः ॥ ४० ॥

तेन राजर्षिवर्येण पांडुचक्रवर्तिना विना रहितापि ध्रियते पुत्रैरितिशेषः । राजर्षिवर्यत्वं दर्शयति यस्त्विति । चतस्रः चतसृः ॥ ४० ॥

याव अतिरथिकनाद पांडुराजनु पृथ्वीतलदल्लि ओब्बने वीरनेंदेनिसिगोंडु धनुष्यवे एरडने सहायवुळ्ळवनागि नाल्कूदिक्कुगळन्नु जयिसिदनो, आ राजर्षिगळल्लि श्रेष्ठनाद पांडुराजनिंद हीनळादाम्यू (अवनु मृतनादनंतर) माद्रीदेवियंते सहगमनमाडदे याव कुंतीदेवीयादरू मक्कळु सण्णवारिरुवरेंदु आ मक्कळ सलुवागिये प्राणधारणमाडिदळे होर्तु तानु भोगपड बेकेंदल्ल; आ कुंतीयु मक्कळिंद रक्षितळागिरुवळो? ॥ ४० ॥

सौम्यानुशोचेतमधःपतंतं भ्रात्रे परेताय विदुद्रुहे यः ॥ निर्यापितो येन सुहृत्स्वपुर्या अहं स्वपुत्रान् समनुव्रतेन ॥ ४१ ॥

परेताय मृताय भ्रात्रे पांडवे क्रुधद्रुहेर्ष्यासूयार्थानां यंप्रतिकोपइति चतुर्थी सुहृत्प्रत्युपकारकर्ता ॥ ४१ ॥

(ई प्रकार विदुरनु तन्न यल्लबांधवर क्षेमसमाचारवन्नु विचारिसुत्त धृतराष्ट्रराजनु स्मरणिगे बरलु अवनु कुशलप्रश्नकें योग्यनल्लवु, अवनन्नु स्मरिसिदाक्षणवे शोकवागुवदु, एंब अभिप्रायदिंद केळुवनु) एलै, सोमप्राशनक्के योग्यनाद उद्धवने, तन्न मक्कळन्नु अनुसरिसिरतक्क याव धृतराष्ट्रराजनिंद प्रत्युपकारमाडतक्क अंतःकरणियाद नानु हस्तिनापुरदिंद होरगे हाकल्पट्टेनो, हागू तन्न तम्मनाद पांडुराजनु मृतनागलु अवन मक्कळमेले यावनु विशेषवागि द्रोहमाडिदनो, नरकदल्लि बीळतक्क आ धृतराष्ट्रराजन विषयवागि बहु शोकवागुवदु, क्रुध्, द्रुह्, ईर्षा, असूया ई धातुगळ योगवागलु कर्मपदवु चतुर्थ्यंतवन्नु होंदुवदु एंब नियमानुसारवागि इल्लि द्रुह् एंब धातुयोगवाद्दरिंद ' भ्रात्र ' शब्दवु चतुर्थ्यंतवन्नु होंदितु. ॥ ४१ ॥

सोहं हरेर्मर्त्यविडंबनेन दृशो नृणां भावयतो विधातुः ॥ नान्योपलक्ष्यः पदवीं प्रसादाच्चरामि पश्यन् गतविस्मयोऽत्र ॥ ४२ ॥

विधातुः कृष्णस्य पदवीं निवृत्तिमार्गं चरामि पश्यन् संसारिणां क्लेशमितिशेषः ॥ ४२ ॥

धृतराष्ट्रनिंद होरगे हाकिसिगोळल्पट्ट आ नानु (विदुरनु)–भूभारहरणार्थवागि अवतारमाडि, मनुष्यरंने नटनेमाडुत जनरिगे इवनु सर्वोत्तमनाद श्रीहरियंदु तोरगोडदंतिद्द जगत्पालकनाद श्रीकृष्णन परमानुग्रहदिंद आ धृतराष्ट्रने मोदलादवरु श्रीकृष्णनु मनुष्यनेंब बुद्धियुळ्ळवरागि पापभागिगळागुवरंदु तिळिदु ई विषयक्के आश्चर्यपडदे. ओब्बरिगू तोरगोडदंते तिरुगुवेनु अथवा संसारिजनगळ क्लेशवन्नु नोडुत्त निवृत्तिमार्गवन्नाश्रयिसिगोंडु तिरुगुवेनु ॥ ४२ ॥

१. ध्रियते प्राणैरितिशेषः । जीवितवर्तीतियावत । नचात्याश्चर्यं । यतो अर्भकाणां पुत्राणां अर्थे ध्रियते न भोगार्थं । यद्वा ध्रियते पुत्रैरितिशेषः । तेन विनापि यार्ऽभकार्थएवासीत् । न माद्रीवत् सहगमनं कृतवतीत्यर्थः । –(**या.**) २. धृतराष्ट्रस्तु न कुशलप्रश्नयोग्यः किंतु शोच्यएव यतोऽधःपतनसाधनपापकारीत्याह ॥ सौम्येति ॥ धृतराष्ट्रं जीवंतमनुशोचामि । –(**या.**)

नूनं नृपाणां त्रिमदोत्पथानां महीं मुहुश्चालयतां चमूभिः ॥ वधात्प्रपन्नार्तिजिहीर्षयेशो ह्युपेक्षताहं भगवान्कुरूणां ॥ ४३ ॥

ननु कंसादिवधवत्कुरूणां हननं झटिति किमिति न कृतं न कारितंचेत्याशंक्य प्रयोजनांतरसद्भावादुपेक्षितमित्याशयेनाह नूनमिति । भगवान्कुरूणामघमपराधमुपेक्षित नूनमुपेक्षितवानिति तर्कयामि "तर्कनिश्चययोर्नूनमितियादवः" । तद्धननासामर्थ्यान्नेत्यत उक्तं ईशोहीति तर्हि किन्निमित्तमितित्राह । नृपाणामिति त्रिमदाद्विद्याधनाभिजननिमित्तान्मदादुत्पथानां संतं पंथानमपहाय वर्तमानानां चमूभिरनेकाक्षौहिणीगणिताभिर्मुहुर्मही चालयतां नृपाणां कंसादीनां वधाद्धेतोः तद्वधप्राथम्येपीदं निमित्तमित्याह प्रपन्नेति । प्रपन्नानां देवावताराणां वसुदेवादीनामार्तिजिहीर्षयाऽसह्यदुःखहरणेच्छया कारणेन अनेन हरेः प्रवृत्तिर्भक्ताभीष्टानुसारिणीति दर्शितं भवति ॥ ४३ ॥

ओळ्ळेदु, श्रीहरियु कंसवधेयन्नु माडिदंते पूर्वदल्लिये तीव्रदिंद कौरवर वधेयन्नु याकेमाडलिल्ल ? अथवा एरडनेयवर कडिंदादरू माडिसलिल्ल ? याकेंदरे एरडने प्रयोजनविद्दरिंद आ कौरवरन्नु उपेक्षेमाडिदनेंदु हेळुवरु- (विदुरनु अन्नुवनु) श्रीकृष्णनु कौरवरु माडिद अपराधवन्नु निश्चयवागि उपेक्षेमाडिरुवनेंदु नानु तर्कमाडुवेनु ' नूनं ' एंबदु तर्कदल्लियू निश्चयदल्लियू प्रयोगिसुवरेंदु कोशवु हेळुवदु. ' आ कौरवर वध माडुवदु, श्रीकृष्णनिगे अशक्यवादकारण बिट्टिद्दनेंदु तिळियतक्कद्दल्ल याकेंदरे ई कृष्णनु महासमर्थनु, हागादरे आ कौरवरन्नु, इष्टु दिवस कोल्लदे बिडुवदक्के कारणवेनेंदरे हेळुवरु - विद्यामद-द्रव्यमद-दोड्डवंशदल्लि हुट्टिरुवंवेंबमद ई मूरु मदगळिंद सज्जनर हादियन्नु बिट्टु अमार्गदल्लिद्द अनेक अक्षौहिणीसैन्यकट्टिगोंडु भूदेवियन्नु व्याकुलमाडतक्क कंसनेमोदलाद राजर वधेयन्नु, माडुवदकिंतलू आ दुष्ट कौरवर वधेयु मोदले माडतक्कद्दादरू इदु ओंदु निमित्तविरुवदेंदु हेळुवरु– देवांशराद वसुदेवने मोदलादवरु तनगे (श्रीकृष्णनिगे) शरणागतरागिद्दरिंद, आ शरणुबंद जनर दुःखविडिसुवदे, श्रीहरिगे मुख्य कार्यवाद्दरिंद, स्वल्पुकाल आ कौरवरन्नु उपेक्षेमाडिद्दनु. इदरिंद श्रीहरियु एनादरू कार्यमाडबेकादरे भक्तर अभीष्टानुसारवागि माडुवनेंदु सिद्धवागुवदु. ॥ ४३ ॥

अजस्य जन्मोत्पथनाशनाय कर्माण्यकर्तुर्ग्रहणाय पुंसां ॥ नत्वन्यथा कोऽर्हति देहयोगं परो गुणानामुतकर्मतंत्रं ॥ ४४ ॥

भक्ताभीष्टं च भूभारायितदुष्टजननिधनं यत्तदेवावतारप्रयोजनामिति भावेनाह अजस्येति । अजस्य विष्णोर्जन्मावतारः उत्पथनाशनाय कंसादिनिधनाय प्रयोजनांतरंचास्तीत्याह कर्माणीति । फलमननुसंधायाकर्तुः स्वतएव सृष्ट्यादेः कर्तुर्हरेः कर्माणि जगत्सर्जनादिलक्षणानि पुंसां शरणागतानां ग्रहणाय श्रवणमननादिरूपजिज्ञासायै । " हरिःकर्ताप्यकर्तेति फलाभावेन भण्यत " इति । बालवल्लीलार्थं देहं गृह्णातीति किं न स्यादितीमं पक्षमाक्षिपति नत्विति । अन्यथा भक्तजनग्रहणादिकमंतरेण स्वप्रयोजनमपेक्ष्य नैव कुतः असंभवात् तथाहि । कः पुरुषः शुक्रशोणितसंपृक्तदेहयोगं प्रत्यर्हति न कोप्यर्हति । हरिरर्हति नेत्याह । परइति। गुणानां सकाशात्परस्तदतीतत्वेनोत्तमः गुणसंसर्गोपि नास्तीति । गुणानामितिषष्ठी तद्देहइतिहरेर्देहित्वप्रतीतेः कोर्हतीति कथमाक्षिप्यते इत्यत उक्तं कर्मेति । मनुष्यादिदेहयो-

गाद्यसंभवेपि देवादिशरीरयोगः स्याद्वेत्यत उक्तं उतेति । उताप्यर्थविकल्पयोरिति । विकल्पोपि न घटतइत्यर्थः । " न देहयोगादिजनिर्विष्णोर्व्यक्तिर्जनिःस्मृतेति " विशेषवचनाच्च देहयोगांगीकारपक्षो गर्हित इति भावः ॥४४॥

भक्तजनर अभीष्टेयादरू भूमिगे भारागिरुव दुष्टजनर वधेये. (मत्तोंदल्लवु) आ दुष्टजनर संहारवे श्रीहरियु अवतारमाडुवदक्के प्रयोजनवेंब अभिप्रायदिंद हेळुवरु– ' **अजस्य** ' जननरहितनाद विष्णुविन अवतारवु उन्मार्गस्थराद कंसादिगळ वधदगोस्करवे, तथापि मत्तू ओंदु प्रयोजनविरुवदेंदु हेळुवरु– ' अकर्तुः '=फलापेक्षेइल्लदे केलसमाडतक्कवनाद्दरिंद ' **अकर्तृ** ' वेनिसिगोळ्ळुव, सहजवागिये सृष्टिमोदलाद कार्यगळन्नु माडतक्क श्रीहरिय सृष्टिमोदलाद कार्यगळु. शरणागतराद जनरिगे ' ग्रहणाय ' श्रवणमननमोदलाद तत्वविचारमाडुवदक्कागिये ' श्रीहरियु सर्वकर्तृवादरू फलद अपेक्षे इल्लदे माडुववनाद्दरिंद अवनु अकर्तृवेनिसुवनेंदु प्रमाणविरुवदु. ' ओळ्ळेदु, ई श्रीहरियु सण्णहुडुगरंते आटगळन्नाडुवदक्के शरीरवन्नु स्वीकारेसुवनेंदु याके आगबारदु ? एंब ई पक्षवन्नु आक्षेप माडलु हागल्ल ' **नत्वन्यथा** ' तन्न भक्तजनरिगे तत्वविचारद सलुवागिये परमात्मनु अवतरिसुवने. होर्तु तन्न प्रयोजनक्कागि अल्ल. याकल्लवेंदरे आ मातु असंभववे सरि; ह्यागेंदरे याव उत्तम पुरुषनु शुक्रशोणित (पुरुषन वीर्य स्त्रीयळ रक्त) संबंधवुळ्ळ मनुष्यदेहवन्नु होंदुवदक्के योग्यनादानु ? याव श्रेष्ठपुरुषनू आगुवादिल्ल. श्रीहरियु अदक्के योग्यनागुवनेंदरे, हागल्लवेंदु हेळुवरु– ' परः ' आ परमात्मनु सत्वरजस्तमोगुणगळन्नु मीरिदवनु. अंदरे आ परमात्मनिगे सत्वादिगुणगळसंबंधसहवागि इल्लवु एंदु हेळुवदक्के ' गुणानां ' एंदु षष्ठीप्रयोगमाडिरुवरु. श्रीहरिगे देहविरुवदेंदु तोरुत्तिरलु याव उत्तम पुरुषनु देहसंबंधवागुवदक्के योग्यनागुवनेंदु ह्यागे आक्षेपमाडुल्पडुवदेंदरे ' कर्मेति ' मनुष्यदेहवु कर्मदिंद बरुवदु. इवनु कर्मवन्नु माडुववनल्लवेंदरे मनुष्यमोदलाद देहवु इवनिगे बारदिद्दरू देवतिगळ देहवु बरलि, एंदरे याव देहवु बरुवंते इल्लवेंदु ' उत ' एंबदु हेळुवदु. ' **देहप्राप्तियिंद परमात्मन अवतारवेंदल्लवु, अवन स्वरूपवन्नु प्रकटमाडि तोरिसुवदे, अवन अवतारवु** ' एंदु दोड्ड प्रमाणविरलु श्रीहरिय अवतारूपगळिगे भौतिकदेहवन्नंगीकार माडुवदु बहळ निंद्यवादद्दु. ॥ ४४ ॥

तस्य प्रपन्नाखिललोकपानामवस्थितानामनुशासने स्वे ॥ अर्थाय जातस्य यदुष्वजस्य वार्तां सखे कीर्तय तीर्थकीर्तेः ॥ ४५ ॥
इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे विदुरोद्धवसंवादे प्रथमोऽध्यायः ॥ १ ॥ ॥ ॥ ॥

किं बहुनोक्तेनेति विदुरः स्वाभीष्टं वक्ति तस्येति ॥ ४५ ॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे विजयध्वजटीकायां प्रथमोऽध्यायः ॥ १ ॥

हेच्चिन मातिनिंदेनु ? विदुरनु तनगे बेकागिरुवदन्नु केळिकोळ्ळुवनु–एलै परममित्रनाद उद्धवने, तन्न (श्रीहरिय) आज्ञेगे वळगागिद्दु तनगे शरणागतराद यावत्तू लोकपालकर प्रार्थनानुसारवागि अवर कार्यवन्नु साधिसिकोडुवदक्के यदुकुलदल्लि अवतारमाडिद पवित्रकीर्तियुळ्ळ श्रीहरिय वार्तेयन्नु वर्णने माडु (हेळु) ॥ ४५ ॥

हीगे श्रीमद्भागवत मूलक्क विजयध्वजव्याख्यानक्क सरियागि अलंकरिसुव ' सुखार्थबोधनी ' एंब प्राकृतटिप्पणेयु कूसनूर श्रीनिवासनिंद विरचितवागि तृतीयस्कंधद मोदलने अध्यायवु मुगिदितु ॥ श्रीकृष्णार्पणमस्तु ॥

श्रीशुक उवाच ॥ इति भागवतः पृष्टः क्षत्रा वार्तां प्रियाश्रयां ॥ प्रतिवक्तुं न चोत्सेहे औत्कंठ्यात्स्मारितेश्वरः ॥ १ ॥

अत्राध्यायत्रये उद्धवेन विदुरप्रश्नप्रतिवचनाय हरेः श्रीकृष्णावतारसंक्षेपकथा निरूप्यते । तत्र प्रथमत उद्धवस्य भगवति भक्त्युद्रेकलक्षणं शुकः परीक्षितं कथयतीत्याह । सूतः शौनकाय । इतीति । आत्मादेरपि प्रियः प्रेष्ठो हरिराश्रयो यस्याः सा तथा तां वार्तां कथां औत्कंठ्यं चित्तविद्रवणहेतुभूतौत्सुक्यं तस्माद्गद्गदकंठत्वादिविशेषः । स्मारितेश्वरः प्रसंगविशेषादितिशेषः ॥ १ ॥

ई अध्यायत्रयदल्लि विदुरन प्रश्नगळिगे उत्तरवन्नु हेळुवदक्के उद्धवनिंद श्रीहरिय कृष्णावतारकथेयु संक्षेपदिंद हेळल्पडुवदु. आ मोदलु उद्धवनिगे श्रीकृष्णनल्लि अतिशयवागिरुव भक्तिय लक्षणवन्नु श्रीशुकाचार्यरु परीक्षितराजनिगे हेळुवरेंदु सूतपुराणिकनु शौनकरिगे हेळुवनु–(श्रीशुकाचार्यरु हेळुवरु)–ई (हिंदिन अध्यायदल्लि) हेळिदंते भगवद्भक्तनाद उद्धवनु विदुरनिंद तन्न प्राणमोदलादवुगळिगिंत अतिप्रियनाद श्रीहरिय संबंधवाद कथेय सलुवागि प्रश्नमाडिसिगोळ्ल्पट्ट, मनःसु करगुवदक्के कारणवाद भक्तिय उत्साहदिंद कुत्तिगेय शिरवुब्बि (विदुरन वचनचातुर्यदिंद श्रीहरिय स्मरणेयागि असंप्रज्ञात समाधियिंद श्रीहरियन्नु नोडुत्तिरलु) ओंदु प्रसंगनिमित्तदिंद श्रीहरियस्मरणेयागलु आ विदुरन मातिगे उत्तर कोडबेकेंब प्रयत्नवन्नु माडलिल्लवु. ॥ १ ॥

यः पंचहायनो मात्रा प्रातराशाय याचितः ॥ नैच्छत्तद्रचयन्यस्य सपर्यां बाललीलया[2] ॥ २ ॥
स कथं सेवया तस्य कालेन जरसं गतः ॥ पृष्टो वार्तां प्रतिब्रूयाद्भर्तुः पादावनुस्मरन् ॥ ३ ॥

एकांतभक्तानामेतद्युक्तमिति भावेनाह यइति । पंचहायनाः वत्सरा यस्य स तथा प्रातराशाय प्रातर्भोजनाय तत् प्रातर्भोजनं सपर्यां पूजां रचयन् प्रपंचयन् ॥ २ ॥ तस्य हरेः जरसं जरां वार्धकं वयः ॥ ३ ॥

एकांतभक्तरिगे, ई स्वभाववु उचितवादद्देंब अभिप्रायदिंद हेळुवरु–याव उद्धवनु (५) ऐदु वरुषद बालकनिदाग्ये अवन तायियु प्रातःकालद भोजनक्के (अवनन्नु) करेयलु, आग्ये हुडुगाटिगेयिंदादरू श्रीकृष्णन पूजासाहित्यवन्नु मंडिसिद्दरिंद आ भोजनवन्नु (सह) अपेक्षिसलिल्लवु, (हीगे हेळवदरिंद ई उद्धवनु सण्णहुडुगनिंदाग्ये आटगळन्नाडुवदूसह श्रीकृष्णन पूजास्वरूपवागिये इर्तेंदु सूचितवागुवदु.) ई प्रकार बाल्यारभ्य बहुकालवागि आ श्रीकृष्णन सेवेयिंद मुप्पुहोंदिद आ उद्धवनु तन्न स्वामियाद श्रीकृष्णन कुशलवार्तेय सलुवागि (विदुरनिंद) प्रश्नमाडिसिगोळपट्ट आ कृष्णपादगळन्नु स्मरिसुत्त (आ कृष्णनुपरंधामक्के होदनेंदु) ह्यागे उत्तरवन्नु हेळ्यानु ? ॥ २ ॥ ३ ॥

---

१. नैव यत्नं कृतवान्। औत्कंठ्यात् भक्त्युद्रेकात्। स्मारितः विदुरवचनचातुर्येणासंप्रज्ञातसमाधिविषयीकृतः ईश्वरो येन स तथा । –(**या.**) २. बाललीलयेत्यनेन बाल्यावस्थापन्नस्य क्रीडारूपोपि व्यापारः एतादृशइति सूचयति । –(**या.**)

समुहूर्तमभूत्तूष्णीं कृष्णांघ्रिसुधया भृशं ॥ तीव्रेण भक्तियोगेन निमग्नः साधु निर्वृतः ॥ ४ ॥

कृष्णांघ्रिस्मरणसुधया तृतीया सप्तम्यर्थे तस्यां निमग्नः निर्वृतः परमानंदं प्राप्तः ॥ ४ ॥

आ मेले आ उद्धवनु बहुवेगवुळ्ळ भक्तियोगदिंद श्रीकृष्णनपादस्मरणेयंब अमृतदल्लि अत्यंतवागि मुळुगि स्वरूपानंदवन्नु होंदि एरडु गळिगेवरेगे सुम्मनादनु. ' सुधया ' एंब तृतिया विभक्तियु सप्तमी अर्थवन्नु हेळुवदु. ॥ ४ ॥

पुलकोद्भिन्नसर्वांगो मुंचन्मीलद्दृशाश्रु सः ॥ पूर्णार्थो लक्षितस्तेन स्नेहप्रसरसंप्लुतः ॥ ५ ॥

उद्धवस्यैवंविधामवस्थां पश्यतो विदुरस्य मनसि किं प्रत्यभादत्राह पुलकेति । तेन विदुरेण पुलको रोमांचः तेनोद्भिन्नमंकुरितं सर्वांगं यस्य सः मीलद्दृशा अर्धोन्मीलितनेत्रेणाश्रु बाष्पकलां मुंचन्स्नेहप्रसरसंप्लुतः भक्तिनदीप्रवाहमग्नः स उद्धवः पूर्णार्थः कृतकृत्यो लक्षितो लक्षणतो ज्ञात इत्यन्वयः ॥ ५ ॥

ई प्रकार उद्धवन अवस्थे (स्थिति यन्नु नोडलु विदुरन मनसिनल्लि (इवन विषयक्के) एनु तोरितु, एंदरे हेळुवरु–(तनगे प्रत्युत्तरवन्नु कोडलिल्लवेंदु उद्धवन मेले विदुरनु शिष्टादनेनु ? एंदरे हेळुवरु)–मैमेले रोमांचगळुब्बि नेट्टगे अंकुरगळंते कूदलुगळु. एद्दुनिंतिद्दु; कण्णु पिळकिसि आनंदबाष्पगळन्नु सुरिसुत्त भक्तिएंबनदीप्रवाहदल्लि मुळुगिद्दरिंद ई उद्धवनु कृतकृत्यनेंदु इवन लक्षणानुसारवागि आ विदुरनिंद तिळियल्पट्टनु. ॥ ५ ॥

शनकैर्भगवल्लोकान्नृलोकं पुनरागतः ॥ विमृज्य नेत्रे विदुरं प्रत्याहोद्धव उत्स्मयन् ॥ ६ ॥

ततःपरं विदुरस्य काऽभीष्टसिद्धिरभूदित्याशंक्य तत्प्रश्नप्रवचनोपक्रमसिद्धिरित्याह शनकैरिति । भगवल्लोकादसंप्रज्ञातावस्थालक्षणान्नृलोकं मनुष्यदेहाभिमानमागतः उत्स्मयन् उत्कृष्टं मंदस्मितं कुर्वन् ॥ ६ ॥

आ नंतर विदुरनिगे एनु अभीष्टसिद्धियादिंतेंदरे तन्न प्रश्नगळिगे उत्तरवु हेळलारंभिसितु एंदु हेळुवरु–आ मेले उद्धवनु असंप्रज्ञातसमाधियिंद (मै मेले स्मृतिइल्लदे भगवद्रूपवन्नु ध्यानमाडतक्क स्थितियिंद) मनुष्यदेहाभिमानवन्नु होंदि, उत्कृष्टवागि मंदहासवन्नु माडुत्त कण्णीरुगळन्नु वरिसुत्त विदुरनिगे उत्तरहेळलारंभिसिदनु ॥ ६ ॥

उद्धव उवाच । कृष्णद्युमणि निम्लोचे गीर्णेष्वजगरेण ह ॥ किंनु नः कुशलं ब्रूयां गतश्रीषु यदुष्वहं ॥ ७ ॥

कीदृशीसेत्यत्राह कृष्णेति । कृष्णएव द्युमणिः सूर्यस्तस्य निम्लोचे अस्तंगतेसति अतएव गतश्रीषु नष्टालोकेषु अतएव कालाजगरेण गीर्णेषु ग्रस्तेषु अस्तं-

गतेषु विनाशं यातेषु नः संबंधिषु यदुषु किंनु कुशलं ब्रूयां । हेत्यनेन कुशलप्रश्नप्रवचनप्रत्यारंभो न कर्तव्यो विप्रशापेन सन्निकृष्टनाशस्य प्रसिद्धत्वादिति दर्शयति " प्रत्यारंभे प्रसिद्धे हेति " यादवः ॥ ७ ॥

उद्धवनु उत्तर हेळुवदक्के प्रारंभिसिद सिद्धियु याव स्वरूपद्दायितेंदरे हेळुवरु–(उद्धवनु अन्नुवनु) हे विदुरने श्रीकृष्णनेंब सूर्यनु अस्तंगतनागुत्तिरलु आदकारणवे बेळकु इल्लदंतागि (कांतिहीनरागि) कालवेंब अजगरसर्पन बायियल्लि शिक्कु विनाशवन्नु होंदिद नंम संबंधिगळाद यादवर कुशलवार्तेयन्नु नानु एनेंदु हेळलि ? ई श्लोकदल्लि ' ह ' एंबदरिंद ब्राह्मणर शापानुसारवागि यादवर नाशकालवु समीपक्के बंदद्दु प्रसिद्धि इरुवदरिंद आ यादवर संबंधवाद कुशलवार्तेयन्नु इन्नु मेले केळलारंभिसबारदेंदु हेळुवदु. तिरुगि प्रारंभिसुवदक्कू प्रसिद्धियल्लियू ' ह ' एंबदन्नु उपयोगिसुवरेंदु यादवकोशवु हेळुवदु. ॥ ७ ॥

दुर्भगो बत लोकोऽयं यदवो नितरामपि ॥ ये संवसंतो न विदुर्हरिं मीना (इवांभसि) इवोडुपं ॥ ८ ॥

दुष्टनिधनव्याजेन ज्ञानोपदेशार्थमवतीर्णस्य कृष्णस्य ज्ञानेन नाशं यास्यतामपि यदूनां त्रिलोक्याश्च श्रेयःसिद्धिःस्यादित्याशंक्य ज्ञानेसति श्रेयस्तदेव नास्तीत्यनुतपन्नुद्धव इत्याह दुर्भग इति । लोको जनः बतशब्दः खेदवचनः हरिं न विदुर्दुस्तरसंसारसंहारकत्वेनेति शेषः ॥ ८ ॥

दुष्टरन्नु नाशमाडुव निमित्तदिंद ज्ञानोपदेशमाडुवदक्के अवतार माडिद श्रीकृष्णन ज्ञानदिंद (ज्ञानवुळ्ळ वराद्दरिंद) यादवरु नाशहोंदतक्कवरादाग्यू अवरिगे, (यादवरिगे) मूरु लोकदकिंतलू अधिकवागि श्रेयःमु दोरेयबहुदु, एंदंदरे– श्रीकृष्णन संबंधवाद ज्ञानविद्दरे आ श्रेयःमु दोरेयतक्कदे सरि. आ यादवरिगे आ (कृष्णन) ज्ञानवे इल्लवल्लवेंदु बहु संतापउळ्ळवनागि उद्धवनु माताडुवनु– हे विदुरने. ई भूलोकदल्लिद्द जनरे दुर्दैविगळु, अदरल्लियू (नंम) यादवरंतू अतिदुर्दैविगळु; याकेंदरे समुद्रदल्लिरतक्क मीनगळु मत्स्यरूपियाद परमात्मनन्नु इवनु संसारनाशमाडतक्क श्रीहरियु एंबदन्नु ब्यागे तिळियलिल्लवो, हागे तंम वंशदल्लि अवतरिसिद श्रीकृष्णनन्नु बहुदिवस सहवासमाडिदाग्यू इवनु संसारबिडिसतक्क श्रीहरियंबदन्नु यादवरु तिळकोळ्ळलिल्लवु. ' मीना इवोडुपं ' एंब पाठविद्दल्लि, ' उडुपं ' नीरिनल्लि बिद्दिरुव चंद्रन प्रतिबिंबवन्नु कंडु मीनगळु इदु चंद्रन प्रतिबिंबवेंदु ब्यागे तिळियुवदिल्लवो, हागे यादवरु श्रीकृष्णनन्नु सर्वोत्तमनाद श्रीहरियंदु (साकल्येन) तिळियलिल्लवु. (आदकारण ई यादवरु बदळ दुर्दैविगळु !) ॥ ८ ॥

इंगितज्ञाः पुरप्रौढा एकारामाश्च सात्वताः ॥ सात्वतामृषभं सर्वे भूतावासममंसत ॥ ९ ॥

न केवलमज्ञा मिथ्याज्ञानिनोपि जाता इत्याह इंगितज्ञा इति । अत्रेंगितशब्दो द्विरावृत्त्या व्याख्यातव्यः । इगिचेष्टायामितिधातुः । लोकस्येंगितेन चेष्टिते-

१. यथा अंभसि समुद्रे विद्यमानाः मीनाः हरिं मत्स्यरूपं हरिरयमिति न जानंति तथैवेति । मीनाइवोडुपमितिपाठे । मीना यथा जले प्रतिबिंबितं उडुपं चंद्रं चंद्रप्रतिबिंबितत्वेन न जानंतीति व्याख्येयं । –(या.) २. पुरु अतिशयेन प्रौढाः निपुणाः पुरप्रौढाइतिपाठे पुरे पट्टणे वासेन प्रौढाइत्यर्थः । –(या.)

नैंगितं हृद्गतभावं जानंतीतींगितज्ञाः । "इंगितंहृद्गतोभाव इंगितं चांगचेष्टित" मित्यभिधानं । पुरप्रौढाः शरीराभिमानिनः गृहस्वामिनो वा एकागमाः केवलक्रीडालोलाः । "एकमुख्यान्यकेवला" इति च एवंविधाः सर्वे सात्वताः यादवाः सात्वतां ब्रह्मादिभागवतानामृषभं स्वामिनं प्राकृतप्रधानपुरुषवत् भूतावासं कतिपयजनावासहेतुभूतममंसतामन्यंतेत्यन्वयः । एकोदेव इति प्रतिपाद्यत्वेन प्रसिद्धं भूतावासं अविशेषेण सकलजगन्निवासं भगवंतं सात्वतां यादवानामेव ऋषभममंसतेति वा ९

(हागादरे ई यादवरू अज्ञानिगळू मिथ्याज्ञानिगळू आगिरुवहुदेंदरे हागल्ल) ई यादवरु केवल अज्ञानिगळू अल्ल. मिथ्याज्ञानिगळू आगिद्दिल्लवेंदु हेळुवनु– ई श्लोकदल्लि 'इंगित' एंब शब्दवन्नु एरडावर्ती अर्थ माडुवेकु. इंगित इदरल्लि 'इगि' एंब धातुवु चेष्टामाडु एंब अर्थदल्लि उपयोगिसल्पडुवदु. इंगितज्ञाः= जनर कृतियमोलिंद अवर मनसिनल्लिद्द अभिप्रायवन्नु (यादवरु) तिळकोळ्ळुवरु. इंगितं एंदरे अंगचेष्टेयु (कैकालुगळिंद केलसमाडोण) मत्तू मनोगत अभिप्रायवु. ई एरडु अर्थगळागुववेंदु कोशदल्लि हेळुवदु. हागू आ यादवरु, 'पुरप्रौढाः' शरीराभिमानवळ्ळवरु अथवा गृहकृत्यगळन्नु तंम अधीनदल्लिट्टुगोंडवरु (अथवा अत्यंत प्रौढगागि-निपुणरागिद्दवरु. अथवा पट्टणवासिगळाद्दरिंद अतिनिपुणरादवरु.) हागू अवरु केवल आटगळल्लिये मग्नरादवरु. अथवा एल्लरू ओंदे स्थानदल्लि क्रीडिसुवरु) ई प्रकार उत्तम गुणगळुळ्ळ एल्ल यादवरू 'सात्वतामृषभं' ब्रह्मादिदेवतिगळिगे स्वामियाद श्रीकृष्णनन्नु प्राकृतपुरुषदल्लि श्रेष्ठपुरुषनंते 'भूतावासं' केलवु जनरिगे आश्रयनादवनेंदु तिळिदरु. अथवा ओव्वने सर्वश्रेष्ठनेंदु वेदगळल्लि प्रसिद्धनागि सकल जगत्तिनल्लियू तनगिंत श्रेष्ठरिल्लदंते सर्वांतर्यामियाद श्रीकृष्णनन्नु यादवरल्लि मात्र श्रेष्ठनेंदु तिळिदरु. ॥ ९ ॥

देवस्य मायया स्पृष्टा ये चान्ये असदाश्रयाः ॥ भ्राम्यते धीर्न तद्वाक्यैरात्मन्युप्ता (त्मनां हरौ) मलात्मनां ॥ १० ॥

प्रसंगाज्ज्ञानिलक्षणमाह देवस्येति । देवस्य हरेर्मायया बंधकशक्त्या स्पृष्टा उप (लिप्त) तप्तज्ञानत्वादन्यथाज्ञानिनो ये चान्ये असतां जनानाममंगलानां विषयाणां वाश्रयास्तद्वाक्यैस्तेषां नृणां वाक्यैरात्मनि परमात्मन्युप्तामलात्मनां संततन्यस्तनिर्दोषमनसां ज्ञानिनां धीर्न भ्राम्यते । नान्यथाभवतीत्यनेन सम्यक् ज्ञानित्वमेवंविधमित्युक्तं भवति । हरावित्यक्षरद्वयेन ओहाङ्गतावितिहेतिज्ञानं रमुक्रीडायामितिरीत्यतिशयितसुखमिति सच्चिदानंदलक्षणो विष्णुरुच्यत इति ज्ञातव्यं ॥ १० ॥

प्रसंगानुसारवागि ज्ञानिगळ लक्षणवन्नु हेळुवरु– परमात्मन बंधकशक्तियिद ज्ञानवु मुच्चिगोंडद्दरिंद विपरीत ज्ञानिगळागि यारिरुवरो, आ असज्जनर अथवा अमंगळविषयगळ सहवासदिंद हागू आ जनर वाक्यगळिंद परमात्मनल्लि सर्वदा निर्दोषनन्मुळ्ळ ज्ञानिगळ बुद्धियु भ्रांतवागुवदिल्लवु. इंथ असज्जनर वाक्यगळिंदलू सह याव जनर बुद्धियु भ्रांत (विपरीत) वागुवदिल्लवेंदु हळुवदरिंद उत्तम ज्ञानिगळ लक्षणवु इदेप्रकारद्दु एदु हेळिदंतायितु. ई श्लोकदल्लि 'आत्मन्युप्तामलात्मनां' एंतलू 'आत्मन्युप्तात्मनां हरौ' एंतलू एरडु पाठगळिरुववु; 'हरौ' एंब पाठविद्दल्लि हरौ एंब एरडु अक्षरगळल्लि 'ह' एंबदु ज्ञानार्थवन्नू 'र' एंबदु क्रीडार्थवन्नू हेळुवदरिंद अतिशयित सुखस्वरूपवुळ्ळ सच्चिदानंदस्वरूपवुळ्ळ श्रीविष्णुवु एंदर्थवागुवदेंदु तिळियबेकु. ॥१०॥ ३२२

प्रदर्श्यातप्ततपसामवितृप्तदृशां नृणां ॥ आदायांतरधाद्यस्तु स्वबिंबं लोकलोचनं ॥ ११ ॥

१. सर्वदा दर्शनसाधनं न तप्तं तपो यैरतएवावितृप्तदृशां नृणां । – (या.)

यो ज्ञानिबुद्धिविषयो हरिः स एवायं कृष्ण इत्याह प्रदर्श्येति । अतप्ततपसामस्मिन् जन्मनीति शेषः । अनेन पूर्वतनतप्ततपस्त्वं सूच्यते । स्वबिंबमिति । सच्चिदानंदलक्षणं स्वरूपं तत्प्रतिमाच गृह्यते तेन ज्ञानिनां साक्षादितरेषां इतरं रूपमिति ज्ञायते लोकस्य जनस्य लोचनं नेत्रं यस्मिंस्तल्लोकलोचनं जनरंजनं वा । अधादिति लुङ्लृङर्थे । अंतर्धास्यतीत्यर्थः । "बिंबोस्त्रीमंडलसमप्रतिमामुखलक्ष्मस्विति" । तुना "द्वावब्रह्मणोरूपे इत्यादिश्रुतिं" सूचयति ॥ ११ ॥

इंथ ज्ञानिगळ बुद्धियल्लि याव हरियु तोरुवनो. अवने ई श्रीकृष्णनेंदु हेळुवरु–'अतप्ततपसा' हिंदिन जन्मदल्लि तपःसुमाडिद ईगिन जन्मदल्लि तपःसुमाडदे इद्दरिंद याव श्रीकृष्णनन्नु नोडुवविषयदल्लि तृप्तियन्नु होंददिद्द (सर्वदा श्रीकृष्णनन्नु नोडुवदक्के तक्कष्टु तपःसुमाडिदिद्दरिंदले याव श्रीकृष्णनन्नु नोडि नेत्रतृप्तियन्नु होंददिद्द) जनरिगे तन्न चिदानंदस्वरूपवाद हागू प्रतिमास्वरूपवाद एल्ल जनर कण्णुगळु याव स्वरूपदमेलवुळ्ळ अंदर अतिसुंदरवाद अष्ट जनमनोरंजकवाद श्रीकृष्णस्वरूपवन्नु (स्वल्पु) तोरिसि आ स्वरूपवन्नु तेगेदुकोंडु यावनु अदृश्यनागुवनु. 'अंतरधात्' एंब–भूतकालप्रयोगवन्नु याके माडिदनेंदरे, श्रीकृष्णनु स्वल्पुकालदल्लिये तन्न स्वरूपवन्नु अदृश्यमाडुवदु निश्चयविद्दरिंद 'एप्यत्तु निश्चयं यत्तु अतीतत्वेन भण्यते' एंब नियमानुसारवागि. इन्नु श्रीकृष्णनु स्वरूपवन्नु अदृश्यमाडदंतेये सरिः एंबदागि 'अंतरधात्' एंब भूतार्थकधातुवु उपयोगिसल्पट्टदे. 'बिंब' एंब शब्दवु स्त्रीलिंगदल्लि नडियुवदिल्लवु: मंडल. सम. प्रतिमा. मुखचिन्ह इवुगळल्लि उपयोगिसल्पडुवदु. मत्तू 'तु' एंबदरिंद परमात्मनिगे स्वस्वरूपवेंतलू प्रतिमारूपवेंतलू एरडु रूपगळिरुववेंदु हेळुव श्रुतियु सूचितवागुवदु. ॥ ११ ॥

यन्मर्त्यलीलौपयिकं स्वयोगमायाबलं दर्शयता गृहीतं ॥ विस्मापनं स्वस्य च सौभगर्द्धेः परं पदं भूषणभूषणांगं ॥ १२ ॥

पुनरपि यद्वपुः स्वयोगमायाबलं स्वरूपेच्छासामर्थ्यं दर्शयता हरिणा गृहीतं यच्च मर्त्यलीलौपयिकं मानुषलीलां बालकौमारादिविषयामुपयातीति । अनेन स्वतएकप्रकारलक्षणमुक्तं भवति । स्वस्य कृष्णस्यच विस्मापनं विस्मयकरं यच्च सौभगर्द्धेः सौंदर्यसमृद्धेः परंपदं स्थानं । यच्च भूषणानामपि भूषणान्यंगानि यस्मिन् तत् ॥ १२ ॥

मत्तादरू आ कृष्णन स्वरूपवु याव प्रकारदेबदन्ने हेळुवनु– याव श्रीकृष्णन स्वरूपवु तन्न स्वरूपेच्छासामर्थ्यवन्नु तोरिसुवदक्के स्वीकरिसल्पट्टदु. मत्तू मनुष्यरंते बाल्यकौमारमोदलादवुगळन्ननुसरिसनक्कदु. हीगे हेळुवदरिंद आ कृष्णन स्वरूपवु स्वत एकप्रकारस्वरूपवुळ्ळदु (अंदरे बाल्यकौमारादिगळल्लि हेच्चु कडिमे यागनक्कदल्ल) एंदु हेळिदंतायितु. हागू आ कृष्णस्वरूपवु तनगादरू (श्रीकृष्णगादरू) आश्चर्यकरवादद्दु. मत्तू अतिशय सौंदर्यगळिगे मूलस्थानवादद्दु. याव श्रीकृष्णन शरीरवु मैमेलिनभूषणगळिगे अलंकरिसितक्कद्दु. ॥ १२ ॥

यद्धर्मसूनोर्बतराजसूये निरीक्ष्य दृक्स्वस्त्ययनं त्रिलोकः ॥ कात्स्न्र्येन चात्रोपगतं विधातुर्वाक्सूनृतौ कौशलमित्यमन्यत ॥ १३ ॥

१. अति सुंदरमिति यावत् । – (या.)

पुनरपि कीदृशं धर्मसूनो राजसूये यज्ञे पश्यतो जनस्य दृशां स्वस्त्ययनं आनंदाश्रयं यद्वपुर्निरीक्ष्य त्रिलोक इत्यमन्यत कथं विधातुर्विरिंचस्यार्वाक्सृतावंत्यसृष्टौ कात्स्न्येंन कौशलमत्र कृष्णवपुषि उपगतं पर्याप्तमिति नैतत्सत्यमित्याह बतेति । अनेन त्रिलोकस्याज्ञानमाश्चर्यमिति विस्मयं करोति । "आनंदरूपंदृष्ट्वापि लोकोभौतिकमेवतु। मन्यतेविष्णुरूपंच अहोभ्रांतिर्बहुस्थितेति" वचनात् । ज्ञान्यज्ञानिनां समुच्चये चकारः तथाचैवं योजना अत्र जीवराशौ त्रिषु देवादिषु लोकः प्रकाशो ज्ञानं यस्य स तथा वेदैकप्रमाणो जनो धर्मसूनो राजसूये उपगतं सर्वाधिकत्वेन स्थितं यद्वपुर्निरीक्ष्य सृतौ मनुष्यसृष्टिमार्गे प्रवर्तमानस्य विधातुर्यत्कात्स्न्येंन कौशलं मंगलविषयं निर्माणपाटवं तदर्वाक् नीचमित्यमन्यत श्रीकृष्णसौंदर्यस्याकृत्रिमत्वात् अतएवानंतत्वाच्च न तज्ज्ञान्यज्ञानिनां ज्ञानेवाऽज्ञानेवा वैचित्र्यमहो इत्यास्वादयति ॥ १३ ॥

आ श्रीकृष्णन स्वरूपवु मत्तू याव प्रकारद्दंदर हेळुवनु- धर्मराजन राजसूययागदल्लि नोडतक्क जनगळ नेत्रगळिगे आनंदवन्नु कोडुवदक्के आश्रयवाद याव श्रीकृष्णन शरीरवन्नु कंडु, मूरुलोकवु, लोकदल्लि मनुष्यनु मोदलु अक्षरगळन्नु बरेयुवाग सोट्ट सोट्टागि बरेदु बहुदिवसबरेयुव अभ्यासवादनंतर बहु सुंदरवागि ह्यागे बरेयुवनो, अदरंते सृष्टिकर्तृवाद चतुर्मुखब्रह्मनु सृष्टिमाडिमाडि बहुदिवसद अभ्यासदिंद ई श्रीकृष्णशरीरवन्नु सृष्टिमाडिद्दरिंद यावत्तू सौंदर्यद भागवु ई कृष्णशरीरदल्लिये मुगिदिरुवदु एंदु (सकलजनवु) तिळिदितु, आदरे ई प्रकार सकलजनवु तिळिदद्दु सत्यवल्लवु. लोकदल्लि भ्रमवु केलवु जनक्के बरुवदुंटु. अंथादु ई श्रीकृष्णनविषयदल्लि सर्वरिगू अज्ञानबंदिरुवदु. बहु आश्चर्यवन्नुंटुमाडुवदु. (ई विषयक्के आचार्यर वचनवु) ज्ञानानंदम्वरूपवुळ्ळ श्रीकृष्णन रूपवन्नु कंडाग्यू जनवु अवन शरीरवु तंमंते भौतिकवेंदु तिळियुवदल्ल. अहा भ्रांतियु बहु जनरन्नाश्रयमाडिरुवदु ! ज्ञानिगळल्लियू अज्ञानिगळल्लियू सह इरुवदु ! वट्टिगे हीगे तिळियतक्कदु. (' त्रिलोकः ' एंब पदक्के एरडने अर्थवु) ई जीवराशीगळ्ळल्लि ' त्रिषु '=देवमनुष्यगंधर्वरल्लि ' लोकः ' प्रकाशरूपवादज्ञानवुळ्ळ, वेदवे केवल प्रमाणवेंदेन्नुव ज्ञानिजनवु धर्मराजन राजसूययागदल्लि सर्वरिगू अधिकनागिद्द. श्रीकृष्णन याव शरीरवन्नु कंडु, मनुष्यर सृष्टिमार्गदल्लि उद्युक्तनाद ब्रह्मदेवन सृष्टिमाडुव अत्युत्तमवाद कुशलतनवु ई कृष्णन सुंदरवाद शरीरद मुंदे एनू केलसक्के बारदु: ई कृष्णन शरीरवु यारिंदलू रचितवादद्दल्लवु. आद्दरिंदले इंथ सुंदरविरुवदु, अनंतवागविरुवदु (अंदरे यारिगू अंतहत्तदंतिरुवदु.) ई प्रकार ज्ञानिगळ तिळवळिकेविषयदल्लियू अज्ञानिगळ मूढतनविषयदल्लियू इष्टु विचित्रविरुवदु एंदु स्वारस्यतेगेदुकोळ्ळुवदु. ॥१३॥

यस्यानुरागप्लुतहासरासलीलावलोकप्रतिलब्धमानाः ॥ व्रजस्त्रियोदृग्भिरनुप्रवृत्ताधियोवतस्थुःकिलकृत्यशेषाः ॥ १४ ॥

यस्य श्रीकृष्णस्यानुरागेण स्नेहेन प्लुतहासरासौ अनुस्मितहासरासक्रीडे ताभ्यां सहितेन लीलावलोकेन प्रतिलब्धः मानो यासां तास्तथोक्ताः । हासरासशब्दो रसपरः तेन वा । "रसः सारोवर" इति वचनात् । रसएव रासः "वार्तासंभावयोः किलेति" वचनात् संभावितोयमर्थः व्रजे गोष्ठे ॥ १४ ॥

१. यस्य श्रीकृष्णस्य अनुरागः स्नेहः तेन प्लुताः व्याप्ताः हासश्चरासलिला रासक्रीडाचावलोके निरीक्षणं च ते तथा -(**या.**) २. दृग्भिः सह अनुप्रवृत्ताः गच्छंतमेवानुगता धियो यासां ताः तथाविधाः सत्यः कृत्ये भोजनादिरूपे शेषो यासां ताः असमापितकृत्याएवनिरीक्षणार्थमागताः अवतस्थुः तस्य सौंदर्यनिधित्वादेतत्संभावितमित्यर्थे किलशब्दः । - (**या.**)

(मत्तू आ कृष्णन सौंदर्यवन्ने वर्णिसुवनु) याव श्रीकृष्णन स्नेहदिंद तुंबिद मंदहासवु रासक्रीडेयू कडेगण्णोटवू इवुगळिंद बहुमानवन्नु पडेद (अथवा अहंकारवन्नु होंदिद) गोकुलदल्लिद्द स्त्रीयरु (श्रीकृष्णनु बीदियल्लि होगुवाग्ये) होगुव श्रीकृष्णनन्नु नोडुवदक्के बुद्धियु होगलु कंणुगळिंद सह अवनन्नु नोडबेकेंदु तंम भोजनमोदलाद केलसगळन्नु सह अर्धक्के बिट्टु निल्लुतिद्दरु. आ श्रीकृष्णनु परमसुंदरनाद्दरिंद ई मातु संभविसितक्कद्दे सरि, एंब अर्थवन्नु ' किल ' एंबदु हेळुवदु. अथवा ' यस्यानुरागप्लुतहासरासलीलावलोकप्रतिलब्धमानाः ' एंबल्लि, हासरासवेंदरे ' रस ' वेंब अर्थवु; याव श्रीकृष्णन स्नेहदिंद रसभरीतवाद लीलेगळू कडेगण्णोटगळू इवुगळिंद बहु मानहोंदिद एंब अर्थवु. ॥ १४ ॥

स्वशांतरूपेष्वितरैश्च रूपैरभ्यर्द्यमानेष्वनुकंपितात्मा ॥ परावरेशो महदंशयुक्तो ह्यजोपि जातो भगवान्यथाग्निः ॥ १५ ॥

अवतारप्रयोजनमाह स्वशांतेति । स्वस्य शांतरूपेषु सात्विकप्रकृतिषु सुरादिषु इतरैरशांतरूपैरसुरैरभ्यर्द्यमानेषु सत्सु अनुकंपितात्मा अनुद्वृत्तचित्तो महदंशयुक्तः महांश्चासावंशः महदंशः मुख्यप्रतिबिंबभूतो ब्रह्मा तेन प्रार्थितत्वेन विनियुक्तो परावरेशोऽजो विष्णुर्जातो भवतीत्यन्वयः । यथाग्निर्दारुणइति शेषः । अनेन जनीप्रादुर्भाव इति धात्वर्थो विवृत इति ॥ १५ ॥

श्रीकृष्णनु अवतारमाडिद प्रयोजनवन्नु हेळुवनु-' स्वशांतरूपेषु ' सात्विकप्रकृतियुळ्ळ देवतिगळु ' इतरैः ' असुररिंद पीडितरागुत्तिरलु आ देवतिगळमेले अतःकरणवुळ्ळवनागि ' महदंशयुक्तः ' अंशवेंदरे प्रतिबिंबवु, महदंशनेंदरे प्रतिबिंबराद एल्लजीवरल्लि मुख्यनाद चतुर्मुखब्रह्मनु, आ ब्रह्मनिंद प्रार्थितनागि, इंथिथ कार्यगळन्नु माडबेकेंदु हेळिसिगोळल्पट्ट, (अथवा ' महदंशयुक्तः ' महनीयराद इंद्र वायु शेष रुद्र मोदलाद देवतिगळिंदसहितनागि) ब्रह्मादिदेवतिगळिगे स्वामियाद श्रीविष्णुवु तनगे उत्पत्तिइल्लदिद्दाग्यू कट्टिगेइंद अग्नियु प्रकटवागुवंते अवतारमाडिदनु. हीगे हेळुवदरिंद ई श्लोकदल्लि ' जातः ' एंब पदक्के उत्पन्ननादनेंदर्थवल्लवु, प्रकटनादनेंदर्थवु तोरिसिरुवदु. ॥ १५ ॥

मां खेदयत्येतदजस्य जन्म विडंबनं यद्वसुदेवगेहे ॥ व्रजे च वासोऽरिभयादिव स्वयं पुराद्यवात्सीद्यदनंतवीर्यः ॥ १६ ॥

ब्रह्मादीनामपि भगवद्विषयज्ञानं मध्यान्हार्कवत्संचलति किमुतास्मदीयमितिभावेनाह मांखेदयतीति । वसुदेवस्य गृहे भार्यायां जन्मविडंबनं जातवदनुकरणं अरिः कंसो जरासंधश्च पुरान्मथुरापुरात् गोमंतद्वारकयोर्विवासः प्रवासः अनंतवीर्य इत्ययं लोकानुकरणं स्मारयति ॥ १६ ॥

मध्यान्हद सूर्यनु ह्यागे बहुतीव्रसरियुवनो, हागे ब्रह्मादिगळल्लिद्द भगवद्ज्ञानवादरू चलितवागुवदु; अंदमेले नंमंथवरल्लिद्द भगवद्ज्ञानवु चलितवागुवदेंदेनु हेळतक्कदु, एंब अभिप्रायदिंद हेळुवनु- याव श्रीकृष्णनु वसुदेवन हेंडतियाद देवकियल्लि जनितनादंते तोरिसिद्दू, शत्रुगळाद कंस जरासंध मोदलादवर भयदिंद तानु अवतरिसिद स्थळवन्नु बिट्टु गोकुलदल्लि वासमाडिद्दू,

१. अत्र रूपशब्दः प्रतिमापरः । -(**या.**) २. एतत् । अनीश्वरवत् कर्मकरणं । मां खेदयति । असुरजनमोहनार्थमेवैतत् । न स्वतः । तत्स्वभावस्यानेवंविधत्वेन श्रुत्यादिसिद्धत्वादिति साधने चित्तचांचल्यपरिहाररूपक्लेशयुक्तं करोतीत्यर्थः । -(**या.**)

मथुरापट्टणवन्नु बिट्टु गोमंतपर्वतक्के शेरिद्दू, द्वारकापुरदल्लि वासमाडिद्दू. तानु अनंत पराक्रमियागिद्दु ई प्रकार लोकरीत्यनुसारवागि असमर्थनंते केलसमाडिद्दू (माडिदकेलसवु-कर्ता) 'मांखेदयति' इवनु सर्वोत्तमनु अहुदो अल्लवो एंब चांचल्यवु उंटागि नंतर ई मेले हेळिद कार्यगळेल्ल असुरमोहनार्थवे होर्तु स्वतः अल्लवु. अवन स्वभाववु ई प्रकारद्दल्लवेंदु श्रुतिस्मृतिगळल्लि हेळिद अर्थवन्नु मनसिनल्लि तंदुकोंडु आ चांचल्यवन्नु पराभवमाडिकोळ्ळुव श्रमवन्नुंटु माडुवदु. ॥ १६ ॥

दुनोति चेतः स्मरतो ममैतद्यदाह पादावभिवंद्य पित्रोः ॥ तातांब कंसादुरुकंपितानां प्रसीदतं नोऽकृतनिष्कृतीनां ॥ १७॥

एतत्कंसवधानंतरं क्रियमाणं कर्म पित्रोर्देवकीवसुदेवयोः अकृतनिष्कृतीनां अननुष्ठितकंसकृतप्रतिक्रियाणां ॥ १७ ॥

कंसवधेयादकूडले तायितंदेगळाद देवकीवसुदेवरन्नु कुरितु बंदु अवर पादगळिगे नमस्कारमाडि, हे तंदेये, हे तायिये, कंसराजनिंद बहु भयग्रस्तरागि आ कंसनु तमगे बाधेबाडिसिद्दके आ कंसनिगे प्रतियागि विरुद्ध केलसवन्नु माडदिद्द नंम मेले तावु अंतःकरणमाडबेकु, (प्रसन्नरागबेकु) एंब मातादरू (हिंदिन श्लोकदल्लि हेळिदंते) नन्न मनसिगे तोंदरेयन्नु कोडुवदु. १७

को वा अमुष्यांघ्रिसरोजरेणुं विस्मर्तुमीशेत पुमान्विजिघ्रन् ॥ यो विस्फुरद्भ्रूविटपेन भूमेर्भारं कृतांतेन तिरश्चकार ॥ १८ ॥

विस्फुरद्भ्रूविटपेन विस्फुरंत्योर्भ्रमंत्योर्भ्रुवोर्विटपेन लेशेन कृतांतेन कालोपमेन ॥ १८ ॥

याव श्रीकृष्णनु प्रळयकालद नाशवन्नु हेंदिसुवंतिरुव तन्न स्वल्पु हुब्बु हारिसोणदरिंद भूभारवन्नु नाशमाडिदनो, अंथ श्रीकृष्णन पादकमलगळ धूळियन्नु सेविसतक्कवनागि याव मनुष्यनु अवनन्नु मरेयलु समर्थनादानु? यावनू मरियलारनु. ॥ ८ ॥

दृष्टा भवद्भिर्ननु राजसूये चैद्यस्य कृष्णं द्विषतोऽपिसिद्धिः ॥ यां योगिनः संस्पृहयंति सम्यग्योगेन कस्तद्विरहं सहेत ॥ १९ ॥

रसज्ञेन पुरुषेण हरेर्विरहो न सोढुं युक्त इति भावेनाह दृष्टेति । योगिनो युक्त्युपक्रमादिलक्षणेन वेदतात्पर्यवेदिनो यां सिद्धिं स्पृहयंति वांच्छंति राजसूये भवद्भिश्चासुरप्रवेशात्कृष्णं द्विषतोपि चैद्यस्य कृष्णप्रवेशलक्षणासिद्धिर्दृष्टा अपिना निंदितात् द्वेषात् भक्त्यैकलभ्या तत्प्रवेशलक्षणा सिद्धिः कथं संभवतीतिचोद्यं नन्वित्यनेन परिहृतं तथाहि "प्रश्नावधारणैतिह्यसमीहानुमतेनन्विति" वचनात्। यथाप्रमाणेनानुमतं तथांगीकर्तव्यं। प्रमाणं तु। "असुराअपियेविष्णुं शंखचक्रगदाधरं। भक्तिपूर्वमवेक्षंतेज्ञेयाभागवता इति ॥ विद्विषंतितुयेविष्णुमृषिपुत्राअपिस्फुटं। असुरास्तेपिविज्ञेया गच्छंति च सदातम" इति। अतएव सम्यग्योगेनेत्युक्तं। "सर्व-थाभक्तितोमुक्तिर्द्वेषात्तमउदीरित-" मित्यादेः। ततः किं तत्राह कइति। यस्मात् जीवद्वयसमायोगेन जातान् जयादीन् भक्त्या दुष्टावेशाद्विमोच्य दुष्टांस्तमसि प्रापय्य ३२४

१. सेवमानः।

प्रवर्तते तस्मात्कृपालोस्तस्य विरहं विस्मरणलक्षणं कः पुमान् सहेत भक्तिमानितिशेषः। "जीवद्वयसमायोगाद्विरण्यकमुखाःपर" इत्यादेः। एकस्मिन् जीवद्वयसमा-योगोऽस्तीति ज्ञायते ॥ १९ ॥

अभिरुचियन्नु बल्ल पुरुषनिंद श्रीहरिय अगलुवेकेयु सहनमाडलोशवल्लवेंब अभिप्रायदिंद हेळुवनु–'योगिनः' युक्तिगळिंदलू उपक्रमोपसंहारतात्पर्यलिंगगळिंदलू (ग्रंथद मोदलु कोनेगे एनु हेळुवदेंब सारांशचिन्हगळिंदलू) वेदद तात्पर्यार्थवन्नु तिळकोळ्ळुतक्क ज्ञानिगळु याव सिद्धियन्नु अपेक्षिसुवरो. धर्मराजन राजसूययागदल्लि असुरावेशदिंद श्रीकृष्णनन्नु द्वेषमाडिदाग्यू शिशु-पालनिगे श्रीकृष्णन प्रवेशवेंब अंथ सिद्धियु दोरेदद्दु निम्मेल्लरिंद नोडल्पट्टितु. केवल भक्तियिंदले दोरेयतक्क आ श्रीकृष्णन प्रवेशवेंब सिद्धियु (शिशुपालनिगे) निंद्यवाद द्वेषदिंद ह्यागे संभविसि-तेंब संदेहवु ई श्लोकदल्लिय 'अपि' एंबदरिंद सूचितवागलु, ई श्लोकदल्लिय 'ननु' एंबदरिंद अदर परिहाररूपवाद उत्तरवु हेळल्पडुवदु. ह्यागेंदरे 'ननु' एंब अव्ययवु प्रश्नदल्लियू निश्चयार्थदल्लियू इतिहास हेळुवदरल्लियू सम्मतियल्लियू उपयोगिसल्पडुवदेंब वचनविद्दकारण प्रमाणदिंद ह्यागे संमतवादद्दो हागे अंगीकारमाडतक्कदु. आ प्रमाणवु यावदेंदरे शंख-चक्र-गदाधारियाद श्रीविष्णु-विनन्नु भक्तिपूर्वकवागि यारु नोडुवरो अवरु असुरजातियल्लि हुट्टिदवरादाग्यू भगवद्भक्तरे एंदु तिळियतक्कदु. ओंदुवेळे ऋषिपुत्ररादाग्यू श्रीविष्णुविनन्नु स्पष्टवागि द्वेषमाडलारंभिसिदरे अवरादरू असुररे एंदु तिळियतक्कदु. अवरु तमःसिगे होगुवरु. आदकारणवे सरियाद योगदिंद 'सम्यग्योगेन' एंदंदिरुवरु. केवल भक्तियिंदले मुक्तियु. भगवद्द्वेषदिंदले तमःसु एंदु हेळिरुवदु. इवेमोदलाद प्रमाणगळिरुववु. आदरे मुंदेनु, एंदरे– याव कारण (सुजीव दुर्जीवरेंब) एरडु जीवरु शेरि उत्पन्नराद जयविजयरेमोदलादवरन्नु अवर भक्तियिंद तुष्टनागि अवरल्लिद्द असुरावेशवन्नु बिडिसि आ असुररन्नु तमःसिगे कळिसि तन्न भक्तराद जयमोदलादवरन्नु ई शिशुपालमोदलाद शरीरबिडिसि सद्गतिगे कळुहिदनु. आदकारण इंथ कृपाळुवाद श्रीकृष्णनन्नु मरेयोणवेंब वियोगवन्नु भक्तिमंतनाद याव पुरुषनु सहनमाडुवनु''हिरण्यकशिपुवे मोदलादवरु एरडु जीववु वुळ्ळवरेंदु' प्रसिद्धियिद्दकारण ओब्बनल्लि (ओंदुदेहदल्लि) एरडु जीवगळिरुववेंबदु तिळियल्पडुवदु. १९

तथैव चान्ये नरलोकवीरा य आहवे कृष्णमुखारविंदं ॥ नेत्रैः पिबंतो नयनाभिरामं पार्थास्त्रपूताः पदमापुरस्य ॥ २० ॥

चैद्यवदन्येपि स्वयोग्यां सिद्धिमापुरित्याह तथैवेति । ये भारतयुद्धे दुर्योधनपक्षपातिनोऽन्येनरलोकवीराः कर्णादयो नयनाभिरामं नेत्रोत्सवजनकं कृष्णमुखार-विंदं नेत्रैः पिबंतः पार्थास्त्रपूताः पार्थस्य पाशुपताद्यस्त्रेण पूताश्छिन्नशिरस्का मृतास्तेपि तथैव चैद्यवदेवास्य कृष्णस्य प्रसादात्तदधीनं स्वयोग्यं पदमापुरित्यन्वयः स्वपदप्राप्त्यनंतरं मुक्तिं च प्रापुरित्यस्मिन्नर्थे चशब्दः। पुंछेदनइति धातुः पूत्रपवनइतिधातुपाठे द्वेषं मुक्त्वा भक्त्या शुद्धा इत्यर्थः ॥ २० ॥

१०९ शिशुपालनंते मत्ते केलवरु तंम तंम योग्यवाद सिद्धियन्नु होंदिदरेंदु हेळुवरु– भारतयुद्धदल्लि दुर्योधनपक्षपातिगळाद याव केलवरु मनुष्यलोकदल्लि महावीररेंदेनिसिगोंड कर्णने मोदलादवरु तम्म नेत्रगळिगे परमोत्सववन्नु कोडतक्क श्रीकृष्णन मुखकमलवन्नु कण्णुगळिंद नोडुत्त अर्जुननिंद बिडल्पट्ट पाशुपतास्त्रवे मोदलाद अस्त्रगळिंद शिरच्छेदनउळ्ळवरागि मृतरादरो, अवरादरू शिशुपालनंते श्रीकृष्णन प्रसाददिंद आ कृष्णन अधीनवाद तमगे योग्यवाद पदवन्नु होंदिदरु. तम्म तम्म स्थानक्के होदनंतर मुक्तियन्नादरू होंदिदरेंब अर्थवन्नु 'च' शब्दवु

हेळुवदु. 'पार्थाऽपूता.' एंबल्लि अर्जुनन अस्त्रगळिंद 'पूताः' छिन्नरागि एंब अर्थवु ब्यागेंदरे. 'पुञ्' एंब धातुवु छेदन अर्थवन्नु हेळुवदु; अथवा 'पुञ्' एंब धातुवु पवनार्थवन्नु हेळुवदेंब पाठवन्नु स्वीकरिसिदरे अवरु द्वेषवन्नु बिट्टु भक्तियिंद शुद्धरादरेंदर्थवु. ॥ २० ॥

स्वयंत्वसाम्यातिशयस्त्र्यधीशः स्वाराज्यलक्ष्म्याप्तसमस्तकामः ॥ बलिं हरद्भिः सुरलोकपालैः किरीटकोट्येडितपादपीठः ॥ २१ ॥

एवंविधस्य हरेर्भक्तानुकंपामंतरेण नान्यत्प्रयोजनं मत्स्यावतारादिनेत्याशयेनाह स्वयंत्विति। न साम्यातिशयो यस्य स तथोक्तः। "एकमेवाद्वितीय-" मिति श्रुतेः। स्वाराज्यलक्ष्म्या स्वरूपानुभवलक्ष्म्या "स्वेमहिम्नीति" श्रुतेः। बलिं पूजां ॥ २१ ॥

ई प्रकार इरतक्क श्रीहरिगे मच्छादि अवतारगळिंद भक्तरमेले अनुग्रहद होर्तु एरडने प्रयोजनविल्लवेंदु हेळुवनु– याव श्रीकृष्णनु स्वतः तनगे समरू अधिकरू इल्लदवनागि मूरु लोकगळिगू अधीश्वरनागि, 'ब्रह्म एंब वस्तुविगे समरू अधिकरू इल्लवु' एंदु हेळुव श्रुतियिंद होगळिसिगोळ्ळुववनागि, 'तन्न महिमेयल्लिये तानिरुवनेंब' श्रुत्यनुसारवागि, तन्न स्वरूपानुभववेंब महदैश्वर्यदिंदले सकल कामनासंपन्ननागि तनगे बलियन्नु (पूजासाहित्यवन्नु) तंदु कोडतक्क देवलोकपालकर किरीटाग्रदिंद पूजितवाद पादपीठवुळ्ळवनु. ॥ २१ ॥

तत्तस्य कैंकर्यमलं भृतान्नो विग्लापयत्यंग यदुग्रसेनं ॥ तिष्ठन्निषण्णं परमेष्ठिधिष्ण्ये न्यबोधयद्देव निधारयेति ॥ २२ ॥

इदमपि तन्माहात्म्यातिशयसूचकं यस्मादेवंविधज्ञानवतोऽस्मान् विग्लापयति तत्कर्मेतिभावेनाह तत्तस्येति। तद्वचः कैंकर्य दासत्वं विग्लापयति माहात्म्यविषयेऽज्ञानलक्षणां ग्लानिमुत्पादयति तदिति। किं तत्राह यदिति। परमेष्ठिधिष्ण्ये सिंहासने निषण्णमुग्रसेनं स्वयमुत्तिष्ठन् यद्वचो न्यबोधयत् विज्ञापयामास। हे देव अस्मद्विज्ञापनं निधारय चित्ते कुर्विति ॥ २२ ॥

ई हिंदे हेळिदंते श्रीकृष्णनु सर्वोत्तमनेंब ज्ञानवुळ्ळ नम्मन्नादरू सह आ कृष्णनु माडतक्क (ई मुंदे हेळतक्क) कार्यवु मनसिन व्यसनवन्नुंटु माडुवदल्ल (मोसगोळिसुवदल्ल); इदादरू आ श्रीकृष्णन माहात्म्ययवन्नु सूचिसुवदु एंब अभिप्रायदिंद हेळुवनु– 'हे अंग' एलै प्रियनाद विदुरने. याव श्रीकृष्णनु हिंदिन श्लोकदल्लि हेळिदंते महामाहात्म्यवुळ्ळवनादाम्यू सिंहासनदल्लि कुळित उग्रसेनराजन एदुरिगे तानु एद्दु निंतु, 'हे देव', हे स्वामिये नम्म मातुगळन्नु चित्तक्के तरबेकु एंदु विज्ञानमाडिकोंडनल्ल! आ वाक्यवु, अवन दासानुदासराद नम्मगळिगे (ई कृष्णनु माडुव इवेल्ल माहात्म्यगळु) असुरमोहनार्थवो, अथवा तन्न भक्तजनरल्लि वात्सल्यवन्नु तोरिसुवदक्को, इदन्नु निश्चयमाडिकोळ्ळुवदक्के चित्तचांचल्यवन्नु बिडिसुव मनसिन तोंदरेयन्नुंटु माडुवदु. २२

अहो बकीयं स्तनकालकूटं जिघांसया पाययदप्यसाध्वी ॥ लेभे गतिं धात्र्युचितां ततोऽन्यं कं वा दयालुं शरणं व्रजेम ॥ २३ ॥

१. मूलगत नो इत्यनेनान्वयः कार्यः 'ग्लानिं' असुरजनमोहनाय वा भक्तजनवात्सल्यप्रदर्शनाय वा इदमिति संधानेन चित्तचांचल्यपरिहाररूपां ग्लानिं प्रापयति। –(या.)

पूर्वमर्थत उक्तं दयालुत्वमधुना वाक्यतः कथयति अहो इति। बकभक्षणइति धातोर्भक्षणशीलत्वात् बकी पूतना अपिना ताटकां गर्हयति धात्रीणां शुभानां योग्यताभेदेनोचितां। "कंसपूतनिकाद्याश्च बांधवादियुतायतः। जीवद्वयसमायोगाद्गतिद्वयजिगीषव" इति वचनात् दयालुत्वं उर्वशींप्रति ॥ २३ ॥

हिंदे अर्थात् हेळिद दयालुत्ववन्नु ईग्ये वाक्यगळिंदले हेळुवनु–'बक' एंब धातुवु भक्षणार्थकदल्लिद्दरिंद 'बकी' एंदरे कूसुगळन्नु कोल्लतक्क पूतना एंदु अर्थवु. संण कूसुगळन्नु कोल्लतक्क अयोग्यळाद पूतना एंबवळु श्रीकृष्णनन्नु कोल्लबेकेंब बुद्धियिंद स्तनगळल्लि तुंबिकोंड कालकूटविषवन्नु प्राशनमाडिशिदाग्यू 'धात्र्युचितां गतिं' शुभजनर योग्यताभेददिंद होंदलिक्के उचितवाद (अथवा तायियाद यशोदेगे उचितवाद) गतियन्नु आ श्रीकृष्णनिंद होंदिदळु. इदरल्लि कंसनू मत्तू पूतनिका एंबवळू इवरे मोदलादवरु ('बांधवादियुताः' बांधव=भक्तजीव, आदि=द्वेषजीव ई प्रकार) एरडु प्रकारद जीववुळ्ळवरु, अंदरे कंसनल्लि भृगुऋषिएंब भक्तनु कालनेमिएंब द्वेषियू ई एरडु जीवगळु; पूतनेयल्लि उर्वशीएंब भक्तळु, ताटकाएंब द्वेषियू ई एरडु जीवगळिरुवव्वु. हींग ओब्बोब्बरल्लि एरडु प्रकारद जीवरिद्दरिंद ई जनरु एरडु तरद गतियन्नु होंदुवदक्के योग्यरु. (अदरविवरवु-) कंसनल्लिद्द कालनेमि एंब असुरनिगे तमःसन्नु कोट्टनु. आ असुरन सहवासदल्लिद्द भृगुऋषिय दोषगळन्नु (अवन भक्तियिंद) एणिसदे अवनिगे सद्गतियन्ने कोट्टनु. हागू पूतनेयल्लिद्द ताटका एंब राक्षसिगे तमःसन्नु कोट्टु अवळ सहवासदल्लिद्द 'उर्वशी' एंब अप्सरास्त्रीयळिगे अवळ भक्तियिंद सद्गतियन्ने कोट्टनु. अंदमेले ई श्रीकृष्णनु एष्टु दयाळुवु, इवनु होर्तु एरडने याव दयाळु पुरुषनिगे शरण होगतक्कदु' यारिगू इल्ल. (नमगे इवने गतियंदर्थवु.) ई श्लोकदल्लि दयालुत्ववु उर्वशी एंब अप्सरास्त्रीयळ मेले एंदु हेळतक्कदु. ॥ २३ ॥

मन्ये सुरान्भागवतांस्त्र्यधीशे संरंभमार्गाभिनिविष्टचित्तान् ॥ ये संयुगेऽचक्षत तार्क्ष्यपुत्रस्यांसे सुनाभायुधमापतंतं ॥२४॥

असुरयोनित्वमप्रयोजकं भागवतत्वे किंतु निर्दोषा भक्तिरेवेत्याशयेनाह मन्यइति। संरंभमार्गाभिनिविष्टचित्तानिति। यथा कीटः पेशस्कारिणा कुड्ये निरुद्धस्तस्मिन् भृंगे प्रथमं द्वेषयुक्तः पश्चादन्नदानात्तं द्वेषं विहाय स्नेहेन तं भृंगं स्मरन् तत्स्वरूपतां याति तथा तेप्यसुराः संरंभमार्गेण स्मरंतस्तस्मिन् संरंभं विहाय भक्त्यैव तस्मिन्नभिनिविष्टचित्ताः निरंतरं तन्मनस्का इत्यर्थः इदं तत्र हेतुगर्भविशेषणं सुनाभायुधं चक्रायुधमचक्षतापश्यन्। तएव "असुराअपियेविष्णुं शंखचक्र-(गदा)धरं रण" इत्युक्तं तार्क्ष्यपुत्रस्य गरुडस्यांसे स्थितं ॥ २४ ॥

भगवत्प्रियरेनिसुवदक्के असुरजन्मवु एनू संबंधविल्लवु, दोषविल्लद भक्तिये मुख्यकारणवेंब अभिप्रायदिंद हेळुवरु– (लोकदल्लि कुरडीकुठारियंब हुळवु एरडने जातिय हुळवन्नु हिडिदु बंधनदल्लिट्टु अदक्के अन्नवन्नु कोट्टु चुच्चुत्तलिरुवदु एंदु प्रसिद्धियिरुवदु.) ओंदु मण्णिन मनेयल्लि (मण्णगूडिनल्लि) कुरडीकुठारियंब कॆंपु हुळदिंद बद्धवाद एरडने जातिय (मेणिसिन

१. बांधवा भक्तः आदिपदेन द्वेषी कंसे भृगुर्भक्तः कालनेमिर्द्वेषी। पूतनिकायां तु उर्वशीभक्ता ताटका द्वेषयुतेत्यादिद्रष्टव्यं। ताभ्यां युता यत अतो जीवद्वयसमायोगात् मतिद्वयं मुक्तिः तमश्च तज्जिगीषवः तत्प्राप्तिसंभावनाविषया। तथा च भयात्कंस अहो बकीतिवचनद्वयं तदाविष्टसज्जीवविषयतया व्याख्येयमिति भावः। –(या.)

हुळवु) हुळवु तन्नन्नु चुच्चुवदेंदु आ कुरडीकुठारियल्लि मोदलु द्वेषयुक्तवागिरुवदु ; आनंतर अदु तनगे अन्नकोडुवदेंदु तिळिदु आ द्वेषबुद्धियन्नु बिट्टु स्नेहवन्नु माडि आ कुरडीकुठारियन्ने स्मरिसुत्त तानादरू आ कुरडीकुठारियंते स्वरूपवन्नु होंदुवदु. आ प्रकार याव महनीयरु मोदलु श्रीकृष्णनन्नु द्वेषबुद्धियिंद सहवासमाडि आ नंतर अवन महामाहात्म्यगळन्नु तिळिदु आ द्वेषबुद्धियन्नु बिट्टु, केवल भक्तियिंदले मूरु लोकस्वामियाद श्रीकृष्णनल्लि मनःसिट्टु निरंतर अवनन्नु स्मरिसतक्कवरागि, कोनेगे रणरंगदल्लि ' तार्क्ष्यपुत्रस्य ' कश्यपपुत्रनाद गरुडन हेगलमेले कुळितु उत्तमवाद हिडिकेयुळ्ळ चक्रायुधवन्नु धरिसि तम्म मेले बरतक्क आ श्रीकृष्णनन्नु नोडुवरो. अवरु असुरजातियल्लि हुट्टिदाग्यू भगवद्भक्तरे एंदु (नानु) तिळियुवेनु. ॥ २४ ॥

वसुदेवस्य देवक्यां जातो भोजेंद्रबंधने ॥ चिकीर्षुर्भगवानस्याः शमजेनाभियाचितः ॥ २५ ॥

नातिचिरेण कृष्णस्य यादवानां च स्वलोकप्रयाणं भविष्यतीति निवेद्य भक्त्यतिशयात्तस्यावतारलीला अनुक्रमिष्यन्नादौ तदवतारमाह वसुदेवस्येत्यादिना । वसुदेवस्य सकाशाद्देवक्यां जातः प्रयोजनमाह भोजेंद्रेति । भोजेंद्रेण तयोः कारागृहे बंधने सति तं कंसं हत्वा बंधनादुन्मुच्य तयोः शर्म चिकीर्षुरिति हेतुगर्भनिमित्तांतरं चाह शमजेनेति ॥ २५ ॥

स्वल्पकालदल्लिये श्रीकृष्णनू यादवरू तम्म तम्म लोकगळिगे होगुवरेंब संगतियन्नु हेळि. आ श्रीकृष्णनल्लि तन्न भक्तियु बहळागिद्दरिंद अवन अवतारलीलेगळन्नु हेळतक्कवनागि उद्धवनु मोदलु श्रीकृष्णनु प्रादुर्भूतनाद संगतियन्नु हेळुवनु– भोजकुलक्के राजनाद कंसनिंद देवकी वसुदेवरिगे बंधनवु बरुत्तिरलु कंसनन्नु कोंदु अवर बंधनवन्नु बिडिसि अवरिगे (अथवा भूदेविगे) शांतियन्नु माडबेकेंदु ब्रह्मदेवनिंद प्रार्थ्यमाननागि वसुदेवनिंद देवकियल्लि श्रीकृष्णनु अवतरिसिदनु. ॥ २५ ॥

ततो नंदव्रजमितः पित्रा कंसादिबिभ्यता ॥ एकादशसमास्तत्र गूढार्चिः सबलोऽवसत् ॥ २६ ॥ परीतो वत्सपैर्वत्सांश्चारयन्व्यचरद्धरिः ॥ यमुनोपवने कूजद्विजसंकुलितांघ्रिपे ॥ २७ ॥ कौमारादर्शयंश्चेष्टाः प्रेक्षणीया व्रजौकसां ॥ रुदन्निव हसन्मुग्धबालसिंहावलोकनः ॥२८॥ स एव गोकुलं लक्ष्म्या निकेतं सितगोवृषं ॥ चारयन्ननुगान् गोपान् रणद्वेणुररीरमत् ॥ २९ ॥ प्रयुक्तान् भोजराजेन मायिनः कामरूपिणः ॥ लीलया व्यनुदत्तांस्तान् बालः क्रीडनकानिव ॥ ३० ॥ ॥ ॥ ॥ ॥

ततो मथुरापुरात् गूढार्चिरप्रकाशितस्वमाहात्म्यः ॥ २६ ॥ कूजंतोऽव्यक्तशब्दं कुर्वतो द्विजाः पक्षिणस्तैः संकुलिता अंघ्रिपा वृक्षा यस्मिन् तत्तथोक्तं तस्मिन् ॥ २७ ॥ कौमाराइत्यत्र ङीबभावः चेष्टानां वैलक्षण्यप्रदर्शनार्थः । बालसिंहस्यावलोकनमिवावलोकनं यस्य स तथोक्तः ॥ २८ ॥ लक्ष्म्या निकेतं मंदिरं

१. शं अजेनेति पदच्छेदः ।

सिताः तंतूनां रज्ज्वा नासिकायां स्यूताः प्रोता गोवृषाः ककुद्मंतो यस्मिन् तथोक्तं चारयंस्तृणानीति शेषः ॥ २९ ॥ प्रयुक्तान् प्रहितान् मायिनः मायया वेषांतरधारिणस्तांस्तानिति जातिभेदायोक्तं क्रीडनकान् लीलासाधनानि ॥ ३० ॥

कंसराजनिगे अंजिकोंड तंदेयाद वसुदेवनिंद मथुरापुरवन्नु बिडिसि गोकुलक्के तरल्पट्ट श्रीकृष्णनु बलरामनिंद सहितनागि आ गोकुलदल्लि हन्नोंदु वरुषपर्यंतरवागि (होरगिन जनरिगे) तन्न माहात्म्ययन्नु प्रकट माडदंते वासमाडिदनु. ॥ २६ ॥ मंदवाद सुस्वरवन्नु माडतक्क पक्षिगळिंद निबिडवाद वृक्षगळिंद युक्तवाद यमुनानदिय उपवनदल्लि वत्सपालकरिंद (करुवुकायितक्क हुडुगरिंद) सुत्तुगट्टिगोंडु करुवुगळन्नु मेयिसुत्त (तिरुगाडिसुत्त) तानु संचारमाडिदनु. ॥ २७ ॥ आ गोकुलदल्लि (बाल्यावस्थेयल्लि) रोदनमाडुववनंतेयू नगुववनंतेयू सुम्मनिरतक्क सिंहन मरियंते नोटवुळ्ळवनागि तानु अल्लिय जनरिगे नोडुवदक्के आनंदवागुवंते बाललीलेगळन्नु तोरिसुत्तिद्दनु. ई श्लोकदल्लि ' कौमाराः ' एंबल्लिय ' ङीप् ' तोरदेइद्दु इवन चेष्टेगळु लोकविलक्षणवादद्दवेंदु हेळुवदु. ॥ २८ ॥ अदे बाल्यावस्थेयल्लिद्दाग्ये मुगदाणवन्नु कट्टिद, धूळिगळुळ्ळ गोवुगळ समूहवन्नु हुल्लु मेयिसुत्त, सुस्वरवाद वेणुध्वनियन्नु माडुत्त तन्न वारिगेय गोपालकरन्नू ऐश्वर्यभरितवाद गोकुलवन्नू आनंद बडिसिदनु. ॥ २९ ॥ आ गोकुलदल्लि कंसराजनिंद कळिसल्पट्ट मोसगोळिसुवदक्के स्वेच्छारूपवन्नु धरिसिद आया असुररन्नु अनायासदिंद हुडुगरु आटिगेगळन्नु मुरिदंते नाशमाडिदनु. ' तांस्तान् ' एंबदरिंद ओब्बोब्ब असुररु ओंदोंदु प्रकारद वेषवन्नु बेरे बेरे धरिसिद्दरेंदु हेळुवदु. ॥ ३० ॥

विपन्नान्विषपानेन निगृह्य भुजगाधिपं ॥ उत्थाप्यापाययद्गावस्तत्तोयं प्रकृतिस्थितं ॥ ३१ ॥ अयाजयद्गोसवेन गोपराजं द्विजोत्तमैः ॥ वित्तस्य चोरुभारस्य चिकीर्षन्सद्व्ययं विभुः ॥ ३२ ॥ वर्षतींद्रे व्रजः कोपाद्भग्नमानेऽतिविव्हले ॥ गोत्रलीलातपत्रेण त्रातो भद्रानुगृह्णता ॥ ३३ ॥ शरच्छशिकरैर्मृष्टं मानयन् रजनीमुखं ॥ गायन्कलपदं रेमे स्त्रीणां मंडलमंडनः ॥ ३४ ॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे द्वितीयोऽध्यायः ॥ २ ॥ ॥ ॥ ॥ ॥

विपन्नान्मृतप्रायान् यमुनाया उत्थाप्य गावो गास्तस्या यमुनायास्तोयं प्रकृतिस्थितं विषमिश्रणात् प्राग्यथा शुद्धं तथा स्थितं ॥ ३१ ॥ गोसवेन गोयज्ञेन उरुभारस्य बहुसंख्याविशेषविशिष्टस्य सत्प्रशस्तो व्ययस्त्यागविशेषः तं ॥ ३२ ॥ भग्नमाने नष्टाभिमाने अतएवातिविव्हले कर्तव्यमूढे गोत्रलीलातपत्रेण पर्वताख्यक्रीडाश्वेतच्छत्रेण भो भद्र कल्याणात्मन् ॥ ३३ ॥ शरदतावुदितः शशी शरच्छशी तस्य करैर्मृष्टमलंकृतं रजनीमुखं प्रदोषं कलपदं यथा भवति तथा । मंडलं मंडयतीति मंडलमंडनः ॥ ३४ ॥ इति श्रीमद्भागवते म०पु० तृतीयस्कंधे विजयध्वजटीकायां द्वितीयोऽध्यायः ॥ २ ॥

कालिंदीनादियल्लि कालिय सर्पनु वासमाडिद्दरिंद विषसदृशवाद उदकवन्नु गोवुगळू गोपालकरू प्राशनमाडि मृतरादंतागलु आ कालियसर्पनन्नु निग्रहमाडि यमुनानदियिंद होरगे हाकि आ उदकवन्नु (तन्न कटाक्षदिंद) शुद्धमाडि गोवुगळन्नू गोपालरकन्नू बदुकिसि आ शुद्धवाद उदकवन्नु प्राशनमाडिसिदनु. ॥ ३१ ॥ गोकुलदल्लि एल्ल गोपालकरु इंद्रयाग-

माडुवदक्के उद्देशपट्टिरलु आ बहुसंख्येयुळ्ळ द्रव्यवन्नु प्रशस्तकार्यक्के उपयोगमाडिसबेकेंदु समर्थनाद श्रीकृष्णनु ब्राह्मणश्रेष्ठरिंद सहितनागि नंदगोपन कडिंद गोवुगळ पूजेएंब महासभारंभवन्नु माडिशिदनु. ॥ ३२ ॥ आमेले तन्न पूजेयिल्लदंतागलु मानभंगवागि देवेंद्रनु ई गोकुलवन्नु एनु माडबेकेंबदु तिळियदे कोपदिंद (गोकुलदमेले) भयंकरवृष्टियन्नु माडलु, एलै मंगलस्वरूपियाद विदुरने आ गोकुलदमेले परमानुग्रहवन्नु माडुव श्रीकृष्णनिंद हुडुगाटिगेय छत्रिगेयंते गोवर्धनपर्वतवन्नु हिडियुवदरिंद आ गोकुलवु संरक्षितवायितु. ॥ ३३ ॥ शरद्दतुविनल्लि उदितनाद चंद्रन किरणगळिंद अलंकृतवाद प्रदोषकालवन्नु कंडु संतोषपडुत्त मनोहरवाद गानमाडुत्त गोपिकास्त्रीयर मंडलवन्नु अलंकरिसुत्त क्रीडिसिदनु. ॥ ३४ ॥

ई प्रकार श्रीमद्भागवत विजयध्वजव्याख्यानद प्राकृतार्थरूपवाद ' सुखार्थबोधनी ' एंब टिप्पणेयु, तृतीयस्कंधद २ ने अध्याय समाप्तवु. ॥ १ ॥

उद्धव उवाच ॥ ततः स आगत्य पुरं स्वपित्रोश्चिकीर्षयाशां बलदेवसंयुतः ॥ निपात्य तुंगाद्रिपुयूथनाथं हतं व्यकर्षद्यसुमोजसोर्व्या ॥ १ ॥ सांदीपिनेः सकृत्प्रोक्तं ब्रह्माधीत्य सविस्तरं ॥ तस्मै प्रादादरं पुत्रं मृतं पंचजनोदरात् ॥ २ ॥ ॥ ॥

ततो वृंदावनात्। "आशादिगतितृष्णयोरिति"। स्वपित्रोराकांक्षितं चिकीर्षया कर्तुमिच्छया व्यसुं गतप्राणं ॥ १ ॥ ब्रह्म वेदं पंचजनोदरात् पंचजनाख्य दैत्योदरात् सांदीपिनेरधीत्य सकृत्प्रोक्तं तेनेतिशेषः ॥ २ ॥

उद्धवनु हेळुवनु-श्रीकृष्णनु आमेले वृंदावनदिंद बलरामनोडने मथुरापुरक्के बंदु तंम तायितंदेगळ बहुदिवसद आशेयन्नु पूरैसुवदक्के, शत्रुसमूहक्के स्वामियाद कंसराजनन्नु एत्तरवाद मंचदिंद केळगे केडिवि तन्निंद ताडितनागि आ कंसनु प्राणबिट्टनंतर अवनन्नु तन्न सामर्थियिंद भूमियल्लि एळेदनु. ॥ १ ॥ मत्तू आ श्रीकृष्णनु उपनयनानंतर अवंतिपुरवासियाद सांदीपनि एंब ब्राह्मणनिंद ओंदावर्ति हेळल्पट्ट वेदवन्नु विस्तारवागि अध्ययनमाडि, पंचजननेंब दैत्यनु उदरदल्लि नुंगुवदरिंद मृतनाद आ गुरुपुत्रनन्नु बदुकिसि गुरुदक्षिणेयन्नु कोट्टनु. ॥२॥

समाहुता भीष्मककन्यया ये श्रियः सवर्णेन जिहीर्षयैषां ॥ गांधर्ववृत्या मिषतां स्वभागं जग्हे पदं मूर्ध्नि दधत्सुपर्णः ॥ ३ ॥

भीष्मककन्ययेति तृतीयातादर्थ्ये भीष्मककन्यया रुक्मिण्यर्थे सवर्णेन क्षत्रियत्वमात्रयोग्यतया समाहूताः। एषां क्षत्रियाणां श्रियो जिहीर्षया तेषां मूर्ध्नि पदं दधदित्यनेन श्रीहरणप्रकारः। मिषतां पश्यतां "सुपर्णःसुपरानंदात् काकुत्स्थोवाचिसंस्थिते-" रिति वचनात् सुष्ठु परमानंदरूपः सुपर्णइत्यनेन सोप्यक्लेशेनेति दर्शितं गांधर्ववृत्त्या कन्यासंवादलक्षणया इत्यनेन बहवो विवाहविधयो दर्शिता भवंति स्वभागमित्यनेन स्वयोग्यमिति दर्शयति ॥ ३ ॥

१. राजमंचात्। -(या.) २. भीष्मकांतर्गतेन भगवता समाहुताः। भगवताव्हानबुद्धाउत्पादितायां भीष्मकेणैवाहूता इत्यर्थः। एतेन भीष्मकेण राज्ञामाव्हानस्यस्वयंवरार्थे कृतत्वेपि तेषां श्रीजिहीर्षयाऽकृतत्वादध्याहृतेन भीष्मकेणेत्यनेनान्वयोऽनुपपन्नः। भगवता समाव्हानप्रसिद्धेरभावात् भगवतेत्यध्याहृतेनान्वयोऽनुपपन्न इति परास्तं। -(या.)

एश्वय, बल, सौंदय इवुगळिंद उन्मत्तराद क्षत्रियराजर तेज सन्नु अपहारमाडबेकेंब बुद्धियुळ्ळ श्रीकृष्णनिंद प्रेरितनाद भीष्मकराजनिंद तन्न पुत्रियाद रुग्मिणिय स्वयंवरद सलुवागि याव केवल क्षत्रियराजरे करिसल्पट्टिद्दरो, आ राजर तलेयमेले कालिट्टु एल्लरू नोडनोडुत्त अनायासवागि परमानंदस्वरूपियाद श्रीकृष्णनु गांधर्वविवाहवेंब मार्गदिंद तनगे योग्यळाद (तन्न भागवाद) रुग्मिणियन्नु अपहारमाडिदनु. ई श्लोकदल्लि ' भीष्मककन्यया ' एंबल्लिय तृतीयाविभक्त्यर्थवु तादर्थेषष्ठीअर्थवन्नु हेळुवदु, अंदरे रुग्मिणिय सलुवागि एंदर्थवु; ' सुपर्णः ' एंदरे गरुडनेंदर्थवल्लवु. अतिश्रेष्ठवाद आनंदउळ्ळवनाद्दरिंद सुपर्णनेंदु श्रीहरिगे अन्वर्थवेंदु पद्मपुराणदल्लि हेळिद्दरिंद श्रीकृष्णनेंदर्थवु; हागू ' सुपर्णः ' एंब विशेषणदिंद श्रीकृष्णनु रुग्मिणियन्नु एनू आयासविल्लदंते तेगेदुकोंडु बंदनेंदु हेळल्पडुवदु. ' गांधर्ववृत्या ' एंब पददिंद विवाहगळु अनेक प्रकारविरुववु; अवुगळल्लि ' गंधर्ववृत्ति ' एंदरे एकांतदल्लि वधूवरगळ ऐक्यमत्यदिंद कन्यापाणिग्रहणवु. ई नियमानुसारवागि रुग्मिणियन्नु स्वीकरिसिदनेंदु हेळुवदु. ' स्वभागं ' एंबदरिंद ई रुग्मिणियु श्रीकृष्णनिगे योग्यळे होर्तु मत्तोब्बरिगे योग्यळल्लवेंदु हेळल्पडुवदु. (इदक्कू होंचिन श्लेषार्थवु यादुपत्यव्याख्यानदाल्लिरुवदु.) ॥ २ ॥

ककुद्मतोऽविद्धनसो दमित्वा स्वयंवरे नाग्नजितीमुवाह ॥ तान् भग्नमानानभिगृध्यतोऽज्ञान् जघ्नेऽक्षतः शस्त्रभृतश्च शस्त्रैः ॥ ४ ॥

अविद्धनसः अच्छिद्रनासिकान् ककुद्मतः वृषभान् वृषभाणामाटोपसमयसूचनाय स्वयंवर इत्युक्तं किंच स्वयमक्षतः सन् ये स्वयंवरार्थमागतास्तान् क्षत्रियान् जघ्न इत्यन्वयः कन्यायाः स्वालाभेन भग्नमानान् अभिगृध्यतः कन्यामाकांक्षमाणान् अज्ञान् कृष्णप्राप्तियोग्यामजानतः। शस्त्रभृत इत्यनेन क्षत्रियाएव न वृषाइति ज्ञायते चशब्दः समुच्चये ॥ ४ ॥

नग्नजित् एंब राजन पुत्रिय स्वयंवरदल्लि (वरपरीक्षार्थवागि आ राजनिंद इडल्पट्ट) मुगदाणहाकदिद दोडुदोडु इणिगळुळ्ळ घूळिगळन्नु निग्रहमाडि आ कन्निकेयन्नु श्रीकृष्णनु लग्नमाडिकोंडनु. आ कन्निकेयु श्रीकृष्णनिगे योग्यळेंबदन्नु तिळियदे आ कन्यापेक्षिगळागि बंद राजरिगे (ई कृष्णनु आ कन्याग्रहणमाडिद कूडले) मानभंगवागलु शस्त्रपाणिगळागि अवरु युद्धमाडलु अवरिंद तानु ताडितनागदे अवरन्नु होडेदनु. इल्लि ' शस्त्रभृतः ' एन्नुवदरिंद शस्त्रपाणिगळाद क्षत्रियरिंद होडिसिगोळ्ळदे एंदर्थवागुवदु; वृषभगळिंद होडिसिगोळ्ळदे एंदर्थवागुवदिल्लवु. आदरे ' च ' एंबदु समुच्चयार्थवन्नु हेळुवदरिंद, आ वृषभगळिंदलू राजरिंदलू होडिसिगोळ्ळदे एंदर्थवु. ॥ ४ ॥

प्रियं प्रभुर्ग्राम्य इव प्रियाया विधित्सुरार्छद्द्युतरुं यदर्थे ॥ वज्र्यादवत्तं सगणो रुषांधः स्वार्थे पुरा तैर्यमयाचतानतः ॥ ५ ॥

ग्राम्यः विषयभोगासक्तइव प्रियायाः सत्यभामायाः प्रियमभीष्टं विधित्सुः कर्तुकामः प्रभुः द्युतरुं स्वर्गवृक्षं पारिजातमार्च्छत् अहार्षीत् रुषांधः सगणः मरुद्गणेन सहितः वज्री इंद्रः यदर्थे यस्य द्युतरोरर्थे तं कृष्णमार्द्रवत् शच्यावचनादितिशेषः। स्वार्थे स्वप्रयोजनाय यं कृष्णं तैः सहानतः प्रणतिविशिष्टो भूत्वा ॥ ५ ॥

१. नीलां। -(या.)

एश्वय, बल, सौंदय इवुगळिंद उन्मत्तराद क्षत्रियराजर तेज सन्नु अपहारमाडबेकेंब बुद्धियुळ्ळ श्रीकृष्णनिंद प्रेरितनाद भीष्मकराजनिंद तन्न पुत्रियाद रुग्मिणिय स्वयंवरद सलुवागि याव केवल क्षत्रियराजरे करिसल्पट्टिद्दरो, आ राजर तलेयमेले कालिट्टु एल्लरू नोडनोडुत्त अनायासवागि परमानंदस्वरूपियाद श्रीकृष्णनु गांधर्वविवाहवेंब मार्गदिंद तनगे योग्यळाद (तन्न भागवाद) रुग्मिणियन्नु अपहारमाडिदनु. ई श्लोकदल्लि ' भीष्मककन्यया ' एंबल्लिय तृतीयाविभक्त्यर्थवु तादर्थेषष्ठीअर्थवन्नु हेळुवदु, अंदरे रुग्मिणिय सलुवागि एंदर्थवु; ' सुपर्णः ' एंदरे गरुडनेंदर्थवल्लवु. अतिश्रेष्ठवाद आनंदउळ्ळवनाद्दरिंद सुपर्णनेंदु श्रीहरिगे अन्वर्थवेंदु पद्मपुराणदल्लि हेळिद्दरिंद श्रीकृष्णनेंदर्थवु; हागू ' सुपर्णः ' एंब विशेषणदिंद श्रीकृष्णनु रुग्मिणियन्नु एनू आयासविल्लदंते तेगेदुकोंडु बंदनेंदु हेळल्पडुवदु. ' गांधर्ववृत्या ' एंब पददिंद विवाहगळु अनेक प्रकारविरुववु; अवुगळल्लि ' गंधर्ववृत्ति ' एंदरे एकांतदल्लि वधूवरगळ ऐक्यमत्यदिंद कन्यापाणिग्रहणवु. ई नियमानुसारवागि रुग्मिणियन्नु स्वीकरिसिदनेंदु हेळुवदु. ' स्वभागं ' एंबदरिंद ई रुग्मिणियु श्रीकृष्णनिगे योग्यळे होर्तु मत्तोब्बरिगे योग्यळल्लवेंदु हेळल्पडुवदु. (इदक्कू होंचिन श्लेषार्थवु यादुपत्यव्याख्यानदाल्लिरुवदु.) ॥ २ ॥

'प्रभुः' समर्थनाद श्रीकृष्णनु, विषयभोगासक्तराद लौकिकजनरंते. तन्न प्रियभार्यळाद सत्यभामेय प्रीतियन्नु पूरैसुवदक्के स्वर्गलोकद वृक्षवाद पारिजातवन्नु अपहारमाडिदनु. आ वृक्षद सलुवागि वज्रपाणियाद देवेंद्रनु रोषदिंदेनू तोरदवनंतागि मरुद्गणसहितनागि शचीदेविय प्रेरणेयिंद श्रीकृष्णनन्नु कुरितु मोदलु (युद्धक्के) धाविसिदनु. आनंतर युद्धदल्लि पराजितनागि तन्न कार्यार्थवागि आ देवतिगळिंद सहवागि आ श्रीकृष्णनिगे तलेबागिसि (क्षमापनेयन्नु) बेडिकोंडनु. ॥ ५ ॥

सुतं मृधे स्वं वपुषा ग्रसंतं दृष्ट्वा सुनाभोन्मथितं धरित्र्याः ॥ आमंत्रितस्तत्तनयाय शेषं दत्वा तदंतःपुरमाविवेश ॥ ६ ॥ तत्राहृतास्ता नरदेवकन्याः कुजेन दृष्ट्वा हरिमार्तबंधुं ॥ उत्थाय सद्यो जगृहुः प्रहर्षव्रीडानुरागप्रहितावलोकैः ॥ ७ ॥ आसां मुहूर्त एकस्मिन्नानागारेषु योषितां ॥ सविधिं जगृहे पाणीन्पुरुरूपः स्वमायया ॥ ८ ॥ तास्वपत्यान्यजनयदात्मतुल्यानि सर्वतः ॥ एकैकस्यां दश दश प्रकृतेर्विबुभूषया ॥ ९ ॥ ॥ ॥ ॥ ॥ ॥

धरित्र्याः सुतं नरकं आमंत्रितस्तयेति शेषः ॥ ६ ॥ तत्रांतःपुरे कथं जगृहुरिति तत्राह व्रीडेति। प्रहर्षेण सहिताभ्यां व्रीडानुरागाभ्यां लज्जास्नेहाभ्यां प्रहितैः प्रेरितैरवलोकैर्गृहीतवत्य इत्यर्थः ग्रहणं च पतित्वेनेति शेषः ॥ ७ ॥ भगवता पुनः किं कृतमत्राह आसामिति। विधिना शास्त्रोक्तकर्मणा सहवर्ततइति एकस्य नानाविधगृहेषु स्त्रीणां करग्रहणं कथं घटत इत्यत उक्तं पुरुरूपइति। योगिवत् स्वसामर्थ्येन गृहीतबहुरूपेण घटतइत्यर्थः ॥ ८ ॥ "उत्तमैः सर्वतः साम्यं किंचित्साम्यमुदीरित-" मिति वचनात् सर्वत आत्मतुल्यत्वं किंचित्सादृश्यविवक्षयेति ज्ञातव्यं एकैकपुत्रत्वेन पुत्रवत्याशापूर्तिसंभवादृशत्वसंख्या किमभिप्रायेणेत्यत उक्तं प्रकृतेरिति। जडप्रकृतेर्विबुभूषया विविधभावेच्छया बहुत्वसंख्याविशिष्टत्वेच्छया ॥ ९ ॥

रणरंगदल्लि आकाशवन्नु शरीरदिंद ग्रासमाडतक्क (अद्भुतशरीरवुळ्ळ एंब भाववु) भूदेविय पुत्रनाद नरकासुरनन्नु श्रीकृष्णनु तन्न चक्रदिंद नाशमाडिदन्नु कंडु आ भूदेवियिंद प्रार्थितनागि पुनः आ नरकासुरन पुत्रनाद भगदत्तराजनिगे तानु तेगेदुकोंडु उळिद साम्राज्यवन्नु कोट्टु अवन अंतःपुरवन्नु प्रवेशमाडिदनु. ॥ ६ ॥ आ अंतःपुरदल्लिद्द, नरकासुरनिंद तरल्पट्ट अनेक देशद राजर कन्यागळु. आर्तबंधुनाद श्रीकृष्णनन्नु कंडु तत्कालक्के मेलक्के एद्दुनिंतु आ कृष्णनन्नु ह्यागे स्वीकरिसिदरेंदरे. अत्यंत हरुषनिंद सहितवाद लज्जेयिंदलू प्रेमदिंदलू प्रेरितवाद कडेगण्णोटदिंद पतियन्नागि अंगीकरिसिदरु. ॥ ७ ॥ आमेले श्रीकृष्णनिंद एनु माडल्पट्टितेंदरे हेळुवरु– ओंदे मुहूर्तदल्लि वेरे वेरे मनिगळल्लि इरतक्क आ हदिनारु सहस्र स्त्रीयर पाणिगळन्नु, शास्त्रोक्तविधिपूर्वकवागि ग्रहणमाडिदनु. ओंदे कालक्के अनेक मंदिरगळल्लि वासमाडिद बहुकन्यागळ पाणिग्रहणवु ओब्बनिगे ह्यागे संभविसितेंदरे. श्रीकृष्णनु तन्न महासामर्थ्यदिंद एक कालके अनेकरूपगळन्नु तेगेदुकोंडु एल्लर पाणिग्रहणवन्नु ओम्मेले माडिदनेंबदु संभविसुवदु. ॥ ८ ॥ श्रीकृष्णनु आ हेंडंदिरल्लि प्रतियोब्बरल्लि सर्वप्रकारदिंदलू तन्न समराद हत्तु हत्तु गंडुमक्कळन्नु

१. प्रकृतेर्जडप्रकृतेर्विबुभूषया विविधभवनेच्छया। मदवतारकाले जडप्रकृतेः नानाविधसुंदरतरशरीरोपादानत्वेन बहुभावो भवत्वितीच्छयेति यावत्। –(**या.**)

उत्पादनमाडिदनु. ओब्बोब्ब मक्कळिंद स्त्रीयरिगे मक्कळाशेयु पूर्तियागुवदिल्लेंदु हत्तु हत्तु मक्कळेंदल्लवु. 'प्रकृतेर्विबुभूषया' तन्न अवतारकालदल्लि जडप्रकृतियु नानाविधवाद सुंदररूपवन्नु धरिसुवदरिंद बहुरूपळागलेंदु इच्छेयिंद तन्नंते सुंदररूपवुळ्ळ बहुपुत्ररन्नु सृष्टिमाडिदनु. आ मक्कळु सकलप्रकारदिंदलू श्रीकृष्णनिगे समरेंदु मूलश्लोकदल्लिद्दाग्यू हागे अर्थ हेळगूडदु. सर्वोत्तम अद्वितीयनाद श्रीकृष्णनिगे समरादवरु यारू इल्लवाद्दरिंद 'उत्तमरिंद सकलप्रकारसाम्यवु याव ग्रंथदल्लि हेळुवरो. अल्लि स्वल्पु साम्यवेंदु तिळियतक्कद्देंदु' आग्नेयपुराणवचनविद्दरिंद आ कृष्णपुत्ररु रूपमोदलादवुगळिंद. अवनंते होलिकेयुळ्ळवरागिद्दरेंदु तिळियतक्कदु. ॥ ९ ॥

कालमागधशाल्वादीननीकैरुंधतःपुरं ॥ अजीघनत्स्वयं दिव्यं स्वपुंसां तेजऽआदिशन् ॥ १० ॥ शंबरं विविदं बाणं मुरं बल्वलमेव च ॥ अन्यांश्च दंतवक्त्रादीनवधीत्कांश्च घातयन् ॥ ११ ॥ अथ ते भ्रातृपुत्राणां पक्षयोः पतितान्नृपान् ॥ चचाल भूः कुरुक्षेत्रं येषामापततां बलैः ॥ १२ ॥ ॥ ॥ ॥ ॥ ॥ ॥

यदर्थमवतीर्ण तत्प्रयोजनमाह कालेति। कालो गर्गनिर्मितः तेजः प्रभावं अनेन मुचुकुंदादिकृतं वधमप्यात्मनैव कृतं ज्ञापयति इत्यतोऽजीघनदित्ययं लौकिकः ॥ १० ॥ एतदेव किंचिद्विवेचयति शंबरमिति। शंबरविविदौ प्रद्युम्नबलभद्राभ्यामघातयत् मुरादीन्स्वयमेवावधीदिति विवेकः ॥ ११ ॥ अथ दंतवक्त्रवधानंतरं ते तव भ्रातृपुत्राणां कुरूणां पांडवानांच कुरुक्षेत्रं प्रत्यापततां येषां नृपाणां ॥ १२ ॥

कर्मगळू इवु गळिगे कारणळाद हागू तनगे जननविल्लद चिदचिद्रूपळाद प्रकृतियल्लि गर्भवन्नु स्थापनमाडिदि. ई श्लोकदल्लिय ' तु ' शब्दवु परमात्मनिगू प्रकृतिगू बहळ वैलक्षण्य-विरुवदेंदु हेळुवदु. ॥ २८ ॥

ततो वयं सत्प्रमुखा यदर्थे बभूविमात्मन्करवाम किं ते ॥ त्वं नः स चक्षुः परिदेहि शक्ता देव क्रियार्थे यदनुग्रहेण ॥ २९ ॥
इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे षष्ठोऽध्यायः ॥ ६ ॥ ॥ ॥ ॥ ॥

ततस्तस्याः प्रकृतेः वयं सत्प्रमुखा महत्तत्वमुखा बभूविम ततः किं तत्राह यदर्थइति । आत्मन्स्वामिन् यदर्थे यत्प्रयोजनाय बभूविम तदर्थं ते तव किं करवाम वियुक्ता अस्वतंत्रा यस्मात्तस्मात्स त्वं चक्षुर्ज्ञानमंडनिर्माणोपायविषयं परिदेहि कीदृशं तत्राहुः शक्ताइति । यस्य ज्ञानस्यानुग्रहेण क्रियार्थे ब्रह्मांडनिर्माणाय शक्ताः स्यामेत्यन्वयः ॥ २९ ॥ इति श्रीमद्भागवते तृतीयस्कंधे महापुराणे विजयध्वजटीकायां षष्ठोऽध्यायः ॥ ६ ॥ ॥ ॥ ॥

आ मेले आ प्रकृतियिंद ' सत्प्रमुखावयं ' महत्तत्वमोदलाद एल्ल तत्वगळिंगे अभिमानिगळाद नावु उत्पन्नरादेवु– मुंदेनंदरे–हे स्वामिन् याव प्रयोजनक्कागि नावु हुट्टिदिवो, आ कार्यद सलुवागि निनगे एनु (सहाय) माडेवु? नावु अस्वतंत्रराद कारण, स्वतंत्रनाद आ नीनु ब्रह्मांड निर्माण माडुवदक्के उपायवाद (तक्कंथ) याव ज्ञानद अनुग्रहदिंद ब्रह्मांडवन्नु रचिसुवदक्के नावु सामर्थ्यवुळ्ळवरागुवेवो, अंथ ज्ञानवन्नु नमगे कोडबेकेंदु प्रार्थिसुवेवु एंदु तत्वेशरु परमात्मनन्नु प्रार्थने माडिदरु. ॥ २९ ॥ होगे श्रीमद्भागवत मूलक्कू विजयध्वजव्यख्यानक्कू सरियागि योजने माडि अलंकरिसुव ' मुखार्थबोधिनी ' एंब प्राकृत टीकेयु कूसनूर श्रीनिवासनिंद रचितवागि मूरने स्कंधद ६ ने अध्यायवु मुगिदितु.॥ ६ ॥

ऋषिरुवाच ॥ इति तासां स्वशक्तीनामसतीना समेत्य सः ॥ प्रसुप्तलोकतंत्राणा निशम्य गिरमीश्वरः ॥ १ ॥
कालसंज्ञां यदा देवीं बिभ्रच्छक्तिमुरुक्रमः ॥ त्रयोविंशतितत्वानां गणं युगपदाविशत् ॥ २ ॥

अस्मिन्नध्याये तदनन्यत्वमारंभणशब्दादिभ्य इत्यधिकरणार्थः प्रपंच्यत इत्यभिप्रेत्यादौ हरेस्तत्वेषु प्रवेशं वक्ति इतीति । उरुक्रमः त्रयोविंशतितत्वानां गणं युगपदाविशदित्यन्वयः । आकाशादिपंचभूतानि शब्दादिपंचतन्मात्राः श्रोत्रादिदशेंद्रियाणि मनो महदहंकारा इति त्रयोविंशतित्वानि तदुक्तं । " शब्दाद्यानभ-

१. ततः रेतसः सत्प्रमुखाः महदादितत्वाभिमानिनः यदर्थे यस्य कार्यस्यार्थे बभूविम आत्मन् हे स्वामिन् तत्किं ते कार्यं करवाम न किमपि तदुपयुक्तज्ञानाद्यभावादितिभावः । अतः यस्य तवानुग्रहेण क्रियार्थे ब्रह्मांडनिर्माणाय शक्ताः स्याम स त्वं नोऽस्माकं चक्षुस्तदुपयुक्तं ज्ञानं परिदेहि । –(**या.**) २. स्वतंत्रबहुसाधनासृष्टिर्लोके दृष्टा । नैवं ब्रह्मणः किंतु स्वरूप-सामर्थ्यादेव तस्य सृष्टिः । परतंत्रो ह्यपेक्षेत स्वतंत्रः किमपेक्षते साधनानां साधनत्वं यतः किं तस्य साधनैः ॥ २ । १ । १५ ॥

द्याश्च मनोयुक्तेंद्रियाणिच । अहंकारोमहांश्चैव त्रयोविंशतिकोगण "इति । देवतेंद्रियाणामेकत्वविवक्षया पृथङ् नोक्तं देवतेंद्रिययोरैक्यान्न पृथग्गणनं तयोरिति प्रकृति-श्चतुर्विंशा तत्प्रवेशस्य पूर्वसिद्धत्वान्नोक्ता हरिराविशदिति पंचविंशत्वेन सूचितः अत्रापि यदा जडांशस्वीकारस्तदा जीवः पंचविंशकः विष्णुः श्रियासह षड्विंशकः सप्तविंशको वा यदा जडांशस्वीकारोजीवस्तत्पंचविंशक इत्यादेः इदं सर्वमुरुक्रमपदेन सूचितं प्रवेशे कारणमाह इतीति । समेत्यासतीनां असमेतानां विश्लिष्टानां स्वशक्तीनां शक्यत्वात्स्वाधीनत्वाच्छक्तिशब्दवाच्यानां प्रसुप्तलोकतंत्राणां अनाविर्भूतलोकसृष्टिशक्तीनां प्रलीनलोकसृष्ट्युपकरणानां वा " तनुते येन कार्यं यत्तंत्रं साधन-मुच्यते । कारणानांस्वशक्तिर्वा प्रधानं साधनंयत" इति । तासामित्युक्तप्रकारां गिरं निशम्य । " शक्यत्वाच्छक्तयोविष्णोर्महदाद्यारमातथे-"ति वचनात् । शक्तिशब्द-वाच्यत्वं महदादीनां युक्तं । प्रवेशोपि रमयासहेति भावेनाह । कालसंज्ञामिति । यदा प्रवेष्टुमैच्छत्तदा " त्रयोविंशतितत्वानि प्राविशद्रमयासह । कालाख्ययास्वयं विष्णुः शक्यत्वाच्छक्तिरूपये-" तिवाक्यंमानं । तत्र काराग्रहप्रवेशवन्नायं प्रवेशः किंतु स्वातंत्र्येणेति द्योतनायेश्वर इति ॥ १ ॥ २ ॥

ई अध्यायदल्लि ब्रह्मसूत्रद २ ने अध्यायद १ ने पाद ५ ने अधिकरण १५ ने सूत्र–' ॐ तदनन्यत्वमारंभणशब्दादिभ्यः ॐ ' एंब अधिकरणदल्लि हेळुव अर्थवु विवरिसल्पडुवदु. [सूत्रार्थः–तदनन्यत्वं तस्य स्वतंत्रकारणस्य ब्रह्माभिन्नत्वं वाच्यं । कुतः? आरंभणशब्दादिभ्यः आरभ्यतेऽनेनेत्यारंभणं साधनं आरंभणे फलोपलक्षितं किंस्विदासीदित्यधिष्ठानाद्याक्षेपकवाक्यात् स्वातंत्र्यादियुक्तिभिश्चेत्यर्थः ॥ जगत्तिन सृष्टिगे स्वतंत्र कारणवु याव वस्तुवेंदु सिद्धवागुवदो? अदु ब्रह्मनिंद बेरेयल्ल, ब्रह्मने स्वतंत्रकारणवेंदेनतक्कदु; यार्केंदरे (आरंभणवेंदरे साधनवेंदर्थवु) लोकदल्लि, कुंबारनु मण्णुइल्लदे कोडवन्नु ह्यागे सृष्टिमाडलरियनो, हागे परमात्मनु इतर साहित्यगळिल्लदे जगत्तन्नु सृष्टिमाडलरियनेंदल्लवु; अवनु याव साहित्यगळिल्लदिद्दरू जगत्तन्नु सृष्टिमाडलु समर्थनु; हागू आ जगत्तिन सृष्टिगे साधकवाद सकलसाहित्यगळन्नुसह अवने सृष्टिमाडिरुवनु. ई परमात्मनु एरडनेयवर अधीननल्लवाद्दरिंदलू केवल स्वतंत्रनाद्दरिंदल्ल जगत्तिन सृष्टिगे साधकवाद वस्तुगळिगे आ सृष्टिमाडतक्क शक्तियन्नु कोडतक्कवनाद्दरिंदल्ल (ई मूरु कारणगळिंद) श्रीहरिये जगत्तिगे स्वतंत्रकारणनेंदु सिद्धवागुवदु. एंब] ई अधिकरणद अर्थवे ई अध्यायदल्लि हेळल्पडुवदेंब अभिप्रायदिंद जगत्तिन सृष्टिगे साधकवाद २३ तत्वगळल्लि जगत्सृष्टिमाडतक्क शक्तियन्नुंटु माडुवदक्के श्रीहरियु अवुगळल्लि प्रवेश माडिद संगतियन्नु हेळुवरु–' उरुक्रमः ' महापराक्रमशीलनाद परमात्मनु इप्पत्तु मूरुतत्वगळ समूहवन्नु ओम्मेले प्रवेशमाडिदनु. इप्पत्तु मूरु तत्वगळु यावेंदरे शब्दमोदलादद्दवू आकाशमोदलादद्दवू मनःसिनिंद सहितवाद इंद्रियगळू अहंकारवू महत्तत्ववू इवु एल्लवु शेरि इप्पत्तुमूरु तत्वगळेंदु वचनविद्दरिंद– १ आकाश, २ वायु, ३ तेजःसु (अग्नि), ४ उदक, ५ पृथिवी, (इवे पंचभूतगळु); ६ शब्द, ७ स्पर्श, ८ रूप, ९ रस, १० गंध, (इवु ऐदु मात्रागळु); ११ वाक्, १२ पाणि, १३ पाद, १४ पायु, १५ उपस्थ, (इवु ऐदु कर्मेंद्रियगळु); १६ चक्षु, १७ श्रोत्र, १८ रसन, १९ घ्राण, २० त्वक्, (इवु ऐदु ज्ञानेंद्रियगळु): २१ मनःसु, २२ अहंकारतत्व, २३ महत्तत्व, ई प्रकार २३ तत्वगळु. इंद्रियगळिगू इंद्रियाभिमानि देवतिगळिगू भेदविल्ल-दरिंद इंद्रियगळहोर्तु देवतेगळन्नु बेरे एणसगूडदेंदु वचनविद्दरिंद प्रत्येकवागि एणिसुवदु कारणविल्लवु. प्रकृतियु २४ नेयवळु. प्रकृतियिंदले ई इप्पत्तुमूरु तत्वगळु हुट्टिदवेंदु मोदलिंग

१. स्वरूपभूता शक्तिरेवात्र तंत्रमुच्यतइत्यर्थः । ननूक्तनिर्वचनेन सर्वकारणानां तंत्रशब्दवाच्यत्वसंभवात् कथं शक्तेरेव तंत्रशब्दवाच्यत्वं इत्यत आह प्रधानमिति । शक्त्यभावेनैव रासभादीनां असाधनत्वं दंडादीनां तु तत्सद्भावेनैव साधनत्वं उपजीव्यत्वात्तच्छक्तिः प्रधानसाधनं अत उक्तनिर्वचनेन प्रधानस्यैव ग्राह्यत्वेन शक्तेरेव तंत्रशब्दवाच्यत्वमिति भावः । –(**या.**)

हेळिदरिंद इल्लि (ई श्लोकदल्लि) प्रकृतियु २४ ने यवळेंदु गणनेमाडलिल्ल. हागू श्रीहरियु ई २३ तत्वगळ समूहवन्नु ओम्मेले प्रवेशमाडिदनेंदु ई श्लोकदल्लि हेळिदरिंद श्रीहरियु २५ ने यवनेंदु सूचितवागुवदु. अदरल्लियू जडप्रकृति चित्प्रकृतिएंदु प्रकृतियल्लि एरडु भेदविद्दरिंद जडप्रकृतियन्नु २४ ने दागि एणिसिदरे जीवनन्नु २५ ने यवनन्नागि एणिसि चित्प्रकृतियिंद सहितनाद विष्णुवन्नु २६ नेयवनन्नु अथवा चित्प्रकृतियु २६ नेयवळु श्रीविष्णुवु २७ नेयवनेंदु एणिसतक्कदु. ई हेळिद अर्थक्के प्रमाणविद्दरिंद ई अर्थवु मूलश्लोकद ' उरुक्रमः ' एंब शब्ददिंद सूचितवायितु. ई तत्वगळन्नु विष्णुवु प्रवेशमाडुवदक्के कारणवन्नु हेळुवरु– ई तत्वगळु एकत्रदल्लि शेरिदाग्यू बेरे बेरेयागिद्दु श्रीहरिय अधीनदल्लिद्दकारण ' शक्ति ' एंब शब्ददिंद करिसिगोंडु ' प्रसुप्तलोकतंत्राणां ' लोकवन्नु सृष्टिमाडतक्कशक्तियन्नु मुच्चिगोंडिद्द अथवा सृष्टिय साहित्यवन्नु तम्मल्लि मुच्चिट्टुगोंडिद्द ई तत्वगळिगे अभिमानिगळाद देवतिगळ (हिंदिन अध्यायद कोनेभागक्के हेळिद) प्रार्थनावाक्यवन्नु कोळि, आ तत्वगळिगू तत्वेशरिगू सृष्टिमाडुव शक्तियन्नु कोडुवदक्के रमादेवियिंद सहितनागि परमात्मनु आ तत्वगळन्नु यावाग्ये प्रवेशमाडबेकेंदु इच्छिसिदनो, आग्ये एल्ल तत्वगळन्नू एकदा प्रवेशमाडिदनु. ' लोकतंत्राणां ' एंबल्लि तंत्रवेंदरे यावदरिंद कार्यवु माडल्पडुवदो, अदु तंत्रवेंदेनिसुवदु, अंदरे साधनवेंदर्थवु; सृष्टिमाडुवदक्के साहित्यगळेंदर्थवु. महदादितत्वगळु जगत्तन्नु सृष्टिमाडुव शक्तियुळ्ळवाद्दरिंद इवु विष्णुविन शक्तियंदेनिसुववु. हागू रमादेवियू सृष्टिमाडतक्क शक्तियुळ्ळवळाद कारण शक्तिएंदेनिसुवळु एंब वचनगळे ई हेळिद अर्थक्के प्रमाणवागिरुववु. ई परमात्मनु तत्वगळल्लि प्रवेशमाडिद्दु काराग्रह (बंधनमने) प्रवेशमाडिदंतेयल्लवु; तानु स्वतंत्रनागि अवरिगे प्रेरणेमाडुत्त प्रवेशमाडिरुवनेंदु तोरिसुवदक्के ' ईश्वरः ' एंब शब्दवन्नु उपयोगिसिरुवरु. ॥ १ ॥ २ ॥

सोऽनुप्रविष्टो भगवान् चेष्टारूपेण तं गणं ॥ भिन्नं संयोजयामास सुप्तं कर्म प्रबोधयन् ॥ ३ ॥

निलये निलीनइव किमयं तूष्णीमास्ते किंचित्कर्माकार्षीदिति तत्राह सोऽनुप्रविष्टइति । " सर्वचेष्टकरूपेण स्वसामर्थ्येन केशवः। तानिभिन्नानितत्त्वानि योजयामासचांशत " इति । अनेन चास्यार्थो दर्शितः भिन्नं विश्लिष्टं प्रलये सुप्तं कर्माप्रतिबुद्धशक्तिकं सृष्टिनिमित्तमदृष्टं प्रबोधयन् कार्योन्मुखं कुर्वन् यद्यपीश्वरः स्वमनसैवाण्डं स्रष्टुं शक्तः तथापि कर्त्रा पुरुषेण सोपकरणेन भाव्यमिति दर्शयितुं संश्लिष्टो गणः ॥ ३ ॥

आ तत्वसमूहवन्नु प्रवेशमाडि ई परमात्मनु. मनेयल्लि बच्चिगोंडिद्द पुरुषनंते सुम्मने कुळितनो अथवा एनादरू केलसमाडिदनो, एंदरे हेळुवरु– ' यावत्तू चेष्टामाडतक्कस्वरूपवुळ्ळ तन्न सामर्थ्यदिंद केशवनु, आ प्रत्येकवागिद्द तत्वगळन्नु अवुगळ अंशगळिंद ओंदेकडेगे शेरिसिदनु. ' एंदु तत्वनिर्णयवेंब ग्रंथदल्लि हेळिद अर्थदिंद ई श्लोकद अर्थवु हेळिदंतायितु. प्रलयकालदल्लि स्तब्धवाद कार्यवन्नु सृष्टिप्रारंभकालदल्लि उद्योगवुळ्ळदन्नु माडिदनु. यद्यपि परमात्मनु तन्न मनसिनिंदले ब्रह्मांडवन्नु सृष्टिमाडुवदक्के समर्थनादाग्यू यावनादरू एनादरोंदु कार्यवन्नु माडबेकादरे आ कार्यक्के तक्काद यावत्तू साहित्यगळिंदले माडतक्कदेंदु तिळिसुवदक्के ई यावत्तू तत्वगळन्नु सेरिसि केलसमाडिदनु. ॥ ३ ॥

प्रबुद्धकर्मा दैवेन त्रयोविंशतिको गणः ॥ प्रेरितो जनयत्स्वाभिर्मात्राभिरपि पूरुषं ॥ ४ ॥

परेण विशता स्वस्मिन्मात्रया विश्वसृग्गणः ॥ चुक्षोभान्योन्यमासाद्य यस्मिन्लोकश्चराचरः ॥ ५ ॥

किं कार्यं चकारेति तत्राह प्रबुद्धकर्मेति । प्रबुद्धमुन्मुखीकृतं कर्मादृष्टं यस्य सः प्रबुद्धकर्मा दैवेन हरिणा प्रविश्य प्रेरितः त्रयोविंशतिको गणः स्वाभिर्मात्राभिरंशैः पुरुषस्य ब्रह्मणः शरीरत्वात्पुरुषशब्दवाच्यं ब्रह्मांडमजनयदित्यन्वयः । अधिपुरुषमितिपाठे अधिगतः पुरुषसूक्तवाच्यो यस्मिंस्तत्तथेत्यर्थः । " ईश्वरोदेवमुद्दिष्टं सर्वस्यापि प्रभुत्वत " इत्यतः पूर्वोक्तेश्वरो दैवशब्देन गृह्यते ॥ ४ ॥ एतदेव स्पष्टयति परेणेति । चुक्षोभ ब्रह्मांडाकारेण विकृतवान् यस्मिन्नंडे उत्पन्नः॥५॥

आमेले आ इप्पत्तुमूरु तत्वगळ समूहवु एनु माडितेंदरे हेळुवरु– श्रीहरियु आ तत्वगळन्नु प्रवेशमाडिद नंतर आ हरियिंद प्रेरितवागि ' प्रबुद्धकर्मा ' केलसमाडुवदक्के उद्युक्तवाद (समर्थवाद) क्रिदाशक्तियुळ्ळदागि आ इप्पत्तुमूरु तत्वगळसमूहवु तंम तंम अंशगळिंद ब्रह्मदेवन शरीरवाद पुरुषनेंब शब्ददिंद करिसिगोळ्ळुव ब्रह्मांडवन्नु हुट्टिसितु. ' अधिपूरुषं ' एंब पाठविद्दरे पुरुषसूक्तदिंद होगळिसिगोळ्ळुव परमात्मनु यावदरल्लि प्रवेशमाडिदनो आ ब्रह्मांडवन्नु सृष्टिमाडितु एंदर्थवु. ' एल्लक्कू प्रभुवादकारण ईश्वरनेंदु करिसिगोळ्ळुव श्रीहरिये ' दैव ' एंब शब्ददिंद करिसिगोळ्ळुवनु, एंब प्रमाणदिंद हिंदे हेळिद परमात्मने ई श्लोकदल्लि हेळिद ' दैव ' एंब शब्ददिंद करिसिगोळ्ळुवनु. ॥ ४ ॥ इदे अर्थवन्ने स्पष्टमाडुवरु– परमात्मनु तंमल्लि प्रवेशमाडुवदरिंद आ तत्वगळ समूहवु तंम अंशदिंद विष्णुविन वीर्यम्वरूपदिंद विकारवन्नु होंदि चराचरात्मक (स्थावरजंगमात्मक)वाद लोकवुळ्ळ ब्रह्मांड (जगत्तिन) स्वरूपवन्नु होंदितु.॥५॥

हिरण्मयः स पुरुषः सहस्रपरिवत्सरान् ॥ आंडकोश उवासाप्सु सर्वसत्वोपबृंहितः ॥ ६ ॥

प्रथमक्षणं शरीरप्रवेशो हरेरनंतरं भोगिनश्चेतनस्येति दर्शयितुकामस्य हरेरंडप्रवेशमाचष्टे हिरण्मयइति । यस्य प्रेरणया तत्त्वगणोंडमजनयत् स हिरण्मयो ज्ञानानंदात्मककरचरणाद्यवयववान् पुरुषाख्यो हरिरांडकोशेंडकोशस्थाप्सु अंडकोशस्योदके शेषपर्यंके सहस्रपरिवत्सरानुवासेत्यन्वयः । प्रलये सर्वचेतनानां परमचेतनेनैकीभावइति शंकां निवारयति सर्वेति। सर्वसत्वैः सर्वजीवैरुपबृंहितो नत्वेकीभूतः अनेन निर्देहानां चेतनानां प्रलयेऽवस्थानं कथमिति शंका निरस्ता परमात्मन्यवस्थानोपपत्तेः६

आ उत्पन्नवाद ब्रह्मांडद शरीरदल्लि (हुट्टिद) मोदलने क्षणक्के श्रीहरिय प्रवेशवु, आनंतर शरीरभोगतेगेदुकोळ्ळुव (जीव) चेतन प्रवेशवु, एंदु तिळिसबेकेंब इच्छेयुळ्ळ श्रीहरियु ब्रह्मांडप्रवेशमाडिद संगतियन्नु हेळुवरु– याव परमात्मन प्रेरणेयिंद तत्वसमूहवु ब्रह्मांडवन्नु हुट्टिसितो आ ' हिरण्मयः ' ज्ञानानंदात्मकवाद कै-कालुमोदलाद अवयवगळुळ्ळ पुरुषनेंदु हेसरुळ्ळ श्रीहरियु ' आंडकोशे ' ब्रह्मांडकोश-(बोक्कस)दल्लिद्द उदकदल्लि शेषपर्यंकदल्लि सहस्रवरुषगळवरेगे वासमाडिदनु. प्रलयकालदल्लि एल्ल चेतनगळू परमचेतननाद परमात्मनिंद कूडि एकीभाववन्नु होंदुववेंब संदेहवन्नु कळेयुवरु. ' सर्वसत्वोपबृंहितः ' अंदरे एल्ल जीवसमूहगळिंद युक्तनागि आ श्रीहरियु शेषशायियागि वासमाडिदनु. एल्ल जीवगळिंद ऐक्य होंदि वासमाडि-

१. पेरण परमात्मना विश्वसृजां तत्वानां गणः मात्रया अंशेन अन्योन्यमासाद्य विष्णुवीर्यरूपेण परिणामं प्राप्य चुक्षोभ ब्रह्मांडाकारेण परिणत इत्यर्थः । –(**या.**) २. प्रबुद्धं कार्योन्मुखीकृतं कर्म क्रियाशक्तिः अदृष्टं वा यस्य सः । –(**या.**)

दर्नेदल्लवु. हींगे हेळुवदरिंद देहविल्लद चेतनगळु प्रलयकालदल्लि ह्यागे इरुवंवेंब संदेहवु नाशमाडल्पट्टितु. अंदरे स्वरूपदेहदिंद (स्थूलदेहविल्लदे परमात्मनन्नाश्रयमाडिकोंडु एल्ल जीवराशिगळु इरुवंवेंदु हेळुवदक्के संभवविरुवदु. ॥ ६ ॥

स वै विश्वसृजा गर्भो दैवंकर्मात्मशक्तिमान् ॥ विबभाजात्मनात्मानमेकधा दशधा त्रिधा ॥ ७ ॥

सिसृक्षोर्हरेर्गर्भोदके बहुकालव्यापकेन निवासेन सृष्टिकथोपरतेति शंकां परीक्षितो हार्दी परिहरन्नंडांतर्वर्तिनो हरेर्विक्रमविशेषमाह स वा इति । यो गर्भोदके शेषपर्यंके शयानः स विश्वसृजां ब्रह्मांडं सृष्टवतां तत्त्वानां गर्भोंतर्यामी दैवं ब्रह्मादिदैवं तेष्वाधिक्यं कर्म प्राण्यदृष्टं सुखदुःखभोगसाधनमात्मशक्तिः प्रकृतिः नित्यमेतैर्युक्तत्वाद्दैवकर्मात्मशक्तिमान् ब्रह्मणो विराडाख्यं शरीरं सृष्ट्वा तत्प्रविश्यात्मना परप्रेरणामंतरेण स्वेच्छयात्मानं तद्देहहृदयादिनियामकत्वेन एकधादिविबभाज विभक्तवानित्यन्वयः। वा इत्यनेनोक्तार्थस्य ग्रंथांतरप्रासिद्धिद्योतकेन विश्वसृजां गर्भः कार्यात्मानमंडरूपमेकधादिभेदेन विबभाजेत्येतदपव्याख्यानं प्रत्याख्याति । स्वतो चेतनस्य कार्यकारणत्वशक्त्यदर्शनात् अप्रसिद्धत्वाच्चेति ॥ ७ ॥

सृष्टि माडबेकेंब अपेक्षेयुळ्ळ श्रीहरियु ब्रह्मांडद वोळगिन उदकदल्लि शेषशायियागि बहुदिवस वासमाडुवदरिंद अवनु सृष्टिमाडबेकेंब कथेयु मुगिदितो? एंदु परीक्षिद्राजन मनसिनोळगिन संदेहवन्नु परिहरिसुत्त, परमात्मनु माडिद पराक्रमविशेषगळन्नु हेळुवरु- याव परमात्मनु ब्रह्मांडदोळगिन उदकदल्लि शेषशायियागि वासमाडिद्दनो हागू ब्रह्मांडवन्नु सृष्टिमाडतक्क तत्वेशरिगे अंतर्नियामकनो आ परमात्मनु ' दैवकर्मात्मशक्तिमान् ' दैववेंदरे ब्रह्मदेवरे मोदलादवरु. कर्मवेंदरे आ देवातिगळे मोदलादवरल्लि प्राणिगळ अदृष्टवेंब अवरवर सुखदुःखभोगवेंब अधिकवाद कर्मवु; आत्मशक्तियंदरे प्रकृतियंदर्थवु. नित्यदल्लियू ई मूररिंद युक्तनागि (' दैवकर्मात्मशक्तिमान् ' दैवशक्तियंदरे प्रभुत्ववु कर्मशक्तियंदरे यावत्तू जगद्व्यापारमाडतक्क क्रियाशक्तियु, आत्मशक्तियंदरे तन्न हेंडतियाद प्रकृतियु ई मूरु शक्तियुळ्ळवनेंदु यादवाचार्यर अभिप्रायवु.) विराट् एंब हेसरुळ्ळ ब्रह्मदेवर शरीरवन्नु सृष्टिमाडि अदन्नु प्रवेशमाडि एरडनेयवर प्रेरणेयिल्लदे तन्निच्छेयिंदले ' आत्मानं ' तन्नन्नु ' एकधा दशधा त्रिधा ' एल्लर हृदयदल्लिरतक्क स्वरूपदिंद ओंदु प्रकारवागि प्राण-अपान-व्यान-उदान-समान-नाग-कूर्म-कृकल-देवदत्त-धनंजयएंब हत्तु प्रकार प्राणनियामकवाद हत्तु रूपगळिंद अध्यात्म-अधिदैव-अधिभूत इवुगळिगे नियामकवाद मूरु रूपगळिंद ' विबभाज ' बेरेबेरे स्वरूपगळन्नु धरिसिदनु. ई हेळिद अर्थवु एरडने ग्रंथगळल्लि प्रसिद्धवागिरुवदेंदु तोरिसुवदक्के (ई श्लोकदल्लिय) ' वा ' एंबदरिंद परकीयरु अर्थमाडतक्क ' विश्वसृजांगर्भः ' तत्वसमूहवु कार्यस्वरूपवाद ब्रह्मांडरूपवन्नु ओंदु हत्तु मूरु प्रकारवागि विभागमाडितेंदु हेळुव मातुगळु निवारणमाडल्पट्टवु. यार्केंदरे स्वतः अचेतनवाद तत्वसमूहवु कार्यमाडुवदक्के असमर्थवादर्द्देंब मातु प्रसिद्धवादद्दे. ॥ ७ ॥

एष ह्यशेषसत्वानामात्मांशः परमात्मनः ॥ आद्योऽवतारो यत्रासौ भूतग्रामो विभाव्यते ॥ ८ ॥

१. तथा च दैवशक्तिः प्रभुत्वं कर्मशक्तिः क्रियाशक्तिः आत्मशक्तिः स्वभार्यारूपा प्रकृतिः एतत्त्रितययुक्त इत्यर्थः । -(या.) २. एकधा हृदयस्थरूपेण दशधा दशविधप्राणनियामकतया त्रिधा अध्यात्मादिनियामकतया । -(या.)

ननु विश्वसृजां गर्भः आंडकोशएव भवेदेषह्यशेषसत्वानामात्मेति सर्वप्राण्याधारत्वेन परामर्शात्तदर्थं सृष्टत्वाच्चेति तत्राह एषहीति । नायमंडकोशस्य परामर्शः किंतु पुरुषेणात्मभूतेन वीर्यमाधत्त वीर्यवानिति यः पुरुषाख्यो हरिरभिहितः स एष परामृश्यते परमात्मनोंश इत्युक्तत्वादाद्योवतार इत्यवतारशब्देन विशेषितत्वाच्च नह्यंडकोशस्य हरेरवतारत्वनिर्देशः क्वचिद्दृष्टः श्रुतो वा तथाचायमक्षरार्थः यो महदादितत्वानि सृष्ट्वा तेषामंडसृष्टावस्वातंत्र्यं प्रकाश्यात्मानं तैःस्तावयित्वा तदनुग्रहाय सर्वचेष्टकरूपेण रमयासह प्रविश्य संयोज्य क्षोभयित्वा तदंशैरंडं सृष्ट्वा तत्प्रविश्य अप्सु सहस्रपरिवत्सरानुषित्वा तदंते ब्रह्मणो विराट्शरीरं सृष्ट्वा तद्देहेंद्रियादिनियामकत्वेनाविर्बभूव एष ह्यशेषसत्वानामात्मा नियामकः परमात्मनः स्वरूपांश आद्योऽवतार एतादृशमहिमेति शेष इति । कोसाविति तात्पर्यात् श्रद्धातिशयजननार्थं पूर्वोक्तमेवाह यत्रेति । यत्र यस्मिन्नाद्यावतारे पुरुषनाम्नि भूतग्रामो भूतसमूहो विभाव्यते सत्तां प्राप्य दृश्यते स इत्यर्थः । हिशब्द " आद्योवतारो विष्णोस्तु पुरुषोनामकीर्तित " इत्यादौ प्रसिद्धोयमर्थ इति दर्शयति ॥ ८ ॥

ओळ्ळेदु, ई श्लोकदल्लि ' एषः '- एंब ई एतच्छब्ददिंद ' विश्वसृजां गर्भः '= तत्वगळ समूहवाद ब्रह्मांडकोशवे एंदु ग्रहिसतक्कदु, यार्केंदरे ' एषह्यशेषसत्वानामात्मा ' एंदु सकलप्राणिगळिगे आधारवाद्दर्द्देंदु ग्रहिसिद्दरिंदल्ल अदे उद्देशदिंदले सृष्टियाद्दरिंदल्ल (ब्रह्मांडकोशवेंतले ग्रहिसतक्कदु) एंदरे हेळुवरु- ई श्लोकदल्लिय ' एषः ' एंब एतच्छब्ददिंद ब्रह्मांडकोशवेंदु ग्रहिसतक्कदल्लवु. हिंदे ६ ने अध्यायद ४ ने श्लोकदल्लि ' पुरुषेणात्मभूतेन वीर्यमाधत्तवीर्यवान् ' एंबल्लि पुरुषशब्दवाच्यनाद श्रीहरिएंदु यावनु हेळल्पट्टिरुवनो आ श्रीहरिये ई श्लोकदल्लिय ' एषः ' एंब पददिंद ग्रहिसल्पडुवनु; यार्केंदरे इदु परमात्मन अंशवेंतल्ल मोदलने अवतारवेंदु अवतार शब्ददिंद ई एतच्छब्दक्के विशेषण विद्दरिंदल्ल ' एषः ' एंबदक्के ब्रह्मांडकोशवेंदु अर्थमाडलोशवल्लवु; ब्रह्मांडकोशवु परमात्मन अवतारवेदु याव ग्रंथदल्लियू कंडिल्ल, एंदू केळिल्ल; आदकारण ई मुंदे हेळुवदे निश्चितवाद अर्थवु. याव परमात्मनु महत्तत्वमोदलादवुगळन्नु सृष्टिमाडि आ तत्वेशरिगे ब्रह्मांडसृष्टिमाडुवदक्के अस्वातंत्र्यवुंटेंदु प्रकटमाडि आ तत्वेशरिंद तानु स्तोत्रमाडिसिगोंडु अवर मेले अनुग्रहमाडुवदक्के, सकलप्राणिगळिगे चेष्टा (व्यापार) माडिसतक्क स्वरूपदिंद तानु रमादेवियिंद कूडि आ तत्वेशरल्लि प्रवेशमाडि, ओंदक्कोंदु तत्वगळन्नु संयोगमाडि, अवर शक्तियन्नु प्रबलपडिसि, आ तत्वगळ अंशदिंद ब्रह्मांडवन्नु सृष्टिमाडि, आ ब्रह्मांडवन्नु तानु प्रवेशमाडि आ ब्रह्मांडदोळगिन उदकदल्लि सहस्रवरुषगळवरेगे वासमाडि आ मेले ब्रह्मदेवन विराट् शरीरवन्नु सृष्टिमाडि आ विराट् शरीरक्कू अदर इंद्रियगळिगू नियामकवाद स्वरूपदिंद प्रादुर्भूतनादनो, अदे परमात्मने एल्ल प्राणिगळिगे अंतर्नियामकनु श्रीहरिय स्वरूपांशनु अवने इंथ महिमेयुळ्ळ मोदलने अवतारनेंदेनिसुवनु. अहा, अवन्यारेंब तात्पर्यदिंद अतिशयभक्तियन्नु हुट्टिसुवदक्के मोदलु हेळिद्दन्ने हेळुवरु- याव पुरुषनेंब हेसरुळ्ळ मोदलने अवतारदल्लि सकलप्राणिगळ समूहवू चेष्टामाडतक्क शक्तियन्नु होंदि तोरुवदो, अवने ई ' एषः ' एंब पददिंद ग्रहिसल्पडुवनु. ई श्लोकदल्लिय ' हि ' शब्दवु ई मेले हेळिद अर्थवु- ' आद्योवतारोविष्णोस्तु पुरुषोनामकीर्तितः । असृजत्समहत्तत्वं सएवांडसमाविशत् । सब्रह्मणोहृदिस्थत्वाद्धृदयंचेतिकीर्त्यते ' एंब प्रमाणप्रसिद्धवादर्द्देंदु तोरिसुवदु. ॥ ८ ॥

सांध्यात्मं साधिदैवं च साधिभूतमिति त्रिधा ॥ विराट्प्राणो दशविध एकधा हृदयेन च ॥ ९ ॥

१. अध्यात्मदेवैः सहितं तन्नियामकं रूपं प्रथमं । अधिदैवनियामकं द्वितीयं अधिभूतदेवनियामकं तृतीयं इति अनेन अभिप्रायेण त्रिधा उक्त इति शेषः । -(श्री.)

एकधेत्याद्युक्तं विवृणोति । साध्यात्ममिति । क्रमोल्लंघनं प्राधान्यदर्शनाय आध्यात्मादित्रित्वस्य नित्यत्वात् " द्वादशानींद्रिण्याहु " रितिश्रुतेरिंद्रियाणां दशविधत्वस्य प्रायिकत्वात् हृदयस्य ज्ञानविवक्षयैकत्वादंतःकरणविवक्षया चातुर्विध्यात् अध्यात्मसाहित्येन वर्तमानरूपमित्यादि योज्यं । विशेषेण राजनाद्विराट् प्रकृष्टचेष्टकत्वात्प्राणनामा ब्रह्मांतर्यामी । ब्रह्मदशेंद्रियांतस्थत्वेन दशविधः ब्रह्महृदयस्थरूपेणैकविधः चशब्दस्त्वध्यात्मादिषु त्रिषु श्रोत्रादींद्रियेषु हृदये च प्रवेशसंभवाद्धरेः संख्याभेदः " तत्सृष्ट्वा तदेवानुप्राविश-" दिति श्रुतिसिद्धत्वाद्युज्यत इति दर्शयति । प्राणादि नागादि दशप्राणा अपि अध्यात्मादिभेदेन त्रिधा ज्ञातव्याः । तदुक्तं " प्राणादिपंचकंचैव तथा नागादिपंचकं । एवंतुदशधाप्राणा अध्यात्मादित्रिधाखिला " इति । अधिभूतमपि द्विधा प्रधानवायुत्वगादिभेदेन । " प्राणःप्रथमजोयस्तु प्रधानोवायुरीरितः । त्वगात्माद्यास्तुतत्पुत्रा द्विधाभूतमुदाहृत-" मितिवचनादिदं प्रसंगादुक्तं ॥ ९ ॥

हिंदे ७ ने श्लोकदल्लि ' विबभाजात्मनात्मानमेकधादशधात्रिधा ' एंबल्लि हेळिद, परमात्मन अवतारप्रभेदवन्नु मूलग्रंथकाररे कंठोक्तियिंद हेळुवरु–(इदन्नु ७ ने श्लोकद व्याख्यानदल्लि नावु संक्षेपदिंद हेळिरुवेवु)–हिंदे ७ ने श्लोकदल्लि हेळिद क्रमनोडलु मोदलु ओंदु प्रकारवाद रूपवन्नु आ मेले हत्तुप्रकारवादरूपवन्नु आ नंतर मूरु प्रकारवाद रूपवन्नु हेळतक्कद्दित्तु हीगे हेळुवदन्नु बिट्टु मोदलिगे मूरु प्रकारवाद रूपवन्नु ई श्लोकदल्लि (क्रमवन्नु मीरि) याके हेळिदरेंदरे–अध्यात्म–अधिदैव–अधिभूतगळेंब ई मूरु नित्यवादकारण ई समूहदल्लि इवे मुख्यवादद्दवेंदु तोरिसुवदक्के, हिंदे हेळिद क्रमदंते ओंदु प्रकारद रूपवन्नु मोदलु हेळुवदु बिट्टु ई मूरन्नु मोदलु हेळिरुवरु–(आ मूरु रूपगळु यावेंदरे) अध्यात्मदेवतिगळिंद सहितवागि आ देवतिगळिगे नियामकवाद अध्यात्मवेंब रूपवु मोदलनेदु, अधिदैव नियामकवाद रूपवु एरडनेदु; अधिभूतदेवतिगाळिगे नियामकवाद भगवद्रूपवु मूरनेदु; 'हन्नेरडु इंद्रियगळेंदु हेळुवरु' एंब श्रुतियल्लि मनःसु, साक्षि ई एरडरिंद सहितवागि हन्नेरडु एंब तात्पर्यविरुवदु. आदरे लोकदल्लि ई मनःसु, साक्षि एंब एरडरन्नु बिट्टु ५ ज्ञानेंद्रियगळु ५ कर्मेंद्रियगळु ई प्रकार हत्तुइंद्रियगळे रूढियल्लिरुवुवु. हृदयवेंब पदवन्नु ज्ञानपरवागि अर्थमाडलु ओंदे एंदु एणिसल्पडुवदुः अंतःकरणपरवागि अर्थमाडलु अध्यात्म-अधिदैव-अधिभूत-अंतःकरणरूपगळेंब भेददिंद नाल्कुप्रकारवागिरुवदु. ' विराट् ' अत्यत प्रकाशवागतक्क रूपक्के ' विराट् ' एन्नुवरु, ब्रह्मनल्लि निंतु अत्यंतवागि सकलव्यापारगळन्नु माडिसतक्कवनादकारण श्रीहरियु प्राणनेनिसुवनु; ब्रह्मदेवन हत्तु इंद्रियगळल्लि इद्दद्दरिंद श्रीहरियु हत्तु प्रकारनागिरुवनु; ब्रह्मदेवन हृदयदल्लिद्दद्दरिंद ' एकविध ' ओंदे प्रकार इरुवनु. ' ब्रह्मांडवन्नु सृष्टिमाडि आ ब्रह्मांडदल्लि ताने प्रवेशमाडिदनु ' एंब श्रुतियल्लि हेळिदंते अध्यात्ममोदलाद मूररल्लि, श्रोत्रमोदलाद हत्तरल्लि, ओंदु हृदयदल्लि, ई प्रकार ई वस्तुगळल्लि श्रीहरियु प्रवेशमाडिद्दरिंद प्रवेशमाडिद आया वस्तुगळ संख्याभेददिंद परमात्मन भेदवु संभविसुवदे होर्तु वस्तुगत्या अवनल्लि भेदविल्लवेंदु ई श्लोकदल्लिय ' च ' शब्दवु हेळुवदु. प्राणमोदलाद हत्तु प्रकार वायुवादरू अध्यात्म–अधिदैव–अधिभूतगळेंब भेददिंद मूरु प्रकार इरुवुवु. (इदक्के श्रीमदाचार्यरु हेळिद प्रमाणवु–) प्राणमोदलाद ऐदु, नागमोदलाद ऐदु, ई प्रकार भौतिकवायुविनाल्लि

१. त्रैविध्यं सर्वदेव सहितस्य परमात्मनः दशविधत्वं मुख्यप्राणतत्पुत्रसहितस्य एकविधत्वं केवलस्येति संख्यातारतम्यमभिप्रेत्य क्रमोल्लंघनं । -(श्री.) २. प्राणइति एकवचनांतं पाठमवलंब्य प्राणो दशविधएव अध्यात्मादिभेदेन त्रिधा यत्रोक्तास्तेऽखिलाः तत्वाभिमानिन इत्यत्र व्याख्यातं । –(श्री.)

हत्तु प्रकार भेदवु; अध्यात्ममोदलाद भेदवुळ्ळ वायुगळु तत्वाभिमानिगळु अदरल्लियू अधिभूत वायुवादरू एरडु प्रकारवु– प्रधानवायुवेंतलू त्वगादिवायुवेंतलू इरुवदु. मुख्यवायुविनिंद मोदलु हुट्टिदवनु प्रधानवायुवु; त्वक् आत्मा इवे मोदलाद वायुगळु आ प्रधानवायुविन मक्कळेंदु हेळल्पट्टिरुवदु; ई प्रकृतक्के हेळतक्क प्रसंगबंदकारण इल्लि स्वल्पु हेळिरुवेवु. ॥ ९ ॥

स्मरन्विश्वसृजामीशो विज्ञापितमधोक्षजः ॥ विराजमतपत्स्वेन तेजसैषा विवृद्धये ॥ १० ॥

इदानीं तत्वानामस्माकमायतननिर्माणे शक्तिं देहीति यदुदितं तत्करणप्रकारमाह । स्मरन्निति । अधोक्षजो विराजं ब्रह्मशरीरमंतर्यामिरूपेण प्रविश्य स्वेन तेजसा तत् वैराजाख्यं ब्रह्मशरीरं एषामग्न्यादिदेवानां यथा आयतनानि भवंति तथा विवृद्धयेऽतपदवकाशवदकरोदित्यन्वयः॥ १० ॥

इन्नु तत्वाभिमानि देवतिगळु नमगे स्थळ (ब्रह्मांड) निर्माणमाडतक्क शक्तियन्नु नमगे कोडु एंदु परमात्मनन्नु एनु केळिकोंडिद्दरो अवर विज्ञापनेनडिसिद प्रकारवन्नु हेळुवरु– आ तत्वेशरु तन्नन्नु विज्ञापने माडिकोंडद्दन्नु परमात्मनु स्मरणेमाडिकोंडु विराट् एंब हेसरुळ्ळ ब्रह्मशरीरवन्नु अंतर्यामिस्वरूपदिंद श्रीहरियु प्रवेशमाडि तन्न तेजःसिनिंद आ वैराजवेंब ब्रह्मशरीरवन्नु ई अग्निमोदलाद तत्वेशरिगे इरुवदक्के स्थळवु ह्यागागबेको, हागे अभिवृद्धियागुवदक्के ' अतपत् ' ओळगे (ब्रह्मांडदोळगे) अवकाशवुळ्ळदन्नु (टोळ्ळागुवंते) माडिदनु. ॥ १० ॥

अथ तस्याभितप्तस्य कतिचायतनानिह ॥ निरभिद्यंत देवाना तानि मे गदतः शृणु ॥ ११ ॥

तापकार्यमाह अथेति । देवानां यान्यायतनानि तस्याभितप्तस्य शरीरस्य सकाशान्निरभिद्यंत विवृतानि अथ गदतो मम सकाशात्तानि शृण्वित्यन्वयः । कतिचेत्येकं पदं चशब्दः चित्पर्यायः हेत्यनेन " सोद्धचएवपुरुषंसमुद्धृत्यामूर्च्छयत्तमभ्यतपत्तस्याभितप्तस्यमुखंनिरभिद्यते-" त्यादिसमाख्या सूचयति ॥ ११ ॥

श्रीहरियु तन्न तेजःसिनिंद ब्रह्मांडवन्नु प्रकाशमाडिद्दर कार्यवन्नु हेळुवरु– (शुकाचार्यरु संबोधनमाडुवरु) हे परीक्षितने, आमेले आ श्रीहरिय तेजःसिनिंद प्रकाशमंतवाद आ वैराजवेंब ब्रह्मशरीरक्के (ब्रह्मांडक्के) तत्वाभिमानिदेवतिगळु इरुवदक्के केलवु अवयवगळु वडमूडिदवु, अवुगळन्नु निनगे हेळुवेनु अदन्नु केळु. ई श्लोकदल्लि ' कतिच ' एंबल्लि कति+च एंदु भिन्न पदक्कु माडदे ' कतिच ' एंदु ओंदे पदवु; अदरल्लियू च एंबदु चित् एंबदर स्थानदल्लिरुवदु; अंदरे ' कतिचित् '= केलवु एंब अर्थवन्नु हेळुवदु. आ परमात्मनु प्रलयोदकदिंद ब्रह्मांडवन्नु मेलक्के एत्ति तेगेदु अदन्नु प्रकाशमाडिदमेले आ ब्रह्मांडक्के मुखवु उत्पन्नवायितु. ' एंदु एरडने ग्रंथदल्लि हेळिद अर्थक्के ई श्लोकदल्लि हेळिद अर्थवु सरियादद्दंदु 'ह' एंब पदवु सूचिसुवदु. ११

तस्याग्निरास्यं निर्भिन्नं लोकपालोऽविशत्पदं ॥ वाचा स्वाशेन वक्तव्यं ययासौ प्रतिपद्यते ॥ १२ ॥

शरीरावयवेभ्यो मुखलक्षणावयवस्य प्राधान्यज्ञापनाय तदुत्पत्तिं तदभिमान्यभिमानोत्पत्तिं चाह तस्येति । तस्य ब्रह्मांतर्यामिणो विवक्षोर्हरेरास्यं मुखसंज्ञायतनं यन्नि-

१ सामान्यत उक्तस्याध्यात्मादिभेदस्य विशेषतः प्रतिपादनायायं श्लोकः । अत्र प्रथमानिर्दिष्टं अधिदैवं यद्वागादींद्रियं तदभिमानिरूपं तदध्यात्मं । यच्च प्रतिपत्तव्यतयोक्तं तदभिमानिरूपं च अधिभूतमिति ज्ञेयं । (श्री.)

भिन्नं विवृतं तत्पदं स्थानं लोकपालोऽग्निर्वाचा वागिंद्रियाख्यस्वांशेन सहाविशदित्यन्वयः । "अग्निर्वाग्भूत्वामुखंप्राविश-"दितिश्रुतिः । यया वाचा येन वागिंद्रियेण ब्रह्मशरीरवर्ती हरिर्वक्तव्यं वागिंद्रियविषयं व्यवहाराख्यं प्रतिपद्यते विज्ञाय व्यवहरतीत्यन्वयः । उत्तरग्रंथा एवमेव व्याख्येयाः ॥ १२ ॥

शरीरद अवयवगळल्लि मुखवेंबदे श्रेष्ठवादद्दींदु तिळिसुवदक्के आ ब्रह्माडक्के मुखवु मोदलु हुट्टितेंतलू उत्पन्नवाद आया अवयवगळल्लि, आया तत्वाभिमानिदेवतिगळिंगे इदु तम्म स्थानवेंदु अभिमानहुट्टिद संगतियन्नू हेळुवरु– आ विराट् ब्रह्मदेहदल्लि अंतर्यामियाद माताडबेकेंब इच्छेयुळ्ळ श्रीहरिंगे मुखवेंब स्थानवु वडमूडितो, अदरल्लि लोकपालकनाद अग्नियु तन्न कर्तव्यवाद वाग्व्यापार-(माताडोणवेंब व्यवहार) दिंद सहितनागि प्रवेशमाडिदनु. इदरंते ' अग्नियु वाग्व्यापारस्वरूपनागि मुखवन्नु प्रवेशमाडिदनु ' एंदु श्रुतियु हेळुवदु; याव वागिंद्रियादिंद विराट् ब्रह्मशरीरदल्लिद्द श्रीहरियु नालिगे एंब इंद्रियदिंद माताडुवकेलसवु नडेयुवदींदु लोकदल्लि प्रकटमाडि व्यवहरिसुवनु. ई प्रकारद मुंदिन ग्रंथदल्लि, अंदरे ई मुंदे हेळतक्क प्रतियोंदु इंद्रियगळू आया इंद्रियाभिमानिदेवतिगळू हींगे प्रकटरादरेंब अर्थवन्नु अल्लल्लि तिळियतक्कदु. ॥ १२ ॥

निर्भिन्नं तालु वरुणो लोकपालोऽविशद्धरेः ॥ जिव्हयांशेन च रसान्ययासौ प्रतिपद्यते ॥ १३ ॥ निर्भिन्ने अश्विनौ नासे विष्णोरावि शतां पदं ॥ घ्राणेनांशेन गंधस्य प्रतिपत्तिर्यतो भवेत् ॥ १४ ॥ निर्भिन्ने अक्षिणी त्वष्टा लोक पालोऽविशत्प्रभोः ॥ चक्षुषांशेन रूपाणां प्रतिप्रत्तिर्यतो भवेत् ॥१५॥ निर्भिन्नान्यथ चर्माणि लोकपालोऽनिलोऽविशत् ॥ प्राणेनांशेन संस्पर्शं येनासौ प्रतिपद्यते ॥१६॥ कर्णावस्य विनिर्भिन्नौ धिष्ण्यं स्वं विविशुर्दिशः ॥ श्रोत्रेणांशेन शब्दस्य सिद्धिं येन प्रपद्यते ॥१७॥ त्वचमस्य विनिर्भिन्ना विविशुर्धिष्ण्यमोषधीः ॥ अंशेन रोमभिः कंडूं यैरसौ प्रतिपद्यते ॥१८॥ मेढ्रं तस्य विनिर्भिन्नं स्वधिष्ण्यं क उपाविशत् ॥ रेतसांशेन येनासावानंदं प्रतिपद्यते ॥ १९॥ गुदं पुंसो विनिर्भिन्नं मित्रो लोकेश आविशत् ॥ पायुनांशेन येनासौ विसर्गं प्रतिपद्यते ॥२०॥

तालु जिव्हामूलं असौ हरिः प्रतिपद्यते जानाति ॥ १३ ॥ नासे नासिके ॥ १४ ॥ १५ ॥ चर्माणि त्वगिंद्रियस्थानानि ॥ १६ ॥ १७ ॥ ओषधीरोषध्यभिमानिदेवताः अस्य हरेः रोमभिरंशेन ॥ १८ ॥ कः प्रजापतिः रेतसा गुह्येंद्रियेणानंदं मैथुनोत्थसुखं ॥ १९ ॥ विसर्गं धातुमलोत्सर्जनादिक्रियां ॥ २० ॥

आमेले परमात्मनु इरतक्क आ विराट्देहक्के तालुप्रदेशवु उत्पन्नवायितु, अदरल्लि वरुणनेंब लोकपालकनु प्रवेशमाडिदनु. आ वरुणनु प्रवेशमाडिद नालिगेयिंद रसगळन्नु(रुचिगळन्नु) ३५३

१. यमश्च मित्रावरुणकुबेराश्च दिगीश्वराः इत्यैतरेयभाष्ये उक्तं । २. त्वगिंद्रियस्याभिमान्यंतरं विषयांतरं च दर्शयन्नाह । त्वचमस्येति । ओषधिदेवाः पारिजाताद्याः । –(या.)
३. व्यवहरतीति यावत् । –(या.)

तिळिदुकोळ्ळुव व्यवहारवन्नु विष्णुवु नडेसुवनु. ॥ १३ ॥ विष्णुविन सन्निधानवुळ्ळ आ विराट्देहक्के एरडु नासिकाद्वारगळु उत्पन्नवादवु; अवुगळल्लि अश्विनिदेवतिगळु प्रवेशमाडिदरु. आ घ्राणेंद्रियवेंब भागदिंद गंधद ज्ञानवागतक्क व्यवहारवु नडेयुवदु. ॥ १४ ॥ आमेले आ विराट्देहक्के एरडु नेत्रगळु उत्पन्नवादवु; अवुगळल्लि सूर्यनेंब लोकपालकनु प्रवेशमाडिदनु. आ कण्णुगळिंद (कप्पु-कॆंपुमोदलाद) रूपगळन्नु तिळकोळ्ळुव व्यवहारवु नडेयुवदु. ॥ १५ ॥ आमेले आ विराट्देहक्के चर्मगळु अंदरे त्वगिंद्रियवु इरतक्क स्थानगळु उत्पन्नवादवु; अवुगळल्लि वायुवेंब लोकपालकनु प्रवेशमाडिदनु. आ प्राणनेंब मुख्य वायुविनिंद शीत-उष्ण-मृदु-कठिणमोदलादद्दु तिळकोळ्ळुव व्यवहारवु नडेयुवदु. ॥ १६ ॥ आमेले आ विराट्देहक्के किंविगळु उत्पन्नवादवु; आ किंविगळल्लि तावु इरतक्क स्थानवेंदु यम-मित्रावरुण-कुबेर-इवरेमोदलाद देवतिगळु प्रवेशमाडिदरु. अल्लि श्रोत्रेंद्रियवेंब भागदिंद शब्दसंबंधवाद व्यापारवु नडेयुवदु. ॥१७॥ आमेले आ विराट्देहक्के त्वगिंद्रियवु (चर्मदल्लि आश्रयिसिगोंडिरुवदु) उत्पन्नवायितु. अदरल्लि औषधिगळिंगे अभिमानिगळाद पारिजातमोदलाद देवतिगळु प्रवेशमाडिदरु. अल्लि रोमकूपगळ भागदिंद ' कंडूयन ' तिंडियिंद तुरिसुव व्यवहारवन्नु ई श्रीहरियु नडेसुवनु. ॥ १८ ॥ आमेले आ विराट्देहक्के ' मेंढ्रं ' गुह्येंद्रियवु (अंदरे मूत्रद्वारवु) उत्पन्नवायितु. अल्लि तानु इरतक्क स्थानवेंदु ' क ' एंब प्रजेश्वरनु (दक्षप्रजेश्वरनु) प्रवेशमाडिदनु. अल्लि मैथुनव्यवहारदिंद उत्पन्नवाद रेतःसिन भागदिंद आनंदवागुवदु. ॥ १९ ॥ आमेले आ विराट्देहक्के गुदद्वारवु उत्पन्नवायितु. अल्लि मित्रनेंब लोकपालकनु प्रवेशमाडिदनु. अल्लि पायु एंब भागदिंद मलविसर्जन-(देहदोळगिन कश्मलवन्नु होरगे हाकोण) दिंद श्रीहरियु व्यवहार नडेसुवनु. २०

हस्तावस्य विनिर्भिन्नाविंद्रः स्वर्पतिराविशत् ॥ वार्तयाशेन पुरुषो यया वृत्तिं प्रपद्यते ॥ २१ ॥ पादावस्य विनिर्भिन्नौ लोकेशो विष्णुराविशत् ॥ गत्या स्वांशेन पुरुषो यया प्राप्यं प्रपद्यते ॥२२॥ हृदयं चास्य निर्भिन्नं चंद्रमा धिष्ण्यमाविशत् ॥ मनसांशेन येनासौ विक्रियां प्रतिपद्यते ॥ २३ ॥ ॥ ॥ ॥ ॥ ॥

" इंद्रोवृषात्मशक्रार्केषु-" इत्यभिधानादिंद्रशब्दस्य पुरंदरादन्यविषयत्वनिरासाय स्वर्पतिरित्युक्तं वार्तया हस्तेंद्रियेणांशेन वृत्तिमादानाख्यां ॥ २१ ॥ गत्या गतिसाधनपादेंद्रियेण ॥ २२ ॥ हृदयं मनोनिवासस्थानं मनसेंद्रियेण विक्रियां संकल्पविकल्परूपां ॥ २३ ॥

आमेले आ विराट् देहक्के एरडु कैगळु उत्पन्नवादवु; अवुगळल्लि स्वर्गपतियाद देवेंद्रनु प्रवेशमाडिदनु. आ कैगळल्लि केलसमाडुव भागदिंद आ विराजांतर्गतनाद श्रीहरियु सकल कोडुव तेगेदुकोळ्ळुव व्यवहारवन्नु नडेसुवनु. ई श्लोकदल्लि इंद्रनेंब शब्दप्रयोगमाडिरलु ' स्वर्पतिः ' एंब हेच्चिन विशेषणवु याकेंदरे ' इंद्र ' एंब शब्दवु श्रेष्ठदल्लियू आत्मनल्लियू सूर्यनल्लियू प्रयोगविदरिंद इल्लि इंद्र एंब शब्दक्के देवेंद्रने एंदु अर्थमाडबेकेंदु तिळिसुवदक्के ' स्वर्पतिः ' एंब विशेषणविरुवदु. ॥ २१ ॥ आमेले ई विराट् ब्रह्मदेहक्के पादगळु उत्पन्नवादवु. अल्लि पादाभिमानियाद (इंद्रनपुत्रनाद) जयंतनु प्रवेशमाडिदनु. आ जयंतनिगे आश्रयनागि श्रीविष्णुवु इरुवने हॊर्तु पादाभिमानियु विष्णुवेंदल्लवु; वोडाडुवदक्के साधकवाद पादवेंब इंद्रियदिंद

१. अत्र पाददेवो जयंतः विष्णुस्तु उपेंद्ररूपेण तदाश्रयतयैवोक्तः न त्वभिमानितयेत्यर्थः । –(या.)

होसदागि संपादिसतक्कद्दन्नु श्रीविष्णुवु होंदिमुवनु. ॥ २२ ॥ आमेले आ विराट् देहक्के मनःसु इरतक्क हृदयवु उत्पन्नवायितु. अल्लि चंद्रनु तन्नस्थानवेंदु प्रवेशमाडिदनु. आ हृदयदल्लि मनसिन व्यापारवाद संकल्पविकल्पगळन्नु (संकल्पवेंदरे इदन्नु माडबेकेंब निश्चयतनवु, विकल्पवेंदरे इदु माडिदरे साधकवो बाधकवो एंब विचारवु) चंद्रनल्लिद्द परमात्मनु नडेसुवनु. ॥२३॥

आत्मानं चास्य निर्भिन्नं वाचस्पतिरुपाविशत् ॥ बुद्ध्या स्वांशेन येनासौ निश्चयं प्रतिपद्यते ॥ २४ ॥ अहं चास्य विनिर्भिन्न-
मभिमानोऽविशत्पदं ॥ कर्त्रा स्वांशेन येनासौ कर्तव्यं प्रतिपद्यते ॥ २५ ॥ सत्वं चास्य विनिर्भिन्नं महान् धिष्ण्यमुपाविशत् ॥
चित्तेनांशेन येनासौ विज्ञानं प्रतिपद्यते ॥ २६ ॥ ॥ ॥ ॥ ॥ ॥

आत्मानं आत्मनाडीविशेषमुत्पन्नं वाचस्पतिर्बृहस्पतिः बुद्ध्या स्वांशेनाविशत् यया बुद्ध्या असौ हरिर्नियतो ब्रह्मा निश्चयं प्राप्नोति। "आत्मनाड्यांतथा बुद्धिस्तत्रस्थश्चबृहस्पति-"रित्यत आत्मशब्देनात्र नाड्येवोच्यते ॥ २४ ॥ अस्य ब्रह्मणो देहस्य निर्भिन्नमहन्नामनाडीविशेषं अभिमानोहंकारो हरेः पदं स्वस्थानम-विशत् कर्त्रा स्वांशेन अहंकर्तेत्यभिमानेन सह येन कर्त्रंशेन ॥ २५ ॥ महान् ब्रह्मा सत्त्वं सत्त्वनाडीविशेषं धिष्ण्यं स्वस्थानं चित्तेनाविशत् असौ ब्रह्मांतर्यामी ब्रह्मा च। "शतंचैकास्यहृदयस्यनाड्य" इतिश्रुतेः। बहुत्वान्नाडीनां किमेते विशेष्योच्यंतइति चेदुच्यते ब्रह्मनाड्या अवांतरत्वज्ञापनाय एतयोर्मुख्याभिमानी ब्रह्माचेति। तदुक्तं "अहंसत्त्वमितिद्वेधा ब्रह्मनाड्याअवांतरं। कर्तृनामात्वहंकारस्त्वहंनाड्यांव्यवस्थितः। सत्वनाड्यांतथाचित्तमभिमानोहरस्तथा। अहंनाड्यांसत्वनाड्यां ब्रह्मा-चैवव्यवस्थित" इति ॥ २६ ॥

आमेले आ ब्रह्मांडक्के 'आत्मा' एंब नाडीविशेषवु उत्पन्नवायितु. अदरल्लि बृहस्पतियु बुद्धि एंब तन्न अंशदिंद प्रवेशमाडिदनु. याव बुद्धियिंदले वेदप्रतिपाद्यनाद परब्रह्मनु निश्चय-वन्नु होंदुवनु. 'आत्मनाडियल्लि बुद्धियिरुवदु, अल्लि बृहस्पतियिरुवनु,' एंब प्रमाणदिंद ई श्लोकदल्लि हेळिद आत्मशब्दादिंद आत्मनाडी एंतले अर्थमाडतक्कदु. ॥ २४ ॥ आमेले ई ब्रह्मदेहक्के अहं एंब विशेषवादनाडियु उत्पन्नवायितु. अदरल्लि 'अभिमानः' अहंकारतत्वाभिमानियाद रुद्रनु प्रवेशमाडिदनु. अल्लि अभिमानद भागदिंद रुद्रांतर्गतनाद श्रीहरियु 'कर्तव्यं-प्रतिपद्यते' इदु माडतक्कदेंदु तिळिसुवनु. ॥ २५ ॥ आमेले आ विराट् ब्रह्मशरीरक्के सत्वनाडी एंबदु उत्पन्नवायितु. अल्लि महान् एंदु करिसिगोळ्ळुव ब्रह्मनु प्रवेशमाडिदनु. आ ब्रह्मांतर्या-मियाद ब्रह्मनामकनाद श्रीहरियु आ सत्वनाडियल्लिदु चित्तनियामकनागि 'विज्ञानंप्रतिपद्यते' विशेषवाद तत्वज्ञानद व्यवहार माडिकोडुवनु. 'नूराऑदु नाडीगळु ई हृदयदल्लिरुवु' एंदु श्रुतियु हेळुवंते देहदल्लि अनेक नाडीगळु इरलु अवुगळन्नेल्ल हेळुवदन्नु बिट्टु ई नाडीगळन्ने हेच्चागि याके हेळिदंरेंदरे ई नाडीगळु एल्ल नाडीगळल्लि श्रेष्ठवाद ब्रह्मनाडियोळगिन अवांतरभेदवुळ्ळवु; (इदक्के प्रमाणवु) अहंनाडि एंतल्ल सत्वनाडि एंतल्ल ब्रह्मनाडियल्लि अवांतरभेदविरुवदु. कर्तृनामकवाद अहंकारतत्वाभिमानियाद रुद्रनु अहंनाडियल्लिरुवनु. सत्वनाडियल्लि चित्ताभिमानियाद हरनु नियामकनागिरुवनु, मत्तू अहंनाडियल्लियू सत्वनाडियल्लियू ब्रह्मनु नियामकनागिरुवनु. ॥ २६ ॥

शीर्ष्णोऽस्य द्यौर्धरा पद्भ्यां खं नाभेरुदपद्यत ॥ गुणानां वृत्तयो येषु प्रतीयंते सुरादयः ॥ २७॥ औत्पत्तिकेन सत्त्वेन दिवं देवाः
प्रपेदिरे ॥ धरां रजःस्वभावेन पणयो ये च ताननु २८ तार्तीयेन स्वभावेन भगवन्नाभिमाश्रिताः ॥ उभयोरंतरं व्योम ये रुद्रपार्षदा गणाः२९

शीर्ष्णः शिरसः धरा भूमिः खमंतरिक्षं येषु प्राणिषु सत्वादिगुणानां वृत्तयः सुखकर्मप्रमादलक्षणाः स्वतो दृश्यंते तेषु लोकेषु सुरासुरादयो वसंतीति-शेषः आदिशब्देन मनुष्या रुद्रपार्षदगणा गृह्यंते ॥ २७ ॥ एतदेव विवृणोति औत्पत्तिकेनेति औत्पत्तिकेन स्वाभाविकेन सत्वेन स्वाभाविकसात्विकत्वात् पणयो हानोपादानव्यवहारं कुर्वतो मनुष्याः ये च तान् पणीननु अनुगतास्तेपि ॥ २८ ॥ तार्तीयेन तामसेन स्वभावेन भगवन्नाभिमंतरिक्षमाश्रिताः रुद्रपार्षदगणाः उभयो-र्द्यावापृथिव्योरंतरं मध्यं व्योमाश्रिता इतिशेषः ॥ २९ ॥

इदूवरेगू विराट् ब्रह्मदेहदल्लि एल्ल तत्वेशरप्रवेशवन्नु हेळि, इन्नु आ विराट् ब्रह्मदेहदिंद मूरुलोकगळु उत्पन्नवाद संगतियन्नु हेळुवरु—ई विराट् ब्रह्मशरीरद शिरःसिनिंद द्युलोकवु (स्वर्गलोकवु) उत्पन्नवायितु; पादगळिंद भूलोकवु उत्पन्नवायितु; नाभियिंद अंतरिक्षलोकवु उत्पन्नवायितु. ई मूरुलोकगळल्लि सत्वरजस्तमोगुणगळ व्यापारवाद सुख-कर्म-प्रमाद-गळेंब स्वभाववुळ्ळ देवतिगळु मनुष्यरु दैत्यरु रुद्रभृत्यरु वासिसुवरु. ॥ २७ ॥ ई हिंदे हेळिद्दन्ने विवरिसुवरु—स्वाभाविक सत्वगुण (सहजवाद समाधानगुण) उळ्ळवराद्दरिंद देवतिगळु स्वर्गलोकवन्नु होंदिदरु; रजोगुणद स्वभावदिंद कोडुतोगोळ्ळुव व्यवहारमाडतक्क मनुष्यरू अवरन्ननुसरिगोंडिरतक्क मनुष्यरू (अथवा पश्वादिगळु) भूलोकदल्लि वासिसुवरु. ॥२८॥ परमात्मन आ वासस्थानवाद विराट् देहद नाभियिंद उत्पन्नवाद स्वर्ग मत्तू भूलोकद मध्यदल्लिद्द अंतरिक्षलोकदल्लि मूरने गुणवाद तमोगुणद स्वभाववुळ्ळ रुद्रभृत्यसमूहवु वासमाडुवदु. ॥ २९ ॥

मुखतोऽवर्तत ब्रह्म पुरुषस्य कुरूद्वह ॥ यत्रोन्मुखत्वाद्वर्णानां मुख्योऽभूद्ब्राह्मणो गुरुः ॥ ३० ॥
बाहुभ्योऽवर्तत क्षत्रं क्षत्रियस्तदनुव्रतः ॥ यो जातस्त्रायते वर्णान्पौरुषात्कंटकक्षतात् ॥ ३१ ॥

इदानीं वर्णोत्पत्तिं तदभिमान्युत्पत्तिं च वक्ति मुखत इति। पुरुषस्य ब्रह्मांतर्यामिणो मुखतो ब्रह्मजातिरवर्तत। अत्र ब्रह्मशब्देन ब्राह्मणजातिः तदुत्पन्ना ब्राह्मणास्त-ज्जात्यभिमानिन उच्यंत इति ज्ञापनाय ब्रह्मेत्युक्तं उत्तरत्राप्येवमेवानुसंधेयं। "ब्रह्माभिमानीतुभृगुरजनिब्रह्मणो मुखात्। क्षत्राभिमानीतुमनुर्ब्रह्मबाहोरजायते-" त्यादि-वचनेन श्रुतव्याख्येयमित्यपवादं निवारयति। यत्र हरावुन्मुखत्वाद्ब्राह्मणस्त्रिवर्णानां मुख्यो गुरुरभवत् तस्य पुरुषस्यैव तत्त्वोपदेशात् तत्त्वज्ञानदानेनाविद्यादिदोषनि-गिरणाच्च गुरुरित्यर्थः। गृशब्दे गृनिगिरणइतिधातुः ॥ ३० ॥ तं ब्राह्मणमनुव्रतः क्षत्रशब्दं निर्वक्ति यइति। कंटकाः शत्रवः। "वेणौद्रुमांगेरोमांचे क्षुद्रशत्रौचकं-
११९ टक"इति यादवः। क्षतात् त्रायत इति क्षत्रं ॥ ३१ ॥

इन्नु आ विराट् मूर्तियिंद जातिगळु उत्पन्नवाद क्रमवन्नू हागू आया जातिगळिगे मुख्यपुरुषराद जात्यभिमानिगळेंदेनिसिगोंडवर उत्पत्तिक्रमवन्नू हेळुवरु—एलै कुरुकुलदल्लि उत्पन्नराद परीक्षितने, आ विराट् ब्रह्मन अंतर्यामियाद श्रीहरिय मुखदिंद ब्राह्मणजातियु उत्पन्नवायितु. ई श्लोकदल्लि ब्रह्म एंब शब्दादिंद ब्राह्मणजातियंदर्थमाडबेकु; यार्केंदरे, आ विराट् ब्रह्मदेहद

मुखदिंद मोदलु उत्पन्नरादवरु ब्राह्मणजातिगे अभिमानिगळेंदु तिळिसुवदक्के ' ब्रह्म ' एंदु प्रयोग माडिदरु; मुंदिन ग्रंथदल्लि यादरू इदे प्रकारवे अनुसंधानमाडि अर्थमाडबेकु. " आ विराट् ब्रह्मन मुखदिंद ब्राह्मण जातिगे अभिमानियाद (मुख्यनाद) भृगऋषियु मोदलु उत्पन्ननादनु; आ विराट् ब्रह्मन भुजगळिंद क्षत्रजातिगे अभिमानियाद मनुवु उत्पन्ननादनु. 'ऊर्वोर्विडभिमानीच वास्तुःपादात्कृतिस्तथा । एते पूर्वं हरेर्जाता ब्रह्मणस्तदनंतरं ॥ एवं रुद्राच्च वायोश्च तदंतस्थहरेर्यतः—इति षाड्गुण्ये ' मत्तू आ विराट् ब्रह्मदेहद तोडेगळिंद वैश्यजातिगे अभिमानियाद ' वास्तु ' एंबवनु उत्पन्ननादनु; हागू पाददिंद शूद्रजातिगे अभिमानियाद कृति-एंबवनु उत्पन्ननादनु. " ई प्रकार इंथिंथ जातिगे इंथिंथ अभिमानिपुरुषरु उत्पन्नरादरेंदु ई श्लोकदल्लिद पदगळिंगे अर्थमाडिरुवदु. मेले हेळिद श्रीमदाचार्योक्तप्रमाणानुसारविद्दरिंद याव अपवादविल्लद्दागिरुवदु. ' मुखादुद्भतत्वात् उत्पन्नत्वात् उन्मुखः ' याव परमात्मन मुखदिंद उत्पन्ननाद कारण (मुखव्यापारदिंदले एंदरे वेदाभ्यासदिंदले उपजीवितनागतक्कवनादकारण) ब्राह्मणनु केळगिन मूरुजातियवरिंगे गुरु आगिरुवनु. ई ब्राह्मणनिंगे गुरुवेंब शब्दवु बागे बंदिर्तेदरे हेळुवरु- ' गृ ' एंब धातुवु नुंगु एंब अर्थवन्नु हेळुवदु. ई ब्राह्मणनु आ वेद प्रतिपाद्यनाद श्रीहरिय (परब्रह्मन) तत्वोपदेशमाडुवदरिंदलू शिष्यरिंगे तत्व- (रहस्य) ज्ञानवन्नु दानमाडुवदरिंदलू अज्ञानमोदलाद दोषगळन्नु नुंगिरुवदरिंद गुरुवेंदेनिसुवनु. ॥ ३० ॥ भुजगळिंद उत्पन्ननाद क्षत्रियनु आ ब्राह्मणन सेवकनागिरुवनु. क्षत्रियनेंदु याके अन्नुवरेंदरे ' क्षत ' एंब शब्दवु बिदरिनल्लि गिडद टोंगियल्लि रोमांचदल्लि क्षुद्रशत्रुगळल्लि प्रयोगिसल्पडुवदु एंदु कोशविद्दकारण, प्रकृतक्के क्षतवेंदरे क्षुद्रशत्रुवेंदर्थवु. प्रजरिंगे बंद क्षुद्रशत्रुगळ बाधेयिंद अवरन्नु संरक्षिसुववनाद्दरिंद क्षत्रियनेंदेनिसुवनु. ॥ ३१ ॥

विशोऽवर्तत तस्योर्वोर्लोकवृत्तिकरीर्विभोः ॥ वैश्यस्तदुद्भवो वार्तां नृणां यः समवर्तयत् ॥ ३२ ॥
पद्भ्यां भगवतो जज्ञे शुश्रूषार्कर्म सिद्धये ॥ तस्यां जातः पुरा शूद्रो यद्वृत्त्या तुष्यते हरिः ॥ ३३ ॥

विशो वैश्यजातयः तदभिमानीवास्तुश्च । वार्तां कृषिगोरक्षणादिजीवनं । "आजीवोजीविकावार्ता वृत्तिर्वर्तनजीवने । स्त्रियांकृषिःपाशुपाल्यंवाणिज्यंचेतिवृत्तय" इत्यमरः । विष्णुब्रह्मवायुरुद्रेभ्यो जातत्वाद्विश इति बहुवचनं । "एतेपूर्वंहरेर्जाता ब्रह्मणस्तदनंतर-"मित्यादेः । विरिंच्यादिभ्यो जन्म चेत् "यद्वृत्त्यातुष्यतेहरि-" रेतत्कथं युक्तमितिचेन्न । तदंतस्थस्य हरेर्जातत्वात् । तदंतस्थहरेर्जानिरिति वा ॥३२॥ शूद्रजात्यभिमानी कृतिः कृतिनामा शुश्रूषाकर्मसिद्धये शुश्रूषाख्यकर्मसाधनाय पुरादिसृष्टौ यस्य शुश्रूषाख्यया वृत्त्या ॥ ३३ ॥

१. वार्तां कुप्यादिरूपां जीविकां विट्शब्दोक्तकृप्यादिव्यापारकर्तृत्वाद्वैश्यइतिनिर्वचनं अत्र ज्ञातव्यं । -(या.) २. त्रिवर्णानां सेवा किमर्थं ? कर्मसिद्धये । अत्र कर्मशब्देन शूद्रजन्मापादकमदृष्टं ग्राह्यं तस्य सिद्धये साफल्याय तस्यां तदर्थं तां कर्तुमिति यावत् । पुरा पूर्वं शूद्रः तज्जात्यभिमानीकृतिः भगवतः पद्भ्यां जात इत्यर्थः । अनेन पादोद्भवत्वात्पादोद्भवं कर्म सेवाख्यं तस्य वृत्तिं कृतवानित्यपिज्ञातव्यं । ननु शुश्रूषया कथं शूद्रजन्मापादकादृष्टस्य साफल्यमित्यत आह । यद्वृत्त्येति । यस्य शूद्रस्य वृत्त्या शुश्रूषारूपया भगवदनुसंधानेन कृतया हरिस्तुष्यते । हरितोषजनकत्वमेव कर्मणः साफल्यमितिभावः । अनेन शुचा शूद्रजन्मप्राप्तोस्मीति शोकेन द्रवति सेवां करोतीति शूद्र इति निर्वचनं सूचितं ज्ञातव्यं । -(या.)

आ विराट् मूर्तिय तोडेगळिंद वैश्यजातिगळू आ वैश्यजात्यभिमानियाद वास्तुएंबवनू उत्पन्नरादरु. ई वैश्यजातियवन उद्योगवेनेंदरे ' कृषि-गोरक्षा-वाणिज्य ' कृषि एंदरे भूमियन्नु बित्तिबेळकोळ्ळोणवु; गोरक्षा-दनकरुगळिंद बदुकुविकेयु; वाणिज्यवेंदरे क्रय-विक्रयरूपवाद (माराटक्के तेगेदुकोळ्ळोण मत्तू कोडोण) व्यापारवु; ई मूरु प्रकारद उद्योगवु वैश्यधर्मवु. ' विशः ' वैश्यजातिगळेंदु बहुवचनप्रयोगवन्नु याके माडिदरेंदरे— विष्णु. ब्रह्म, वायु, रुद्र इवरिंद ई वैश्यरु हुट्टिद्दरिंद बहुवचनप्रयोगवु. ' इवरु मोदलु हरियिंद हुट्टिदरु; आमेले ब्रह्मनिंद हुट्टिदरु ' एंब इवे मोदलाद प्रमाणगळिरुवदु. ओळ्ळेदु, ब्रह्मादिगळिंद हुट्टिद ई जनर वृत्तियिंद श्रीहरियु तुष्टनागुवनेंबदु एनु संगतवु एंदरे, ई वैश्यादिगळु ब्रह्मादिगळल्लि अंतर्यामियागिद्द श्रीहरियिंदले हुट्टिरुवरु. ॥ ३२ ॥ शूद्रजात्यभिमानियाद कृतियंबवनु ई मेले हेळिद ३ जातियवर सेवाकार्यवु नडेयुवदक्कागि मोदलु सृष्टियल्लि सेवावृत्तियुळ्ळवनागि पादगळिंद उत्पन्ननादनु. [आ ब्राह्मण, क्षत्रिय, वैश्य ई मूरु जातिय जनर सेवेयन्नु ई शूद्रनु याके माडबेकेंदरे ' कर्मसिद्धये ' तनगे शूद्रजन्मवु बरुवदक्के कारणवाद हिंदिन जन्मद कर्मवु सफलवागुवदक्के ई जन्मदल्लि (शूद्रजन्मदल्लि) आ मूवर सेवेयन्नु माडुवदक्के ' पुरा ' पूर्वदल्लि आ शूद्रजात्यभिमानियाद कृति एंबवनु परमात्मन पादगळिंद उत्पन्ननादनु. शूद्रनु परमात्मन पादगळिंद हुट्टिद कारण आ पादगळिंद आगुव कार्यवाद सेवा एंबदन्ने आ शूद्रनिगे वृत्ति-(बदुकुविके) यन्नागि माडिदनु एंदु तिळियतक्कदु. ओळ्ळेदु, ई जनर सेवेयिंद आ शूद्रजन्मवु बरुवदक्के कारणवाद जन्मांतरद कर्मवेंब अदृष्टवु बागे सफलवागुवदु ? एंदरे हेळुवरु— ' यद्वृत्त्यातुष्यतेहरिः ' शूद्रनु तन्न मेलिन मूरु जातिय जनर सेवेयन्नु माडुवदु श्रीहरिय आज्ञेयु (अवनसेवेयु) एंदु तिळिदु माडिदरे श्रीहरियु तुष्टनागुवनु. ई सेवेयिंद श्रीहरियु तृप्तियागुवदरिंद जन्मांतरद कर्मगळु सफलवे सरि. शूद्रनेंब शब्दार्थवेनेंदरे— ' शुचा ' जन्मांतर कर्मदिंद नानु कीळजातियल्लि हुट्टिदेनय्यो; एंब श्लोकदिंद ' द्रवति ' सेवावृत्तियन्नु माडुवनु एंदु शूद्र शब्दार्थ हेळल्पट्टितु. ई प्रकार यादवार्यर अभिप्रायवु.] ॥ ३३ ॥

एते वर्णाः स्वधर्मेण यजंते स्वगुरुं हरिं ॥ श्रद्धयात्मविशुद्ध्यर्थं यज्जाताः सह वृत्तिभिः ॥ ३४ ॥

एतेषां स्वस्ववर्णविहितकर्मैव श्रीहरियजनात्मकत्वेन तत्तुष्टिकरं नान्यदितिभावेनाह एतइति । तत्र हेतुमाह यज्जाताइति । स्वस्वविहितवृत्तिभिःसह विष्णोर्जाता यद्यस्मात्तस्मात् पितृत्वाद्गुरुत्वादिष्टदेवतात्वात्स्वामित्वाच्च आत्मविशुद्ध्यर्थं अंतःकरणनैर्मल्याय ॥ ३४ ॥

ई मेले हेळिद नाल्कु जातिय जनरिगू तम्म तम्म जातिगे उचितकेलसमाडुवदे श्रीहरिय पूजारूपवाद्दरिंद अदे श्रीहरिय संतोषक्के कारणवाददु बेरेयावदू अल्लवेंदु हेळुवरु— ई नाल्कु जातिय जनरु तम्म तम्म जातिगे उचितवाद उद्योगगळिंद सहितवागि श्रीविष्णुविनिंदले हुट्टिदकारण आ श्रीविष्णुवे तंदेयाद्दरिंदलू गुरुवाद्दरिंदलू इष्टदेवतेयाद्दरिंदलू स्वामियाद्दरिंदलू भक्तिपूर्वकवागि ' आत्मविशुद्ध्यर्थं ' अंतःकरणनिर्मलवागुवदक्के आ श्रीहरियन्ने पूजिसुवरु. ॥ ३४ ॥

एतत्क्षत्तर्भगवतो दैवकर्मात्मरूपिणः ॥ कः श्रद्ध्यादुदाहर्तुं योगमायाबलोदयं ॥ ३५ ॥

एवंविधस्य हरेर्माहात्म्यं पुरुषायुषशतेनापि वर्णयितुं न कस्यापि शक्तिरित्याह एतदिति । भगवानेवमतीतानागतवर्तमानानंतब्रह्मांडानां निर्मातेति यतोऽतो दैवकर्मात्मरूपिणः देवेष्वधिकत्वाद्दैवं सर्वस्य मूलकारणत्वात्कर्म व्याप्तत्वादात्मा एवंविधं रूपं स्वभावोऽस्यास्तीति । "रूपंशब्देपशौश्लोकेग्रंथावृत्तौहितादिषु । सौंदर्ये च

स्वभावेचे-''ति यादवः। तस्य भगवतो योगमायायाः स्वरूपमहिम्नो बलोदयं शक्तिप्रसरं कः पुमानुदाहर्तुं सदृष्टांतं वक्तुं श्रद्दध्यात् श्रद्धां कुर्यादनंतत्वादितिशेषः '' अधिकत्वाद्दैवशब्दो दैवतेष्वधिकोयतः। दैवंहरिःकर्ममूलं कृतिरित्येवमण्यते। व्याप्तत्वादात्मशब्दश्च श्रीपतित्वाच्चमाधव '' इति वचनादुक्तएवार्थो '' दैवंदिष्टंभागधेय-'' मित्याद्यभिहितो न भवति ॥ ३५ ॥

इंथ महामहिमेयुळ्ळ परमात्मन माहात्म्येयु नूरारु पुरुषर आयुष्यदिंदादरू वर्णिसुवदक्के यारिगू शक्तियिल्लवेंदु हेळुवरु– (मैत्रेय ऋषिगळु हेळुवरु–) हे विदुरने, हिंदे होद मुंदे बरुव ईय्ये इरुव अनेक ब्रह्मांडगळिगे सृष्ट्याद्यष्टकर्तृवु श्रीहरिये आद्दरिंद, 'दैवकर्मात्मरूपिणः'– रूप एंब शब्दवु शब्ददल्लियू पशुविनल्लियू श्लोकदल्लियू ग्रंथद आवर्तनदल्लियू हितमादलादवुगळल्लियू सौंदर्यदल्लियू स्वभावदल्लियू प्रयोगिसल्पडुवदेंदु यादवकोशदल्लि हेळिद्दरिंद ई प्रकृतक्के 'रूप' एंदरे स्वभाववेंदु अर्थ माडलागुवदु, देवतिगळल्लि ई श्रीहरियु अधिकनादकारण 'दैव' नेनिसुवनु; एल्लक्कू मूलकारणनाद्दरिंद 'कर्म' एंदेनिसुवनु; सर्वत्र व्याप्तनादकारण 'आत्मा' एंदेनिसुवनुः इंथस्वरूपवुळ्ळ परमात्मन 'योगमायाबलोदयं' स्वरूपमहिमेसामर्थिय विस्तारवन्नु याव पुरुषनु दृष्टांतपूर्वकवागि हेळुवदक्के श्रद्धावंतनादानु? आ श्रीहरिय महिमेयु असंख्यवादकारण यारू हेळलारर्देर्थवु. 'दैवकर्मात्मरूपिणः' एंब पदक्के मेले हेळिद अर्थवु यावप्रमाणानुसारवागिरुवदेंदरे 'देवतिगळल्लि हेच्चिनवनाद्दरिंद इवनिगे दैवनेंदेन्नुवरु. कर्मगळिगे मूलकारणनाद्दरिंद कर्म एंदेनिसुवनु; व्याप्तनादकारण आत्माएंदेनिसुवनु; लक्ष्मीपतियाद्दरिंद माधवनेनिसुवनु;' 'ई प्रकार श्रीमदाचार्यरु उदाहरिसिद प्रमाणानुसारवागि अर्थमाडल्पट्टदेये होर्तु '' दैवंदिष्टं '' एंब कोशदल्लि हेळिदंते अर्थवागुवदिल्ल. ॥ ३५ ॥

अथापि कीर्तयाम्यंग यथामति यथाश्रुतं ॥ कीर्तिं हरेः स्वां संस्कर्तुं गिरमन्याभिधां सतीं ॥ ३६ ॥

भगवन्माहात्म्यकथानुवर्णनसामर्थ्याभावेपि स्वप्रयोजनवशाद्वक्ष्यामीत्याह अथापीति। यद्यप्यानंत्याद्वक्तुं न शक्नोमि तथापि हरेरन्यस्याभिधानं यस्याः सा अन्याभिधा तां स्वां गिरं संस्कर्तुं अन्यवार्तापरित्यागेन सतीं कर्तुमित्यर्थः ॥ ३६ ॥

इष्टु महिमेयुळ्ळ परमात्मन माहात्म्यकथेगळन्नु वर्णिसुव सामर्थियु ननगे इल्लदिद्दरू नम्म प्रयोजनविद्दकारण हेळुवेनेंदु मैत्रेय ऋषिगळु हेळुवरु– एलै परममित्रनाद विदुरने, यद्यपि श्रीहरिय महिमेगळु अनंतवादकारण अवुगळन्नु हेळुवदक्के ननगे शक्तियिल्लवु. आदाग्यू 'हरेरन्याभिधांगिरंस्वां' श्रीहरिय महिमेगळहोर्तु एरडने शब्दगळन्नादरू ई नालिगेयु आडुवदष्टे आ एरडने हाळुहरटे यन्नाडुवदु बिडिसि आ नन्न वाणियन्नु श्रीहरिय गुणगळवर्णनेयिंद संस्कारमाडि उत्तमरीतियिंद शुद्धपडिसुवदक्के आ श्रीहरिय महिमेयन्नु नम्म गुरुगळ मुखदिंद एष्टु श्रवणमाडिरुवेनो, ईग्ये ननगे एष्टु तोरुवदो, अष्टु हेळुवेनु. ॥ ३६ ॥

एकांतलाभं वचसो नु पुंसः सुश्लोकमौलेर्गुणवादमाहुः ॥ श्रुतेश्च विद्वद्भिरुपाकृतायाः कथासुधाया उत संप्रयोगः ॥३७॥

वागादींद्रियाणां जन्मलाभोयमेवेत्याह एकांतलाभइति। पुंसो वचसो वागिंद्रियस्य सुश्लोकमौलेर्हरेर्गुणानुवादं गुणानामभिवदनं एकांतलाभमव्यभिचरितपुरुषार्थ-

फलमाहुः प्रेक्षावंत इतिशेषः। श्रुतेः श्रवणेंद्रियस्य च विद्वद्भिरुपाकृतायाः व्याख्यातायाः कथासुधायाः संप्रयोग एकांतचित्तत्वेन श्रवणमेकांतलाभः उतशब्दाच्चक्षुरादिग्रहणं कर्तव्यं। '' तमुस्तोतारःपूर्व्ययाविदं ''। '' यन्नामसकृच्छ्रवणात्पुल्कसोपिविमुच्यत '' इत्यादिश्रुतिस्मृतयोप्यस्मिन्नर्थे प्रमाणं ॥ ३७ ॥

वाक्यमोदलाद इंद्रियगळु हुट्टिद्दक्के इदे (ई मुंदे हेळुवदे) सार्थकवेंदु हेळुवरु– पुरुषन (नालिगेगे) वागिंद्रियक्के पुण्यकीर्तिगळिगे शिखामणियाद श्रीहरिय गुणगळ वर्णने माडुवदे 'एकांतलाभं' तप्पदंथ (मुख्यवाद) पुरुषार्थ फलवेंदु ज्ञानिगळु हेळुवरु; श्रवणेंद्रियक्कादरू विद्वांसरिंद हेळल्पट्ट आ श्रीहरिय अमृतसदृशवाद कथेयन्नु एकांतचित्तदिंद श्रवणमाडुवदे मुख्यफलवेंदु हेळुवरु. 'उत' एंब शब्ददिंद चक्षुम् मोदलाद इंद्रियगळिंद श्रीहरिय प्रतिमेगळ नोडोण मोदलादद्दे मुख्यफलवेंदु हेळुवरु, एंब अर्थ स्वीकारमाडबेकु. '' पूर्वीकरु ह्यागे तिळिदिरुवरो हागे आ परमात्मनन्नु स्तोत्रमाडुववरू, ओंदुसारेयादरू आ परमात्मन नामवन्नु श्रवणमाडुववरू आ जनरु 'पुल्कस' बहळ कीळजातियवरादाग्यू मुक्तरागुवरु '' एंब इवे मोदलाद श्रुतिस्मृतिगळु ई मेले हेळिद अर्थक्के प्रमाणरूपवागिरुववु. ॥ ३७ ॥

आत्मनोऽवसितो वत्स महिमा कविनादिना ॥ संवत्सरसहस्रांते धिया योगविपक्वया ॥ अतो भगवतो माया मायिनामपि मोहिनी ॥ ३८ ॥ यत्स्वयं चात्मवर्त्मात्मा न वेद किमुतापरे ॥ ३९ ॥ ॥ ॥ ॥

ननु आदिकविना हरेर्महिम्नः समापितत्वादेष उदाहर्तुं कथं न शक्यत इति तत्राह आत्मनइति। आदिना कविना विरिंचेन संवत्सरसहस्रं योगेन शमदमाद्युपायेन विपक्वया परिपाकं प्राप्तया धिया सकलशास्त्रार्थावधारणशक्तिमत्या बुद्ध्या अवसितः उपाश्रितः आत्मनः परमात्मनो महिमाऽवसितः। अपरोक्षीकृत्य ज्ञातो यदतो भगवतो माया महिमा मायिनां ज्ञानिनामपि मोहिनी बुद्धिभ्रंशकरीति। '' मायातुमहिमाप्रोक्तः प्राचुर्येण मयड्यत '' इतिप्रमाणान्मायाशब्दस्य उक्तएवार्थः नत्वनिर्वाच्या अविद्या मायात्रोच्यते ॥ ३८ ॥ ब्रह्मणा ज्ञातत्वात्कथं मोहकरीत्याशंक्य तस्यापि साकल्येन ज्ञानं दुष्करमित्याशयेनाह यदिति। आत्मवर्त्मा परमात्मज्ञानोपदेशाचार्य आत्मा ब्रह्मा स्वयमपि भगवतो मायां न वेदेति यद्यस्मात्सर्वात्मनेतिशेषः अतो ऽपरेऽस्मदादयो न विदुरिति किमुत। '' गुणपूर्तेरात्मशब्दो ब्रह्माहीनत्वतोहरः। अहंशब्दस्तथाप्येतौ न जानीतो हरिं पर-'' मितिस्मृतिः अहंरुद्रः ॥ ३९ ॥

ओळ्ळेदु, आदिकवियाद चतुर्मुखब्रह्मनिंद श्रीहरिय महिमेगळ होगळुविकेयु मुगिसल्पट्टद्दरिंद ई मैत्रेयऋषियु ई परमात्मनन्नु होगळलोशवल्लवेंदु ह्यागे हेळिदनु एंदरे हेळुवरु– आदिकवियाद चतुर्मुखब्रह्मनु सहस्रवरुषगळ वरेगे शमदममोदलाद उपायदिंद परिपाकवन्नु होंदिद, सकलशास्त्रार्थगळन्नु धारणमाडनक्क शक्तियुळ्ळ बुद्धियिंद आ श्रीहरियन्नु उपासनेमाडि अवनन्नु प्रत्यक्षगरेसिगोंडाग्यू अवन महिमेय पारुगंडनो? इल्ल. आदकारण श्रीहरिय महिमेयु ज्ञानिगळिगूसह बुद्धिभ्रंशवन्नुंटु माडुवदु. ई श्लोकदल्लि 'माया' एंब शब्दक्के महिमा एंदु

१. आत्मनः परमात्मनः आदिकविना ब्रह्मणापि योगेन भक्तिज्ञानादिरूपेण विपक्वया परिपाकं प्राप्तया धिया सकलसदागमार्थभूतगुणक्रियारूपावगाहनशक्त्या बुद्ध्या किं साकल्येनावसितः नैवेति का का योज्यं तथा चान्यैर्भगवान् तथा नावसेय इति किं वाच्यमिति भावः –(या.)

अर्थमाडतक्कदु. मयट् शब्दवु प्राचुर्यार्थवन्नु हेळुवदरिंद हीगे अर्थमाडबहुदु एंदु प्रमाणविद्दरिंद 'माया' शब्दक्के महिमा एंत अर्थवे होर्तु परवादिगळु हेळतक्क अनिर्वचनीय हेळलिक्के बारदंथ अविद्या एंब माया एंदर्थवल्लवु. ॥ ३८ ॥ ब्रह्मदेवनिगे भगवन्महिमेयु तिळिदिरुवदरिंद ज्ञानिगळिगूसह अवन महिमेयु भ्रांतियन्नुंटु माडुवर्देंब मातु ह्यागे संभविसुवदु, एंदरे आ ब्रह्मदेवनिगादरू अवन महिमेयु संपूर्ण तिळियुवदु शक्यवल्लवेंब अभिप्रायदिंद हेळुवरु– श्रीहरिय ज्ञानोपदेशमाडुव विषयदल्लि एल्लरिगू गुरुवेंदेनिसिगोंड चतुर्मुखब्रह्मनु स्वतः तानादरू आ श्रीहरिय महिमेयन्नु संपूर्णवागि पारगंडिल्ल. अंदमेले नंमंथवरु आ हरिय महिमेयन्नु पारगंडिर्लेदेनु हेळतक्कदु? 'चतुर्मुखब्रह्मनु तन्न योग्यतानुगुणवागि गुणपूर्णनादकारण गुणपूर्णार्थवन्नु हेळतक्क आत्मशब्ददिंद करिसिगोळ्ळुवनु; हागू हरनु लक्ष्मीब्रह्मादिगळ होर्तु मिक्काद देवतिगळिगे हेच्चिनवनाद्दरिंद 'अहं' एंदु करिसिगोळ्ळुवनु. इंथ समर्थरादाग्यू ई ब्रह्मरुद्ररु याव श्रेष्ठनाद श्रीहरियन्नु संपूर्णवागि तिळिबल्लरु.' ॥ ३९ ॥

यतोऽप्राप्य निवर्तंते वाचश्च मनसा सह ॥ अहं चान्य इमे देवास्तस्मै भगवते नमः ॥ ४० ॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे सप्तमोऽध्यायः ॥ ७ ॥ ॥ ॥ ॥ ॥ ॥

नैताच्चित्रमितिभावेनाह यतइति। वाचोऽनंतवेदाभिमानिन्यः श्रियश्चानादिकालमारभ्य मनसा गुणगणान् ध्यायंत्यो वागिंद्रियेण निरंतरं वर्णयंत्यो गुणकथावसानमप्राप्य न शक्यमिति यतो निवर्तंते अनंतगुणपूर्ण इति निश्चित्य नित्यपरिचितगुणकथने च नितरां वर्तत इति अहंचाहंकाराभिमानिनो रुद्रगरुडशेषा अन्ये इमे देवा इंद्रियाभिमानिन इंद्रादिदेवा यन्मायां न विदुरिति यतस्तस्मै भगवते नम इत्यन्वयः। वाचइति बहुवचनं श्रियो रूपानंत्याद्युज्यते। "श्रीर्यत्ररूपिण्युरुगायपादयोः करोतिमानंबहुधाविभूतिभि-" रितिच। अहं त्रिधेत्यहंशब्दस्याहंकारे प्रयुक्तत्वान्नमैत्रेयोत्रोच्यते। अहीनत्वतोहरः। "अहंशब्दस्तथाप्येतौ नजानीतोहरिं पर-" मितिच ॥ ४० ॥ इति श्रीमद्भागवते महापुराणे तृतीस्कंधे विजयध्वजटीकायां सप्तमोऽध्यायः ॥ ७ ॥

इदु एनु आश्चर्यवल्लवेंब अभिप्रायदिंद हेळुवरु–'वाचः' अनंत वेदगळिगे मुख्य अभिमानिगळाद रमादेवेयरु अनादिकालदिंद तम्म मनसिनिंद याव श्रीहरिय गुणगणगळन्नु ध्यानमाडतक्कवरागि हागू वागिंद्रियदिंद तप्पदंते अवन गुणगळन्नु वर्णिसुत्त अवन गुणकथेगळ पारवन्नु होंददे इदर पारहोंदुवदु अशक्यवेंदु तिळिदु, आ गुणगळ पारगाणबेकेंब उद्योगदिंद (रमादेवियरु) हिंदक्के तिरगुक्करु. ई श्रीहरियु अनंत गुणगळिंद परिपूर्णनेंदु निश्चयिसिगोंडु नित्यदल्लियू तमगे परिचयवुळ्ळ गुणगळ वर्णनदल्लिये इरुवरु; इंथ महामहिमेयुळ्ळ याव श्रीमन्नारायणन अनंतसामर्थ्यवन्नु अहंकार तत्वाभिमानियाद रुद्रदेवरू गरुडशेषरू मत्ते केलवु देवतिगळू इंद्रियाभिमानियाद इंद्रने मोदलाद देवतिगळू तिळियुवदिल्लवो, आ नारायणनिगे नमस्कारविरलि. इल्लिय 'वाचः' एंब बहुवचनवु वाक्यगळिगे मुख्याभिमानियाद रमादेविगे अनेकरूपगळिद्दरिंद सरियादद्दु, हागू 'याव वैकुंठलोकदल्लि परमसुंदररूपियागि रमादेवियु अनेकरूपगळन्नु धरिसि महाकीर्तियुळ्ळ श्रीमन्नारायणन पादगळल्लि बहु सन्मानरूपकाद सेवेयन्नु माडुतिरुवळु' एंदु इदे तृतीयस्कंधदल्लिये मुंदे वैकुंठवर्णनकालक्के हेळिरुवरु. ई श्लोकदल्लि 'अहं' एंदरे मैत्रेयऋषिगळु नानु एंदर्थवल्लवु; हिंदे इदे ग्रंथदल्लि 'अहं त्रिधा' एंदु अहंकारतत्वक्के 'अहं' एंब शब्दप्रयोगमाडिरुवरु–मत्तू हीननल्लवाद्दरिंद अहं एंदरे हरनेंदर्थवु; हीगे

अहं शब्दवाच्यनाद हरनू आत्मशब्दवाच्यनाद ब्रह्मनू ई श्रीहरिय महागुणगळन्नु वर्णने माडलशक्तरु एंब ई प्रमाणदिंदलू अहं एंदरे रुद्रदेवनेंदर्थवु. ॥४०॥ ई प्रकार श्रीमद्भागवत मूलग्रंथक्कू विजयध्वजव्याख्यानक्कू सरियागि योजने माडि अलंकरिसुव 'सुखार्थबोधिनी' एंब प्राकृतभाषारूपवाद व्याख्यानवु कूसनूर श्रीनिवासनिंद रचितवागि मूरने स्कंधद ७ नें अध्यायवु श्रीहरिपादक्के अर्पिसल्पट्टितु. ॥ ७ ॥

श्रीशुक उवाच ॥ एवं ब्रुवाणं मैत्रेयं द्वैपायनसुतो बुधः ॥ प्रीणयन्निव भारत्या विदुरः प्रत्यभाषत ॥ १ ॥

दुर्भगशरीरस्थस्य हरेर्देवदत्तस्येव माहात्म्यतिरोभावो दुःखभोगश्च नास्तीति विदुरस्य च वक्ष्यमाणार्थप्रश्नग्रामश्चास्मिन्नध्याये निरूप्यते तत्रादौ विदुरप्रश्नोपक्रमं वक्ति एवमिति। भरतस्य मुख्यप्राणस्य प्रियया वाचा ॥ १ ॥

देवसर्ग विभजति देवसर्गश्चेति चशब्देन संख्याविशेषं केषाचिदंतर्भावं सूचयति । तदुक्तं " प्रोक्ताअष्टविधादेवा विबुधाः सर्वएवतु । पितॄणांशतमेवात्र असुरास्त्रिंशदेवतु । गंधर्वाप्सरसांचैव द्विशतंपरिकीर्तितं । सप्ततिर्यक्षरक्षःसु त्रिंशच्चारणजातिषु । शतंसिद्धास्तथान्यासु सप्ततिःसर्वजातिषु । ऊर्ध्वस्रोतसएवैते अन्येऽर्वाक्स्रोतसः स्मृताः । वैकारिकेषुदेवेषु एतेवैमुग्धभोगिनः । अभोगिनस्तदन्येतु देवाएतेततःस्मृताः । सर्वज्ञास्तैःसहाराध्या भक्तास्तेष्वंतरेवच । नृत्तगानादिकर्तारो वाहनादिकृतस्तथा । सिद्धसिध्देतिवक्तारश्चाराश्चैषांक्वचित्क्वचित् । सेवाकराइतिह्येतैर्भेदैरष्टविधामताः । अन्येचयेतुसर्वज्ञा विबुधास्तेप्रकीर्तिताः । तथान्येकर्मभिस्तैस्तैरष्टभेदातरंगता " इति । अंडांतर्भूमौ जायमानानां भूतशतगुणत्रयादुत्पत्तिर्योग्यताभेदेनानेकविधा तदुक्तं " भौतिकेनतुसत्वेन गूढंब्रह्मणआडजं । रूपंतत्रापितुतमः शतांशेनप्रकीर्तितं । तज्जो रुद्रस्ततस्त्वेवमिंद्रादीनांपुनर्जनिः । गूहितंभूतरजसा तत्सत्वंमानुषायदा । देवाएवंगुणास्त्वेते सर्वव्याप्यव्यवस्थिताः । गुणातीतंचयद्रूपं ब्रह्मादीनांसुखात्मकं । चिद्रूपंतस्यसत्त्वस्यैवोत्कर्षोयत्रविद्यते । तत्रोत्कृष्टंतमोयत्र हीनंतत्तुस्वभावतः । उपगूहनेतुनैवास्ति विशेषोनित्यचिन्मये । प्रकृतेर्गुणरूपायामूलिकायाश्च नक्वचित् । विशेषःपरमेतत्त्वे वासुदेवेकुतःपुन -" रिति । देवानांशापादिदोषाद्भूमौ जननेपि भूतगुणस्वभावेन देवत्वमासुरत्वं ज्ञायते । तदुक्तं " यदिदेवादयोदोषाज्जायेरन्मानुषादिषु । तथापिदेवाविज्ञेया आसुराद्यास्तथाध्रुव -" मिति । प्रकृतमुपसंहरति । दशेति । देवसर्गस्य प्राकृतवैकृतभेदेनोक्तसर्गाणां दशत्वं युज्यते ॥ २७ ॥ २८ ॥

देवतासृष्टियन्नु विभागमाडि हेळुवरु— देवतासृष्टियु एंटु प्रकारवेंदु हेळिरुवरु– ई श्लोकदल्लिद्द 'च' शब्ददिंद संख्याविशेषवु केलवरिगे अवरल्लिये 'अंतर्भाववु' समावेशवु सूचितवागुवदु; ई विषयक्के आचार्यरु प्रमाणवन्नु उदाहरिसिरुवरु (आ प्रमाणदिंद) याव देवतिगळु हेळल्पट्टरो अवरु अष्टविधरु इवरिंकिंत अधिकवागि इद्द ई सर्वरू विबुधरेनिसुवरु देवतिगळिगू विबुधरिगू अवांतरभेदंटु. (यज्ञदल्लि हविर्भाग दोरेयतक्कवरु देवतिगळु. यज्ञभागइल्लदवरु विबुधरु) आ एंटु जनदेवतिगळु यारेंदरे— १ पितृगळल्लि नूरु जनरु; मिक्कादपितृगळु विबुधरल्लि गणनेयु. २ असुररु मूवत्तेजनरु. ३ नूरु जनगंधर्वरु. ४ नूरुजन अप्सरास्त्रीयरु. ५ यप्पत्तुजनरु यक्षरु. राक्षसरू कूडि ६ मूवत्त जन चारणरु. ७ नूरुजनरु सिद्धरु. ८ मिक्काद सर्वजातिगळल्लियू ७० प्रकार अवांतर भेदगळुंटु. ई एंटु प्रकार देवतिगळे 'ऊर्ध्वस्रोतसरेनिसुवरु मिक्काद विबुधरु अर्वाक्स्रोतसरेनिसुवरु. मत्तू वैकारिकदेवतिगळल्लि ई एंटु जनरे ईषत् यज्ञभागभोगवुळ्ळवरु. 'ततः' ईषत्सारभोगित्वविरुवदरिंदे इवरु देवतिगळेंदु उदाहृतरागिरुत्तारे हेर्तु मिक्कादवरु हविर्भागइल्लद इरुवदरिंद देवतिगळल्लवु; मत्तू अवरु सर्वज्ञरु (अंदरे) 'विबुधाः' एंदु अवरिगे संज्ञेयु; आ विबुधरु मेले हेळिद देवतिगळिंद सहितरागिये यज्ञादिगळल्लि पूजेगोळ्ळुवरु. अतएव श्राद्धदल्लि विश्वेदेवतिगळ आराधनद नियमवदे. (या) मत्तू आ एंटुविध देवतिगळ सेवेयन्नु माडुत्तिरुवरु. आ देवतिगळ मध्यदल्लिये नर्तनगानादिगळन्नु माडुववरु, हागु वाहनादिगळन्नु माडुववरु, मत्तू अवरन्नु सिद्ध सिद्ध एंदु होगळुवरु. ओंदोंदु सारे आ एंटु जन देवतिगाळिगे ई

१. एते पितॄणां शतमित्यादिनोक्ता मुग्धभोगिनईषत्सारभोगिनस्ततो मुग्धभोगित्वादेव उदाहृताएव देवा एतदतिरिक्तास्त्वभोगित्वान्नदेवाः किंतु विबुधाइत्येव तेषां संज्ञेति योज्यं । (दी.) २. तैर्विबुधैः सहाराध्यत्वं पितॄणां अतएव श्राद्धे विश्वेदेवाराधन नियमः ।–(या.) ३. तेष्वंतरेवेत्यस्य तेषु मध्य एवेत्यर्थः (दी.)

विबुधरु मृत्यरूसह आगुवरु एंदु ई भेदगळिंद यंतु प्रकार मतरागिरुत्तारे. इवर होर्तू अन्यरु यारु सर्वज्ञरिरुवरो अवरेल्लरू विबुधरेंदु कीर्तितरागुत्तारे इन्नु वुळिद केलवरु अवरवर कृतिगळ भेददिंद ई एंटरल्लिये एणिसल्पडुवरु. " ब्रह्मांडदोळगिन भूमियल्लि हुट्टतक्कवरिगे पंचभूतगळ शतांशदिंदलू सत्वरजस्तमोगुणगळिंदलू उत्पत्तियु अवरवर योग्यता भेददिंद अनेकप्रकार इरुवदु. इदक्के प्रमाणवु— चतुर्मुखब्रह्मदेवनिंद सृष्टवागतक्क स्थूल ब्रह्मांडद स्वरूपवु भौतिक सत्वांशदिंद रक्षितवागिरुवदु. अदरल्लियादरू आ भौतिकद नूररल्लि ओंदु अंशवु तमोगुणविरुवदु. आ तमोगुणदिंद पुनःस्थूलदेहदिंद रुद्रनु ब्रह्मदेवनिंद हुट्टिदनु. इंदे प्रकार ब्रह्मांडदोळगे इंद्रादिगळु पुनःस्थूलदेह वुळ्ळवरागि उत्पन्नरादरु. पंचभूतदोळगिन रजोगुणदिंद मुच्चल्पट्ट सत्वभागदिंद मनुष्यरु उत्पन्नरादरु. देवतिगळु ई प्रकार गुणवुळ्ळवरागि सर्वरल्लि तत्वेशरागि व्यापिसि गोंडिरुवरु. ई सत्वादिगुणगळु तम्म कैवशवागियुळ्ळ ब्रह्मादिगळ स्वरूपवु सुखात्मकवादुदु. आ ब्रह्मन स्वरूपवु चिद्रूपवु अवनल्लि सत्वगुणद अंशवु प्रबलवागिरुवदु. अवनल्लि उत्कटवाद तमोगुणवु एनू केल्लसक्के बारदंते इरुवदु. आ चिन्मयनाद चतुर्मुखब्रह्मनन्नु तमोगुणवु मुच्चु हाकुवदक्के शक्तवल्लवु. चतुर्मुखब्रह्मनन्नु मुच्चलिक्के तमोगुणक्के शक्तियिल्लवंते इन्नु मूल गुणस्वरूपळाद प्रकृतिगे परमतत्वस्वरूपियाद श्रीवासुदेवनन्नु मुच्चुवशक्तियु एल्लि बरबेकु? " ई मेले हेळिद देवतिगळे मोदलादवरु, शापमोदलाद निमित्तगळिंद भूमियल्लि उत्पन्नरादाग्यू अवरवर गुणस्वभावदिंद इवरु देवतिगळू इवरु असुररु एंबदु तिळियुवदु. इदक्के प्रमाणवु– ओंदुवेळे देवतिगळे मोदलादवरु शापवशदिंद मनुष्यादिगळल्लि हुट्टिदरे, अवरवर गुणक्रियागळिंद इवरु देवतिगळु, इवरु असुररेंदु, निश्चयमाडिकोळ्ळुतक्कदु. इंथ देवतिगळु भूत-प्रेत-पिशाचगळू विद्याधररू किन्नरादिगळू उत्पन्नरादरु प्रकृतविषयवन्नु मुगिसुवरु. हे विदुरने ब्रह्मदेवनिंद माडल्पट्ट ई हत्तु सृष्टिगळु निनगे हेळल्पट्टवु हींगे देवतिगळ सृष्टिगे–प्राकृत-वैकृत ई यरडु भेददिंद हेळल्पट्ट सृष्टिगळिंगे हत्तु प्रकारवु युक्तवागुत्तदे ॥ २७ ॥ २८ ॥

अतःपरं प्रवक्ष्यामिवंशान्मन्वंतराणिच ॥ एवं रजःप्लुतःस्रष्टा कल्पादिष्वात्मभूर्हरिः ॥ सृजत्यमोघसंकल्प आत्मैवात्मानमात्मना ॥ २९ ॥ ॥ ॥ ॥ ॥ ॥ ॥

मूलसृष्टिर्हरिणैवास्तु मन्वंतरेष्ववांतरसृष्टिरन्यैरिति शंका मा भूदित्याशयेनाह । एवमिति । आत्मभूरजो हरिरात्मना स्वेच्छया कल्पादिष्वात्मैव स्वयमेव स्वतंत्रो भूत्वा प्रकृत्युपादानेन देवादिदेहान् सृष्ट्वा तन्नियंतृतयात्मानं सृजति प्रादुर्बभूव बहुरूपत्वेनेतिशेषः । कीदृशोहरिरेवमुक्तप्रकारेण स्रष्टा अनेन विरिंचादीनां स्रष्टृत्वं द्वारमात्रमुक्तं भवति कथंस्रष्टेत्यतउक्तं । रजःप्लुतइति । रजआदिगुणानां मध्यवर्तित्वाद्रजोगुणाप्लुतो नतु गुणाधीनत्वादभिमानाच्च । देवदत्तवद्धरिरिंद्राद्यन्यतमः किं नस्यादित्यत उक्तमात्मभूरिति कामो नेति स्रष्टेति तर्हि विरिंचः किमित्यतउक्तं हरिरिति रजोगुणेन द्रवीभूतो रजःप्लुत इति प्रसिद्धार्थं परित्यज्याप्रसिद्धार्थकल्पने किंप्रमाणमित्यतआचार्यैरिदं मानमुदाहृतं । " गुणाप्लुतो हरिर्नित्यं गुणानांमध्यगोयतः । अनहंवेदनात्तस्य गुणासंस्पर्शएवचे -" ति । " सृष्ट्वा देवादिदेहान्स आत्मानंबहुधाकरोत् । तन्नियंतृतयात्मानं प्रकृतिंदेहभेदत" इति वचनं स्वबहुत्वे प्रमाणं । एकत्वेऽस्यकर्तृकर्मादिभावः कथमितीदं चोद्यं "कर्ताचकरणंचैव कर्मचैव स्वयंहरिः । आत्मनोबहुधा-

भावे प्रकृतेस्तुस्वतंत्रत " इति वाचा परिहर्तव्यं । एतदभिप्रायेणामोघसंकल्पइत्युक्तं ॥ २९ ॥

मूलसृष्टियु श्रीहरियिंदले इरलि, मन्वंतरगळल्लि अवांतरसृष्टियु एरडनेदवरिंदागुवदेंब संदेहवे बेडेंब अभिप्रायदिंद हेळुवरु— हे विदुरने इन्नु मेले मन्वंतरगळन्नू आ मनुगळ वंशगळन्नू हेळुवेनु केळु— ' आत्मभूः ' उत्पत्तिशून्यनाद श्रीहरियु ' आत्मना ' स्वेच्छादिंद ब्रह्मकल्पमोदलादवुगळल्लि ताने तन्न स्वतंत्रतेयिंद प्रकृतियन्नु उपादानमाडिकोंडु देवतिगळे मोदलादवर देहगळन्नु सृष्टिमाडि, अवरिगे नियामकनागि तानु अनेकरूपगळिंद अवतरिसुवनु. आ श्रीहरियु यंथवनेंदरे ई हिंदे हेळिदंते सृष्टिकर्तृवु हीगे हेळुवदरिंद चतुर्मुखब्रह्मने मोदलादवर सृष्टिकर्तृत्ववु; अवन आज्ञेयिदले एंदु हेळल्पडुवदु. आ हरियु ह्यागे सृष्टिमाडुवनेंदरे ' रजःप्लुतः ' रजोगुणवे मोदलाद मूरु गुणगळ मध्यदल्लिद्दु अवुगळिंगे प्रेरकनागि सृष्टिमाडुवनाद्दरिंद ' रजःप्लुतः ' एन्नुवरे, होर्तु आ गुणगळ अधीननागि सृष्टिमाडिदनेंदल्लवु, मत्तू अभिमानदिंद सृष्टिमाडिदनेंदल्लवु. ई हरियु देवदत्तनेंबवनंते इंद्रादिदेवतिगळल्लि ओब्बनेंदु यावे हेळगूडदु? एंदरे— ई श्रीहरियु ' आत्मभूः ' एनिसुवनु. आत्मभूः एंदरे कामगे हेसरुंटु, एंदरे ' स्रष्टा ' एंदंदिरुवरु. आत्मभूः एंब हेसरु कामगिद्दरू अवनु सृष्टिकर्तृवल्लवु. हागादरे चतुर्मुखब्रह्मनु सृष्टिकर्तृवेनिसुवनु. अंदरे ' हरिः ' एंदु कंठोक्तियिंदले हेळिरुवरु. ' रजःप्लुतः ' एंब पदक्के रजोगुणदिंद इवन मनःसु हरियलारंभिसितु एंब प्रसिद्धार्थवन्नु बिट्टु अप्रसिद्धार्थकल्पने माडबेकादरे एनु प्रमाण उंटेंदरे, श्रीमदाचार्यरिंद ई प्रमाणवु हेळल्पट्टदे— ' श्रीहरियु नित्यदल्लियू सत्वादिगुणगळ मध्यदल्लिइक्कारण— गुणाप्लुत— नेनिसुवनु. अवनिगे अहंकारविल्लदकारण सत्वादिगुणगळ संपर्कविल्लवु. मत्तू आ श्रीहरियु देवतेगळे मोदलादवर देहगळन्नु सृष्टिमाडि आ देवतिगळिंगे नियामकनागियू, प्रकृतियु देहांतरवन्नु तेगेदुकोळ्ळुवदक्के नियामकनागियू तानु अनेक अवतारगळन्नु स्वीकरिसुवनु एंदु नारदीयपुराणदल्लि हेळिरुवदु. प्रकृतियु एरडने देह तेगेदुकोळ्ळुवदक्के ह्यागे श्रीहरियु कर्तृवो आ प्रकार ई श्रीहरियु ओब्बनागिद्दवनु अनेक स्वरूपग्रहणमाडबेकादरे इवन होर्तु एरडनेयवरु इवनिगे कर्तृकर्मादिगळु इरबहुदल्लेंवदरे हेळुवरु— श्रीहरियु तन्न अवतारगळिंगे ताने कर्तृवु, ताने कर्मवु ताने करणवु, इवनिगे एरडनेदवरु यारू इल्लवु, प्रकृतिय अवतारगळु अवन अधीन वागिरुव्वु, एंदु आग्नेयपुराणदल्लि हेळिरुवदु. ई प्रमाणदिंद एल्ल संशयगळन्नू परिहारमाडिकोळ्ळुतक्कदु. ई अभिप्रायदिंदले मूलदल्लि ' अमोघसंकल्पः ' एंदु श्रीहरिगे विशेषण कोट्टिरुवरु. ॥ २९ ॥

गुणव्यत्यय एतस्मिन्मायावत्त्वादधीशितुः ॥ न पौर्वापर्यमिच्छंति नद्यां भ्राम्यद्भमेर्यथा ॥ ३० ॥ देवासुरादयः क्षत्तः कल्पेऽस्मिन्ये प्रकीर्तिताः ॥ त एव नामरूपाभ्यामासन्मन्वंतरांतरे ॥३१॥ इति श्रीमद्भागवते तृतीयस्कंधे एकादशोऽध्यायः ॥ ११ ॥

तर्हि कथं सृष्टिः प्रथमेत्याशंक्य तन्नियमो नास्तीति सदृष्टांतमाह गुणेति । एतस्मिन् गुणव्यत्यये गुणव्यतिकरे पौर्वापर्यं पूर्वापरीभावं नेच्छंति विपश्चित इतिशेषः । कुतः अधीशितुः अखंडैश्वर्यस्य हरेर्मायावत्त्वात् इच्छानियतत्वात् नद्यां भ्रमत्याः पुनःपुनरावर्तमानाया भ्रमेः आवर्तस्येव ॥ ३० ॥ एतत्कल्पसृष्टेऽन्यस्मिन्कल्पेऽन्ये सृज्यंतइति भ्रांतिं निवारयति देवेति इंद्रादिनाम्नासहस्राक्षशुक्रादिरूपेणच ॥३१॥ इतिश्रीमद्भागवतेवि० टीकाया तृतीये एकादशः ॥११॥

१. सर्वदा प्रकृत्यादि सर्वकारणवत्वात् ।— (**या.**) २. स्वातंत्र्येण कर्तुः ।— (**या.**) ३. यद्वा अस्मिन् दैनंदिने कल्पे देवासुरादयः ब्रह्मादयो देवाः बल्यादयोऽसुराः आदिपदान्मरीचिप्रभृतयो ऋषयश्च ये प्रकीर्तितास्तएवमन्वंतरांतरे ब्रह्मदिनांतरे आसन्निति ।— (**या.**)

आ पक्षदल्लि सृष्टियु प्रथमवु ह्यागे एंदु संदेहबंदरे अदर नियमवे इल्लवेंबुवदक्के दृष्टांतसाहितवागि हेळुवरु— ई सत्वरजस्तमोगुणगळ ' वैषम्य ' हेच्चुकडिमेयागुवदरिंद आगुव ई सृष्टियु सर्वस्वतंत्रनाद श्रीहरिय इच्छानुसारवाद्दादकारण, ई सृष्टियल्लि यावदु मोदलनेदु यावदु एरडनेदु एंबदन्नु तिळकोळ्ळुवदक्के ज्ञानिगळु, नदिय तिरगणीमडुविनल्लि तिरुगुतक्क नीरिन्थेरेगळोळगे, याव तिरुगुव थेरेयु मोदलनेदु? एंदु तिळकोळ्ळुवदु ह्यागे अशक्यवो, अदरंतेये (ई श्रीहरिय सृष्टिविषयवन्नु) इदन्नु तिळियुवदु अशक्यवेंदु ई विषयक्के इच्छिसुवादिल्लवु ॥ ३० ॥ ई कल्पदल्लि सृष्टरादवरु बेरे प्रकारवु मत्तोंदु कल्पदल्लि सृष्टरागुववरु बेरे (प्रकार) एंब भ्रांतियन्नु बिडिसुवरु— ' हे क्षत्तः ' एले विदुरने, ब्रह्मकल्पदल्लि देवतिगळू असुररू इवरे मोदलादवरु याव याव रूपनामगळुळ्ळवरेंदु हेळल्पट्टरो, मुंदिन मन्वंतरगळल्लियू, मुंदिन ब्रह्मकल्पगळल्लियू, इदे प्रकार देवतिगळू असुररू इंद्र, सहस्राक्ष मोदलाद नामगळुळ्ळवरू इदरंते रूपवुळ्ळवरू आगुवरु. हिंदादरू इदे प्रकारवे इद्दरु. ॥ ३१ ॥ — ई प्रकार ' सुखार्थबोधनी ' एंब प्राकृत टीकेयु कूसनूर श्रीनिवासनिंद रचितवागि मूरने स्कंधद ११ ने अध्यायवु मुगिदितु ॥ श्रीकृष्णार्पणमस्तु ॥ ११ ॥

मैत्रेय उवाच ॥ चरमस्तु विशेषाणामनेकासंयुतः सदा ॥ परमाणुः स विज्ञेयो नृणामैक्यभ्रमो यतः ॥ १ ॥

॥ हरेरुभयानंत्यज्ञानं मोक्षैकफलमित्ययमर्थोऽस्मिन्नध्याये निरूप्यते तत्र कालाख्यं लक्षणं ब्रह्मन्निति विदुरप्रश्नं परिहरिष्यन् परमाणुकालज्ञानाय द्रव्यपरमाणुपरिमाणमाह चरमइति । तुशब्दएवार्थे एकस्यार्थे यो विशेषाणां पार्थिवादिपदार्थानां चरमोंत्यो विशेषः । तर्हि निरवयवः किं नेत्याह अनेकेति । यश्चानेकैरवयवैरासमंतात्सम्यक्युतः अनेकावयवत्वे चरम इति विशिष्योक्तिः कथमित्यतस्तुशब्देन विशिनष्टि । देवलोकेस्थिता मनुष्या विशेषेण सौक्ष्म्येण दर्शने यस्यांशांशित्वविशेषं द्रष्टुं न शक्ताः सएव चरमो विशेष इत्याचक्षते प्रेक्षावंतः नृणां काणादीनां यतो यस्मादैक्यभ्रमः यतः परमाणुर्नास्ति स पदार्थः परमाणुरिति भ्रांतिः तेषां भ्रांतिज्ञानं युक्तमितिदर्शयितुं नृणामित्युक्तं नाम्ना परमाणुर्विज्ञेय इत्यर्थः । " मनुष्यादेवलोकेपि विशेषेणैवदर्शने । अंशांशित्वविशेषंतु यस्यद्रष्टुंनशक्नुयुः । चरमोविशेषइतितं मुनयोब्रूयुरंजसा । परमाणुः सविज्ञेयः काणादाद्यानिरंशिनं । अनंतांशयुतत्वेपि यंब्रूयुर्भ्रांतिदर्शनात् । ततोपिपरमाणुत्वं तदंशानांतुयद्यपि । अनंतत्वाद्विवेकार्थमस्योक्तापरमाणुते-" तिवचनात् । अस्यैव परमाणुत्वं नान्यस्येति ज्ञायते अतएवविज्ञेयइति ॥ १ ॥

श्रीहरियु गुणदिंदलू कालदिंदलू अनंत (अळते इल्लदव) नेंब ज्ञानवु केवल मोक्षक्केंब फलवन्ने कोडतक्कदेंब ई अर्थवु ई अध्यायदल्लि हेळुवदु. आ मोदलु हिंदक्के विदुरनु कालद लक्षणवन्नु

हेळ्वेकेंदु मैत्रेयरन्नु केळिकोंडिद्दनु. आ प्रश्नक्के उत्तरवन्नु हेळुत्त मैत्रेयरु परमाणुकाल (अत्यंतसूक्ष्मकाल) ज्ञानवागुवदक्के मोदलु ' द्रव्यपरमाणु ' पृथिव्यादि परमाणुविन अळतेयन्नु हेळुवरु— इल्लि ' तु ' एंबदु अवधारणार्थकवु. यावदादरोंदु, वस्तुविनल्लिद्द पृथिविमोदलादवुगळ अंशगळल्लि कडीकेवल सूक्ष्मवाद अंशवु यावदो (अदे परमाणुवु) हागादरे आ परमाणु एंबदु निरवयववो; अदरल्लि मत्ते अदक्कू सूक्ष्मवाद अवयवुगळिल्लवो ? एंदरे हागल्लवु एंदु हेळुवरु, ' अनेकासंयुतः ' आ परमाणु एंबदु अनेक अवयवगळिंद सुत्तुमुत्तलू तुंबिकोंडिरुवदु. आ परमाणुविगे अनेक अवयवगळिद्दरे अदे कडीदु परम (अणु) एंब विशेषणगळन्नु कोट्टु याके अदक्के परमाणु (अत्यंत अणु) एंदु हेळुवदु, एंदरे ई विषयवन्नु मूलदल्लिद्द ' तु ' शब्ददिंद विस्तार माडुवरु. देवलोकदल्लिद्द मनुष्यरू सह, अत्यंत सूक्ष्मदिंद नोडलु, याव परमाणुविन अंशगळु यावु, मूल अंशियु यावदु, एंब विशेषभेदवन्नु तिळकोळ्ळुवदक्के शक्तरल्लवु. अदे एल्लक्कू कडीदाद सूक्ष्मवस्तु वेनिसुवदु. अदक्के ज्ञानिगळु परमाणुवेन्नुवरु. काणादने मोदलादवरु अंदरे नैय्यायिकरु याव सूक्ष्मवाद परमाणुविनल्लि अवयवगळु इल्लवु अदक्कू सूक्ष्मवाद अंशवु इल्लवे इल्लवु, इंथादु यावदो अदे परमाणुवेनिसुवदु एंदु हेळुवरु; हींगे हेळुवदु भ्रांतियु. आ काणादने (तार्किकरे) मोदलादवरिगे ई विषयक्के भ्रांतिज्ञानविरुवदुचितवेंदु हेळुवदक्के ' नॄणां ' एंदंदिरुवरु. अंदरे आ तार्किकरे मोदलादवरु मनुष्यरष्टे ? ई अर्थक्के प्रमाणवु. ' मनुष्यरु देवलोकदल्लि दिव्यदृष्टियुळ्ळवरादाग्यू याव परमाणुविन अंशगळु यावु, अंशियु यावदु, एंदु तिळकोळ्ळुवदक्के शक्तरल्लवु. ' इदे मनुष्यदृष्टिगे तोरतक्क सूक्ष्मअंशगळल्लि अत्यंत सुक्ष्मवादद्दंदु त्रिकालज्ञानिगळाद मुनिगळु यावदक्के हेळुवरो अदे परमाणुवु; अदक्के काणादने मोदलाद तार्किकरु अंशविल्लद्दंदु अन्नुवरु. अदरल्लि अनंतांशगळिद्दरू भ्रांतिज्ञानदिंद हींगे हेळुवरु. हागादरे मेले हेळिद संदेहवु बरुवदल्लवेंदरे— आ परमाणुविनल्लिद्द अंशगळिगे आ परमाणुविनर्किंत अणुत्ववु इद्दाग्यादरू जनरिगे तिळियुवदक्कागि (अंदरे मनुष्यर बुद्धिगे इदक्कू सूक्ष्मवाद्दु गोचरवल्लवु मनुष्यरिगे तिळियतक्क सूक्ष्मगळल्लि इदे कडीदु एंदु तिळिसुवदक्के) इदु परमाणुवेंदु हेळिरुवरु. (इल्लिद्दिरे अणोरणीयान् एंब श्रुतिगे बाधकबंदीतु) आद कारणवे मूलदल्लि ' विज्ञेयः ' विशेषवागि तिळियतक्कदेंदु प्रयोगिसिरुवरु. ॥ १ ॥

सत एव पदार्थस्य स्वरूपावस्थितस्य यत् ॥ कैवल्यं परममहानविशेषो निरंतरः ॥ २ ॥ ॥

अणुपरिमाणं निरूप्य महत्परिमाणं दर्शयति सतइति । सतः परब्रह्मणएव यत्कैवल्यं यः केवलभावः स परममहानित्यन्वयः कालतो देशतो गुणतश्चानंतत्वं सतःपरब्रह्मण एव मुख्यमित्यर्थः।सन्घटइत्यादौ सच्छब्दवृत्तिदर्शनादित्यतः पदार्थस्येति सदित्यनुवर्तते सत्पदमुख्याभिधेयस्य । "मुख्याभिधेयस्त्वर्थ स्याद्वाच्यमन्यच्चमण्यते । अमुख्येष्वर्थशब्दस्तु नीचोपरिहितोभवे-" दितिवचनात्। मुख्यस्योपपत्तावमुख्यस्वीकारायोगात् अणुतरवस्तुनि स्थितस्यसत्पदमुख्याभिधेयस्य तत्परिणामत्वेन भाव्यं समःप्लुषिणेत्यादौ दर्शनादित्यतः स्वरूपावस्थितस्येति स्वरूपमेवावष्टभ्य स्थितस्य । " स्वेमहिम्नी- " तिश्रुतेः " । जगदावरकस्य वासुदेवाख्यस्य हरेर्जगत्प्रविष्टरूपात् किंचिन्महत्त्वात्स्वरूपावस्थितत्वाच्च तद्व्यावृत्तिः कथमित्यतः कैवल्यमिति । जगदावरणव्यापारोदासीनतया स्थितं तादृशरूपाणामनेकत्वात्कथं

१. नीचोपरीतिलुप्तोपमा । यथानीचोपरि हितः प्रणिहितः स्थापितः तदर्योग्योलंकारः तथेत्यथः ।— (**या.**) २. समोमेरुणा समः प्लुषिणा इतिछंदोग्यश्रुतिः । ३. जगदावरकरूपाद्बहिरपि परिच्छिन्नपरिमाणतयैव दृश्यमानानामनेकेषां परमपुरुषादिरूपाणां सत्त्वादित्यर्थः ॥— (**या.**)

निर्णय इत्यतोऽविशेष इति तादृग्रूपविशेषरहितः सर्वगतस्यापि प्रादेशमात्रतया स्थितत्वेन विशेषवत्त्वात्कथमविशेष इत्यतो निरंतरइति ।प्रादेशमात्रादिविशेषरहितः । एतदुक्तं भवति परब्रह्मणः यः केवलभावोंडांतःप्रविष्टं तदावरकं तस्यैव परमपुरुषादिरूपांतरे तदेकदेशप्रादेशमात्रादिविशेषंच विना यत्सर्वगतं स्वरूपं तदेव परममहानित्युच्यते । " कालकोटिविहीनत्वं कालानंत्यंविदुर्बुधाः । देशकोटिविहीनत्वं देशानंत्यंतथैवच । गुणानामप्रमेयत्वं वस्त्वानंत्यं विदोविदुः । आनंत्यंत्रिविधंनित्यं हरेर्नान्यस्यकेनचित् । तस्यसर्वस्वरूपेष्वप्यानंत्यंतुत्रिलक्षणं । तथापिदेशतस्तस्य परिच्छेदोपिविद्यते । परिच्छेदस्तथाव्याप्तिरेकरूपेपियुज्यते । तस्यार्चित्याद्भुतैश्वर्याद्व्यवहारार्थमेवच । गुणतःकालतश्चैव परिच्छेदोनकुत्रचित् । व्याप्तत्वंदेशतोप्यस्ति पूर्वरूपेषुयद्यपि । नचभेदःक्वचित्तेषामणुमात्रोपि विद्यते । तथापिविद्यतेऽणुत्वं तस्मादैश्वर्ययोगतः । तस्माद्भुद्धयवतारार्थमव्याप्तत्वंचभण्यते । यत्तस्यव्यापकंरूपं परंनारायणाभिधं । शुद्धंब्रह्मेतियत्प्राहुर्द्वितीयंस्रष्टृयत्ततः । परमंपुरुषोनाम मितंतद्देशतोविभोः । तृतीयंवासुदेवाख्यं जगदावरकंमितं । देशतोजगदाविष्टं तुरीयंविष्णुनामक " मितिवचनेन मंदमतीनां शंकोपद्रवाः परिहृता इति ज्ञातव्यं । किंच सर्वगतस्यापि ब्रह्मरूपस्य कालादिरूपया प्रकृत्या समव्याप्तावपि दार्ष्टांतिकेंतर्भावात् तदन्यस्मिन्ननवस्थानात्स्वरूपावस्थितस्येत्युक्तं । " देव्यां कालादिरूपिण्यां स्थितंब्रह्मापिसर्वगं । उच्यतेनान्यगंयस्मादात्मवत्साहरेर्विभोः । महदादिगतंयत्तु तदन्यगतमुच्यत " इतिच ॥ २ ॥

हिंदिन श्लोकदल्लि परमाणुविन परिमितियन्नु हेळि इन्नु परममहत्परिमाणवन्नु (एल्लक्कू दोड्ड अळतेयन्नु) हेळुवरु— दोड्ड वस्तुगळल्लि एल्लक्कू दोड्ड वस्तुवु यावदेंदरे– ' सतः ' परब्रह्मनदे यावदु मुख्यवाद स्वरूपवो, अदे अत्यंतदोड्डदु; यावेंदरे, कालदिंदलू देशदिंदलू गुणदिंदलू अनंतत्ववु (अळतेइल्लदे इरोणवु) परब्रह्मनिगेवे मुख्यवाद्दु. हागादरे ' सत् ' एंदु यावदु करिसिगोळ्ळुवदो अदे परममहत्परिमितियुळ्ळदेंदु हेळिदंतायितष्टे? आ पक्षदल्लि ' घटः सन् , पटः सन् ' कोडवु सत्यवाद्दु बट्टेयु सत्यवाद्दु-- एंदु घट, पट, इवुगळल्लिसह सत् एंब शब्दप्रयोगवु लोकव्यवहारदल्लि कंडदे, आदकारण आ घटपटगळ परिमितिये परममहत्परिमाणवु (एल्लक्कू दोड्ड अळतेयु) आगबेकादीतु, एंदरे हागल्लवु; ' पदार्थस्य ' सत् एंब पदवु हिंदे इद्दइरुवदु. (अंदरे सतः पदार्थस्य) सत् एंब पददिंद याव वस्तुवु मुख्यवागि करिसिगोळ्ळुवदो अदे परममहत्परिमितियुळ्ळुद्देनिसुवदु. सत्-एंब पददिंद मुख्यवागि परब्रह्मवस्तुवे करिसिगोळ्ळप्पडुवदु. घटपटमोदलादवु सत् एंब पदक्के अर्थवल्लवु अवु वाच्यवेनिसुववु (अर्थवेंदरेनु ? वाच्यवेंदरेनु ?) याव पददिंद याव वस्तुवु मुख्यवागि करिसिगोळ्ळुवदो आ पदक्के आ वस्तु अर्थवेनिसुवदु. अदे पदवु औपचारिकवागि एरडने वस्तुविनल्लि व्यवहरिसुत्तिद्दरे आ पददिंद आ वस्तुवु वाच्यवेनिसुवदु. याव पदक्के याव वस्तुवु अमुख्यवो ? आ अमुख्यवाद्दे आ पदक्के अर्थवेंदु हेळुवेवु, एंदरे हींगे हेळिदरे राजाधिराजन मैमेले इडतक्क अमौल्यवाद वडिवेगळन्नु ओब्ब नीचमनुष्यन मैमेले इट्टंते आगुवदु. मत्तू यावपदक्के याववस्तुवु मुख्यार्थवेनिसुवदो आ वस्तुविनल्लिये आ पदद मुख्य अर्थवु सरियागि संभविसुत्तिरलु अमुख्यवाद वस्तुविनल्लि आ पदद अर्थवन्नंगीकार माडुवदु योग्यवल्लवु. आद कारण ' सत् ' एंब पददिंद मुख्यवागि

१. कोटिशब्दो अवध्यर्थः ।

करिसिगोळ्ळुव परब्रह्मनल्लि प्रकृतार्थवु संभविसुत्तिरलु, अंदरे परब्रह्मवस्तुवे परममहत्परिमितियुळ्ळुदेंबदु संभविसुत्तिरलु, ' सत् ' एंब पददिंद औपचारिक व्यवहरिसुत्तिरुव अल्पपरिमितियुळ्ळुदेंदु निश्चितवागि प्रकृतार्थाऽनुपयुक्तवाद घटपटादिगळे मुख्यार्थवेंदु हेळि अवुगळ परिमितिये परममहत्परिमिति एंदु हेळुवदु अयुक्तवु. हागादरे— ओंदु अत्यंत सण्णवस्तुविनल्लिद्द सत् एंब पददिंद मुख्यवागि करिसिगोळ्ळुव, आ परब्रह्मन परिमितियु एष्टु इरुवदो अदे परममहत्परिमिति एंदु सिद्धवागबहुदल्ल; याकेंदरे आ परब्रह्मवस्तुवु ' मेरुपर्वतदाल्लि मेरुपर्वतक्के समवाद अळतेयुळ्ळ रूपदिंदले इरुवदु. ओंदु नीरिन सण्णबिंदुविनल्लि आ बिंदुसमवाद रूपदिंदले परब्रह्मवस्तुवु व्याप्तवागिरुवदेंदु ' छांदोग्य श्रुतियल्लि हेळिरुवदु. हीगेंदरे ' स्वरूपावस्थितस्य यत् ' आ सूक्ष्मवाद बिंदुविनल्लिद्द परब्रह्मवस्तुवु सूक्ष्मरूपदिंदिद्दाग्यू आ सूक्ष्मवाद बिंदुविनन्नाश्रयमाडिकोंडिरु इल्लवु ' स्वेमहिम्नीतिश्रुतेः ' तन्न माहिमेयिंदले तानिरुवदेंब श्रुतियिंद आ बिंदुवे, ई महामहिम-युळ्ळ परब्रह्मन आश्रयदिंदिरुवदु, आदकारण आ बिंदुविनल्लिद्द परब्रह्मवस्तुवु आ बिंदुविनष्टू इरुवदु. अदक्कू अद्भुतवादरूपदिंदलू इरुवदु. अंदमेले हिंधेळिद्द दोषारोपक्के मार्गविल्लदंतायितु. हागादरे- जगत्तिगे आवरक (मुच्चुहाकिद) स्वरूपादिंदिद्द वासुदेवनेंब श्रीहरिय स्वरूपवु जगत्तिनल्लि प्रविष्टवाद तन्न स्वरूपक्किंत स्वल्पु महत्परिमितियुळ्ळद्दादकारण, आ वासुदेवएंब भगवद्रूपवु तन्न महिमेयन्न आश्रयमाडिकोंडिद्दु, आ वासुदेवनेंब परमात्मन स्वरूपवु एष्टु अळतेयुळ्ळद्दो अदे ' परममहत्परिमिति ' एंदेनुबहुदल्ल; इदन्नु ह्यागे बिडिसुविरि? एंदरे- ' कैवल्यं ' कैवल्यं अंदरे जगत्तिन आवरणमोदलाद कार्यदल्लि उदासीनवाददेंदर्थवु. जगत्तिगे आवरण माडतक्क कार्यदल्लिद्द वासुदेवास्यवाद भगवद्रूपवु आ आवरणवेंब कार्यदल्लिद्दु उदासीनवागलिल्ल इंथ भगवद्रूपगळु जगत्तिन होरगादरू परिच्छिन्न परिमितियुळ्ळवागि (इंतिष्टेंदु अळतियुळ्ळवागि) परमपुरुषने मोदलाद अनेक स्वरूपगळिरुवु. आद्दरिंद इंथ भगवद्रूपवे परममहत्परिमितियुळ्ळदेंदु ह्यागे इदर निर्णयवु? एंदरे ' अविशेषः ' इंथ रूपवे एंब विशेषविल्लदरूपवु. अथवा इष्ट एंदु अळतिइल्लद भगवद्रूपवे परममहत्परिमितियुळ्ळदेनिसुवदु. हागादरे सर्वत्र व्याप्तवाद भगवद्रूपवादरू प्रादेशपरिमित (ओंदु चोटु अळतेयुळ्ळ) स्थळदल्लिसह इरुवदु; अंदमेले आ स्वरूपवादरू अळतेयुळ्ळदे आयितु. एंदरे ' निरंतरः ' प्रादेशमात्रदल्लिये एंब अळतेइल्लदु— ई विषयक्के निर्णयवु हेळल्पडुवदु—परब्रह्मन केवलस्वरूपवेंदु यावदु अनिसुवदो अंदरे ब्रह्मांडदोळगे प्रविष्टवागियू आ ब्रह्मांडक्के होरगे सुत्तगाट्टिदागियू अदे स्वरूपवे परमपुरुषमोदलाद रूपांतरगळिंद एल्लियो ओंदकडिगे प्रादेशमात्रवाद स्थळगळल्लि ह्यागे इरुवदो आप्रकार इरद यावदु सर्वत्रव्याप्तवाद स्वरूपवो, अदे केवल परब्रह्मस्वरूपवु, अदे परममहत्परिमितियुळ्ळदेनिसुवदु. इदक्के प्रमाणवु— " इष्टे कालदल्लिरुवदेंदु कालद अळते इल्लदु कालानंत्यवेनिसुवदु; इंतिष्टे देशदल्लिरुवदेंदु अळतिइल्लदेइद्दु देशानंन्यवेनिसुवदु; इवनल्लि गुणगळु इंतिष्टे बुटेंदु अळति इल्लदु वस्त्वानंत्य अथवा गुणानंत्यवेंदु ज्ञानिगळु बल्लरु. ईप्रकार ई मूरु रीतियिंद अनंतत्ववु श्रीहरिगे मात्र इरुवदु अवनहोर्तु बेरे यारिगू इल्लवु. आ श्रीहरिगे प्रतियोंदु रामकृष्णमोदलाद सर्वरूपगळल्लियू ई मूरुप्रकार अनंतत्ववु सर्वदा इरुवदु. हीगिद्दरू आ श्रीहरिय रामकृष्णादिरूपगळिगे देशादिंद परिच्छेदवूउंटु (श्रीकृष्णनु द्वारका बिट्टु हस्तिनापुरक्के बंदनु, रामनु लंकेगे होदनु, एंदु व्यवहारगळागबेकादरे देशतः परिच्छेदविल्लदिद्दरे ह्यागे संभविसुव्वु?) राम— कृष्णमोदलाद प्रतियोंदु अवताररूपगळल्लियू, आयारूपदिंद सर्वत्र व्याप्तियू उंटु; इंतिष्टेस्थळदल्लिरुवरेंदु देशतःपरिच्छेदवू उंटु, परस्पर विरुद्धवाद ई एरडू ओंदेरूपदल्लि ह्यागे संभविसुव्वु ? एंदरे— आ श्रीहरियल्लि अचिंत्याद्भुत ऐश्वर्यवु इद्दकारण ओंदेरूपदिंद सर्वत्र व्याप्तियू व्यवहारदल्लवागि अव्याप्तियू इरुवदु. (अचिंत्याद्भुत शक्तियंदरे लोकदल्लि एल्लरिंद अशक्यवागिद्दु लौकिकरिंद विलक्षणवागि आश्चर्यकरवाद शक्तियु इंथशक्ति श्रीहरियल्लिरुवदु.) आ श्रीहरिय यल्लरूपगळिगू गुणदिंदलू कालदिंदलू अळतियिल्लवु.

मत्तू प्रतियोंदरूपगळू सर्वत्रव्याप्तवागिरुवदु. ई अवताररूपगळिगू मूलरूपक्कू (अंदरे मेले हेळिद्द केवल परब्रह्मवेंबरूपक्कू) लेशमात्रवू यावप्रकारदिंदलू भेदविल्लवु. इंथ परममहत्परिमितियुळ्ळदेंदु हेळिसिगोळ्ळुव परब्रह्मवे परम अणुरूपउळ्ळदेनिसुवनु; ' अणोरणीयान् महतोमहीयान् ' आदकारणवे श्रीहरियु अचिंत्याद्भुत महदैश्वर्यवुळ्ळवनेनिसुवनु. इंथ श्रीहरिय स्वरूपवु अज्ञानिजनगळ बुद्धिगे गोचरवागुवदक्कागि इंतिष्टु परिमितियुळ्ळदेंदु हेळल्पडुवदु. आ श्रीहरिय नारायणनेंब स्वरूपवु सर्वत्रव्याप्तवादद्दु: अदक्के शुद्ध परब्रह्मवेंदु सर्वरू अनुवरु; अदे परब्रह्मन यरडने स्वरूपवु; जगत्तिनसृष्टियसलुवागि देशतः परिमितियुळ्ळद्दागि ' परमपुरुष ' एंब हेसरुळ्ळदु. जगत्तिगे आवरक (सुत्तलू मुच्चोण) स्वरूपवागिरतक्क ' वासुदेव ' एंब स्वरूपवु मूरनेदु. देशदिंद अळतियुळ्ळद्दागि जगत्तिनल्लि प्रवेशमाडिद स्वरूपवु श्रीविष्णुवेंबदु नाल्कनेदु " एंदु ब्रह्मतर्कवेंबग्रंथदल्लि हेळिद प्रमाणदिंद मंदमतिगळाद जनर संदेहगळ, वुपद्रवगळु परिहारमाडल्पट्टवेंदु तिळियतक्कदु. मत्तू सर्वत्रव्याप्तवाद ब्रह्मस्वरूपवु, कालमोदलाद (आदिपदादिंद अव्याकृताकाशवु) स्वरूपळाद (रमादेवि) प्रकृतियिंद समानवागि व्याप्तियुळ्ळदु. अंदमेले प्रकृतियू परममहत्परिमितियुळ्ळवळादवळल्लवेंदरे—आ प्रकृतियु दार्ष्टांतिकळागिरुवळु ह्यागेंदरे--प्रकृतक्के, कालक्के लक्षण हेळुवदक्के प्रारंभिसि इदु परमाणुकालवु, इदु परममहत्कलवु, एंदु हेळुवदक्के आ कालक्के दृष्टांतरूपवागि द्रव्यस्वरूपनाद ब्रह्मन परममहत्परिमितियन्नु हेळिदरु; आदरे कालवु दार्ष्टांतिकवायितु. प्रकृतिगेनुसंबंधवेंदरे प्रकृतियु कालस्वरूपळे एंदु मेले हेळिदे. आ प्रकृतिय होर्तु एरडनेकडेयल्लि परब्रह्मनु समव्याप्तियिंद इल्लवु. आदकारणवे मेले ' स्वरूपावस्थितस्य ' एंदंदिरुवरु. इदक्के प्रमाणवु— " कालमोदलाद स्वरूपळाद रमादेवियल्लि सर्वत्र व्याप्तवाद ब्रह्मनु इद्दाग्यादरु एरडनेकडेयल्लि इद्दंते अल्लवु; आ रमादेवियु परब्रह्मनंते समव्याप्तळु, प्रकृतक्के दार्ष्टांतिकळागिरुवळु; महत्तत्वमोदलादवुगळल्लि व्याप्तवाद रूपवु ' अन्यग ' एनिसुवदु " एंदु ब्रह्मपुराणदल्लि हेळिदे ॥ २ ॥

एवं कालोप्यनुमितः सौक्ष्म्ये स्थौल्ये च सत्तम ॥ संस्थानभुक्त्या भगवानव्यक्तो व्यक्तभुग्विभुः ॥ ३ ॥ ॥

उक्तमर्थं दार्ष्टांतिके करोति एवमिति सौक्ष्म्ये परमाणुत्वे स्थौल्ये परममहत्त्वे वर्तमानकालोप्येवमनुमितः । कलामुहूर्ताइत्यादिशास्त्रेण साक्षिप्रत्यक्षानुगृहीतव्याप्तिमल्लिंगज्ञानवता जनेनानुमितः ज्ञातइत्यन्वयः । " अनुमेतिद्वयंप्राहुर्यथाज्ञानंचलिंगज - " मित्यभिधानादर्थद्वयं सेत्स्यति । " यावंतंदेवलोकस्थो मानुषस्त्ववधारयेत् । महाप्रज्ञोदेवजूकः सकालः परमाणुकः । सर्गाद्यैरनवच्छिन्नस्तदनंतरइत्यपि । तथैवपरमाण्वादिविशेषात्मापिनोभवेत् । पूर्वापरादिभेदेन सकालः परमोमहानि-" तिशास्त्रवचनं चात्र प्रमाणं यज्ञादिकर्मणाप्रीतदेवताप्रसादेन प्राप्तैश्वर्यो मानवो देवजूकइति । नकेवलमुभयविधः कालोनुमितः किंतु तदंतर्यामी तदाख्यो हरिरपि अनुमितइत्याभिप्रेत्याह । संस्थानभुक्त्येति । विभुर्व्याप्तो भगवान् संस्थानभुक्त्या संस्थानयोः परमाणुत्वेन परममहत्त्वेन व्यवच्छिन्नयोः स्थित्या तदंतर्यामित्वेनाव्यक्तोऽदृश्यः परमाणुः परममहानित्यनुमित इत्यन्वयः । तत्र स्थित्वा किंकरोतीत्यत उक्तं व्यक्तभुगिति । व्यक्तं तत्कालवृत्तिजगत्सृजति पाति संहरतीति व्यक्तभुगिति यद्वा स्वसमानधर्मवत्त्वादव्यक्तं प्रकृतिरूपं सृष्ट्यादौ प्रवर्तयतीति अत्र विशेषस्तु " देशतः कालतश्चैव वस्तुतश्चत्रिधाहरेः । यथानंत्यंनचान्यस्य प्रकृतेर्देशकालतः । तथाशब्दस्यकालस्य देशानंत्यंचकालतः । कालशब्दात्मिकासैव तथापितुहरेःसदा । तस्याःसामर्थ्यलेशोपि ज्ञानानंदगुणेष्वपि ज्ञेयस्तदवरोवायुः शेषवींद्रहरास्ततः । अवरास्ततइंद्राद्या

गुणैःसर्वैर्नसंशय " इतिवचनादवगंतव्यः । किंच कालः कालांतर्यामिणः । परमाण्वादिनामवाच्यत्वं तत्तद्विशेषभोक्तृत्वात्तदुक्तं । " अण्वादिकालसंस्थानभोक्तृत्वात्परमेश्वरः । अण्वादिनामवाच्योऽसौ कालश्चेत्यभिधीयत - " इति ॥ ३ ॥

द्रव्यद परमाणुस्वरूपवन्नू परममहत्परिमितियन्नू दृष्टांतरूपवागि हिंद २ श्लोकगळल्लि हेळिद्दने ईग्ये दार्ष्टांतिकवाद (दृष्टातवन्नु तंगेदुकोळ्ळुव) कालदल्लि तोरिसुवरु. (अंदरे ई द्रव्यप्रमाणवु ह्यागे केवलसूक्ष्मवो अदरंते कालवू अत्यंतसूक्ष्मवु. मत्तु परमात्मनु ह्यागे परममहत्परिमितियुळ्ळवनो अदरंते कालवू परममहत्परिमितियुळ्ळदु एंदु तोरिसुवरु)-परमाणुस्वरूपविषयदल्लियू परममहत्परिमितिविषयदल्लियू इरतक्क कालवु ई द्रव्यदंते तिळियलगडुवदु. अंदरे (कालवु) कलागळू मुहूर्तगळू इवे मोदलाद सूक्ष्मतर सूक्ष्मतम कालगळन्नू महत्कालवन्नू हेळतक्क ज्योतिःशास्त्रदल्लि हेळिदंते (सज्जनर) साक्षि= स्वरूपेंद्रियक्के प्रत्यक्षवाद अनुभवानुसारवागिद्द लौकिकयुक्तियन्नु बल्ल मनुष्यनिंद तिळियल्पट्टिरुवदु. अनुमा एंबदु यरडु दळवुळ्ळदु; शास्त्रदल्लि हेळिद ज्ञानानुसारवागि इरतक्कदोंदु मत्तू लौकिकयुक्तिगे सरियागिरतक्कदोंदु. ई स्थूल सूक्ष्म ई उभयकाल तिळिसुवदक्के प्रमाणवु " देवलोकदल्लिद महाप्राज्ञनेनिसिद देवजूकनेंब (देवजूकद अर्थवु मुंदे अदे,) मानुषनु याव सूक्ष्मकालवन्नु तिळकोळ्ळुवनो आ कालवे परमाणुवेनिसुवदु. अदक्कू सूक्ष्मकालविद्दरू आ देवजूकनिगे गोचरवागुवदिल्लवु, अवनिगे एष्टु सूक्ष्मवु तिळियुवदो अदे परमाणुकालवेंदु तिळियतक्कदु. सृष्टिस्थितिलयगळिगे व्यतिरिक्तवागि अदर अनंतरदल्लियादरू एकप्रकारवागिरतक्कदागि परमाणुमादलाद भेदगळिल्लदे इदु मोदलु, इदु आ मेले एंब भेदगळिल्लदु याव कालवो, अदु परममहत्कालवेंदु तिळियतक्कदु" एंब ब्रह्मतर्कवेंब ग्रंथद वचनवु ई विषयक्के प्रमाणवु. यज्ञयागादि सत्कर्मानुष्ठानमाडिद्दरिंद इवनमले देवतिगळु प्रीतरागि आ देवातिगळ अनुग्रहदिंद ऐश्वर्यवन्नु होंदिद देवलोकदल्लिद मनुष्यनु 'देवजूक' नेनिसुवनु; इदरिंद केवल सूक्ष्म स्थूल ई यरडुप्रकारवाद कालमात्रवे तिळियुवदेंदल्लवु; आ सूक्ष्म स्थूल कालांतर्यामियाद आयाकालशब्दवाच्यनाद श्रीहरियूसहवागि तिळियल्पडुवनु; एंब अभिप्रायदिंद हेळुवरु–' विभुः ' सर्वत्र व्याप्तनाद श्रीहरियु ' संस्थानभुक्त्या ' परमाणुवेंतलू परममहत्एंतलू एरडुप्रकार व्यवस्थेयन्नु होंदिद कालांतर्यामियागि जनर कण्णिगे तोरदंते परमाणु एंब शब्ददिंदलू परममहत् एंब शब्ददिंदलू करिसिगोळ्ळुवनेंदु तिळियुवनु. अल्लि इदु श्रीहरियु एनु माडुवनु, एंदरे 'व्यक्तभुक्' आयाकालदल्लि नियामकनागिद्दु जगत्तु सृष्टिमाडुवनु, संरक्षणे माडुवनु, नाशवन्नुमाडुवनु; अथवा देशकालगळिंद तन्न समळाद प्रकृतियस्वरूपवन्नु (श्रीलक्ष्मीदेवियन्नु) सृष्टिमोदलादवुगळल्लि प्रेरणेमाडुवनु. इदरल्लि हेच्चिन संगतियु एनंदरे देशदिंदलू कालदिंदलू गुणगळिंदलू श्रीहरियु ह्यागे अपरिमितनागिरुवनो, अदरंते एरडनेयवरिगे यारिगू इल्लवु. प्रकृतियु मात्र देशकालगळिंद श्रीहरिगे ममळेनिसुवळु. मत्तू वर्णात्मकशब्दवु कालवु इवु एरडु देशकालगळिंद अनंतवानेसुववु. यांकेंदरे कालक्कू वर्णात्मकशब्दक्कू आ चित्प्रकृतिये अभिमानियु आदाग्यादरू आ रमादेविगे श्रीहरियु ह्यागे ज्ञानानंदादिगुणगळिंद अनंतनागिरुवनो आप्रकार गुणानंत्यविषयदल्लि लेशवादरू शक्तियिल्लवु. ई विषयदल्लि " रमादेविय अनंतर वायुदेवनु, अवन अनंतर शेष, गरुड, रुद्ररु अवर अनंतर इंद्रादिगळु एल्लगुणगळिंदलू तारतम्यवुळ्ळवरु. इदक्के संदेहाविल्लवु" एंदु ब्रह्मवैवर्तदल्लि हेळिरुवदु. मत्तू कालांतर्यामियाद श्रीहरियु परमाणुमोदलाद कालदल्लिद्दु सर्वसारभोक्तृवादकारण परमाणुमोदलाद शब्दगळिंद करिसिगोळ्ळुवनु. मत्तू कालशब्दवाच्यनागिरुवनु. ॥ ३ ॥

स कालः परमाणुर्वै यो भुंक्ते परमाणुतां ॥ सतोऽविशेषभुग्यस्तु स कालः परमो महान् ॥ ४ ॥

सामान्यत उक्तं विशिनष्टि सकालइति । यः कालः कालांतर्यामी हरिश्च परमाणुतां । " चरमस्तुविशेषाणा - " मित्याद्युक्तलक्षणवत्ता भुंक्ते स कालः । " हरिश्चपरमाणुर्वै " इति परमाणुनाम्ना वाच्य इत्युक्तस्मृतिप्रसिद्धमित्यर्थः । सतो ब्रह्मणोऽविशेषं स्वरूपं स्वरूपावस्थितकैवल्याद्यविशेषं निरंतरलक्षणं परममहद्रूपं यः कालः कालांतर्यामीच भुंक्ते स कालः कालांतर्यामिब्रह्मरूपं परममहानिति नाम्ना वाच्यं तस्य कालांतर्यामिणोऽपि त्रिधा परिच्छेदाभावात् । तदुक्तं । " सर्वसर्वत्रभोक्तापि विशेषादेवभोक्तृवत् । स्थितोहरिरचिंत्यात्मा निजैश्वर्यादजोविभु - " रिति अनेन सत एव पदार्थस्येत्यादिना यानि विशेषणानि परममहतो ब्रह्मणः कथितानि तानि महत्कालांतर्यामिणोपि संतीत्युक्तं भवति । तथाहि यः सच्छब्दस्य मुख्यार्थःपरमाण्वादिकालांतर्यामिस्वरूपव्यावृत्तस्तथा मन्वंतरादि कालांतर्यामिस्वरूपव्यावृत्तस्ततोपि स्थूलपरार्धपरादिकालांतर्यामिस्वरूपव्यावृत्तो यश्चाखंडतत्वेपि तदेकदेशाद्यवतारभेदव्यावृत्तत्वेन परममहद्रूपभोक्ता स परममहानिति । यावता कालेन परमाणुपरममहतोरुत्पत्तिप्रलयौ स्यातां तौ कालौ परमाणुपरममहांतावित्ययमर्थः प्रमाणशून्यत्वादुपेक्षणीयः ॥ ४ ॥

हिंदे साधारणवागि हेळिद्दन्ने विशेषवागि विस्तरिसुवरु–' परमाणुतां ' मोदल्गोंडु श्लोकदल्लि परमाणुविन लक्षणगळु यावु हेळल्पट्टवो, आ लक्षणवुळ्ळदु याव कालवो आकालवु परमाणुकालवेनिसुवदु, मत्तू आकालदल्लिद्द श्रीहरियूसहवागि परमाणुशब्ददिंद करिसिगोळ्ळुवनु, एंब अर्थवु स्मृतियल्लि प्रसिद्धवागिरुवदु. एरडने श्लोकदल्लि सद्रूपियाद याव केवल परब्रह्मन परममहद्रूपवु हेळल्पट्टदेयो आ परममहत् एंब लक्षणवुळ्ळदु यावकालवो आ कालवू आ कालांतर्यामियाद श्रीहरियू परममहत् एंब शब्ददिंद करिसिगोळ्ळुवरु. आ कालांतर्यामियागिद्द श्रीहरिगादरू देशतः कालतः गुणतः अनंतत्ववु इदेइरुवदु. इदक्के प्रमाणवु-"श्रीहरियु सर्वत्रदल्लिद्दु सर्ववन्नू भोगिसुवनु; अवनल्लि लोकविलक्षणवाद विशेषशक्तियिद्दकारण सर्वत्रदल्लियू तन्न मूलमहदैश्वर्यदिंदले तनगे उत्पत्त्यादिगळिल्लदे व्याप्तनागिरुवनु" हीगे हेळुवदरिंद हिंदे २ ने श्लोकदल्लि 'सतएवपदार्थस्य ' इवमोदलाद विशेषणगळिंद परममहत्स्वरूपियाद ब्रह्मनिगे लक्षणगळु यावु हेळल्पट्टवो आ लक्षणगळू यावत्तू ई परममहत्कालांतर्यामियाद श्रीहरिगे इरुवंदु हेळल्पडुवदु. अदु ह्यागेंदरे सत् एंब शब्दद मुख्यार्थनाद परब्रह्मनिगे यावलक्षणगळिरुववो, अवु परमाणुमोदलाद कालांतर्यामियादवन लक्षणगळिंद बेरेयागियू, मन्वंतरमोदलाद कालांतर्यामियादवन लक्षणगळिंद बेरेयागियू अदक्कू स्थूलवाद परार्धपर मोदलाद कालांतर्यामियादवन लक्षणगळिंद बेरेयागियू, मत्तू ब्रह्मांडक्के आवरकरूपदिंद इद्द ब्रह्मलक्षणगळिंद बेरेयागियू ब्रह्मांडदहोरगे इद्द अवतारगळ लक्षणगळिंद बेरेयागियू, याव केवलसर्वत्रव्याप्तवाद स्वरूपवु परममहत् एंदु हेळल्पट्टित्तो, अदक्के समानवाद कालवु 'परममहान्' एनिसुवदु. आल्लि अंतर्यामियाद मेले हेळिद लक्षणगळुळ्ळ श्रीहरियु 'परममहान्' एनिसुवनु. (परत्यास्या) एष्टुकालदिंद परमाणु मत्तू परममहत् ई द्रव्यगळ उत्पत्तिलयगळागुववो आ कालगळु परमाणुएंतलू परममहत्एंतलू अनिसुववु, एंब ई परकीयर अर्थक्के प्रमाणविल्लद्दरिंद उदासीनवादद्दु ॥ ४ ॥

अणुर्दो परमाणूस्यात्रसरेणुस्त्रयः स्मृतः ॥ जालार्करश्म्यवगतः खमेवानुपतन्नगात् ॥ ५ ॥

---

१. कोऽसौ योऽतिलघुत्वेन खमेवानुपतन्नगात् गतः अत्र नगादिति पदच्छेदभ्रमवारणायापदच्छेदं दर्शयति । ' अगादिति ' । नगादितिच्छेदेऽर्थासंभव इति भावः ॥— (या.) रा शिभेदाद्दक्षिणोत्तरायणराशिभेदादर्करश्मीनां दक्षिणोत्तरप्रावण्ये त्रसरेणुरपि तथागच्छतीति त्रसरेणुः खमेवार्करश्म्यानुसारेणानुपतन् गच्छन् सर्वदृष्टिपथमगादित्यर्थः ॥— (ता. दी.

इदानीं परमाणुपरममहतोरंतरालकालावयवाना संख्यायोगेन नामान्याह । अणुर्द्वाविति । द्वौ परमाणू मिलितौ द्व्यणुकनामकालः स्यात् उत्तरत्राप्येवमेव ज्ञातव्यानि त्रयोद्व्यणुका मिलितास्त्रसरेणुस्त्र्यणुकः कालः सोऽयमयोगिप्रत्यक्षसिद्ध इत्याह जालेति। जालं गवाक्षं तत्र वर्तमानार्करश्मिनावगतः खमेवानुपतन्नगात् दृष्टिविषयं प्राप्य ज्ञात इत्यर्थः। अत्र सर्वत्र तत्तत्कालावयवांतर्यामित्वेन तत्तच्छब्दवाच्यत्वेन तत्तत्कालवर्तिद्रव्यप्रवर्तकत्वेन स्थितं सच्चिदानंदलक्षणमनंतसंज्ञं स्वरूपमनुभवतीति ज्ञातव्यं। अतएव सर्वत्र सर्वभोक्तेत्युक्तं ॥ ५ ॥

इन्नु परमाणु कालदिंद परममहत्कालदवरेगे मध्यदल्लिद्द कालगळ अवयवगळु ओंदक्कोंदु सण्ण अवयवगळु इंतिष्टु कूडि इंथिथ हेसरु उळ्ळवागुववेंदु आ अवयवगळ हेसरु हेळुवरु— एरडु परमाणुगळु कूडि ओंदु द्व्यणुकवेनिसुवदु; मुंदादरू इदरंते तिळियतक्कदु. अंथ द्व्यणुकगळु मूरु कूडि त्र्यणुककाल वेनिसुवदु. आ त्र्यणुककालवे अयोगिगळाद सर्व जनरिगे प्रत्यक्षवागि तोरुवदु एंदु हेळुवरु. बेळकिंडियोळगे (गवाक्षदोळगे) बिद्द सूर्यकिरणद बेळिकिनल्लि मेले केळगे हाराडुत्त तोरुव सूक्ष्मवाद कणागळु त्र्यणुकवेनिसुववु (अवु द्रव्य त्र्यणुकगळु, अदक्के समानवाद कालवु त्र्यणुककालवेनिसुवदु) इल्लि ' नगात् ' एंदु पदमाडबारदु हागादरे अर्थवागुवदिल्लवु. (खमेव अनुत्पतन् अगात्—दृष्टिविषयं प्राप्य ज्ञात इत्यर्थः) इल्लि एल्लकडेगू आया कालगळल्लि अंतर्यामियागिद्दु आयाशब्दगळिंद मुख्यवाच्यनागि आया कालगळल्लिद्द द्रव्यगळिगे नियामकनागिद्द सच्चिदानंदस्वरूपियाद श्रीहरियु अनंतसंज्ञा वुळ्ळवनागि स्वरूपानुभववदिंद इरुवनेंदु तिळियतक्कदु, आदकारणवे सर्वत्रदल्लियू सर्वसार भोक्तृनेंदु श्रीहरियु प्रसिद्धनु. ॥ ५ ॥

त्रसरेणुत्रिकं भुंक्ते यः कालः सा त्रुटिः स्मता ॥ तत्त्रिभागस्तु वेधः स्यात्तैस्त्रिभिस्तु लवः स्मृतः ॥ ६ ॥
निमेषस्त्रिलवो ज्ञेय आम्नातास्ते त्रयः क्षणः ॥ क्षणान्पंच विदुः काष्ठां लघुता दशपंच च ॥ ७ ॥लघूनि वै समाम्नाता दश पंच च नाडिका ॥ ते द्वे मुहूर्त प्रहरः षड्यामः सप्त वा नृणां ॥ ८ ॥ ॥ ॥

तासां तिसृणां त्रुटीनां भागो भजनं यस्य स तत्रिभागः तिस्रस्त्रुट्यो वेध इत्युक्तं भवति ॥६॥ निमेषाअंगुलिस्फोटेन ज्ञेयाः ताः काष्ठाः पंचदशलघु ॥ ७ ॥ पंचदशलघूनि नाडिका ते द्वे नाडिके मूहूर्त विदुः षण्णाडिकाः प्रहरः सप्तनाडिका यामः सूर्यगतिलक्षितराशिभेदादूनातिरेकाद्वेति विकल्पः ॥ ८ ॥

१. दिवसस्य पंचमो भागः॥— (या.) २. सप्तवानाडिका यामः दिवसस्य चतुर्थोभागः ॥— (या.) ३. नाडीनामितिशेषः । ततश्च कर्कसंक्रमणमारभ्य धनुःसंक्रमणपर्यंतं नाडीनां ऊनात् क्रमेण न्यूनत्वाद्धनुःसंक्रमणसमये यामस्य सप्तनाडीत्वं । मकरसंक्रमणमारभ्य मिथुनसंक्रमणपर्यंतं नाडीनां क्रमेण अतिरेकात् आधिक्यात् मिथुने अष्टनाडीत्वं । मेषतुलयोः सार्धसप्तनाडीत्वमित्यादिविशेषसूचनाय वेति विकल्प इति भावः ॥— (या.)

मूरु त्र्यणुकगळन्नु भोगिसुवकालक्के त्रुटि एन्नुवरु. अंथ मूरु त्रुटिगळु शेरि वेधवेनिसुवदु. मूरु वेधगळु शेरि ओंदु लवकालवेनिसुवदु. ॥ ६ ॥ मूरु लवकालक्के ओंदु निमिषकालवेन्नुवरु एरडु बेरळुगळु कूडिसि ओंदु चिटिगि हारिसिदरे आ कालवे निमिषवेंदु तिळियबेकु. आ निमिषगळु मूरु शेरि ओंदु क्षणकालवेनिसुवदु. ऐदु क्षणगळु शेरि ओंदु काष्ठा एनिसुवदु. आ काष्ठागळु हदिनैदु शेरिदरे ओंदु लघुकाल वेन्नुवरु. ॥ ७ ॥ हदिनैदु लघुकालवादरे ओंदु नाडिका एन्नुवरु. नाडिकाएंदरे, घटिका एंदर्थवु. एरडु नाडिकागळु कूडिदरे ओंदु मुहूर्तवेन्नुवरु. आरु घटिकागळिगे ओंदु प्रहरवेन्नुवरु. एळु घटिकागळिगे ओंदु यामवेन्नुवरु. ई प्रकार मनुष्यर मानवु. ई श्लोकदल्लिय ' वा ' एंब विकल्पवु इष्टु विशेषार्थवन्नु तोरिसुवदु. एनेंदरे— ' यामः सप्तवानृणां ' कर्कसंक्रमणदिंद धनुः संक्रमणद वरेगे नाडिगळु (घटिकागळु) हगलिनल्लि कडिमे यागुववु हगलिन नाल्करल्लि ओंदु भागक्के याम एन्नुवरु. धनुः संक्रमणद समयक्के ओंदु यामक्के एळु. नाडिगळागुववु. आग्ये दिनमानवु २८ घटिका इरुवदु. मकरसंक्रमणदिंद मिथुनसंक्रमणपर्यंतरवागि घटिकागळु क्रमेण हगलिनल्लि हेच्चागुववु. मिथुनसंक्रमणदल्लि ओंदु यामक्के एंटु घटिकागळागुववु. आग्ये ३२ दिनमानविरुवदु. मेष—तुलासंक्रमणगळल्लि एळूवरि ७॥ घटिकागळिगे ओंदु यामवागुवदु. आग्ये ३० दिनमानविरुवदु. ई प्रकार हेच्चुकडिमे यागुवदेंदु तोरिसुवदक्के ' वा ' एंबदु इल्लदु. ॥ ८ ॥

द्वादशार्धपलोन्मानं चतुर्भिश्चतुरंगुलैः ॥ स्वर्णमाषैः कृतच्छिद्रं यावत्प्रस्थजलं पिबेत् ॥ ९ ॥

नाडिकावधिं वक्तुं तत्पात्रलक्षणमाह । द्वादशेति । द्वादशार्धैः षड्भिः पलैः कृतमुन्मानं उत्कृष्टमानं यस्य तत् । "द्वादशार्धपलोन्मानं चतुर्भिश्चतुरंगुलैः" । चतुरंगुलदीर्घैः स्वर्णमाषैः कृतच्छिद्रं कृतद्वारमेवं रचितं नाडीपात्रं यावत्प्रस्थजलं पिबेत्तावता कालेन प्रस्थजले स्थापितं तज्जलं पीत्वा निमज्जति सा नाडिकेत्यन्वयः । इदमुक्तं भवति । चतसृभिः काकिणिकाभिः कृतो विंशांशः तैश्चतुर्भिर्युतो माषः चतुरंगुलदीर्घे माषचतुष्टये कृते सति यावान्परिणाहः स्यात्तावता तत्कृतद्वारं षट्पलरूपं नाडीपात्रमतिशैत्यकलंकमांद्यादिदोषवर्जितं निर्मलं समोष्णं नित्यं सूर्यरश्मिसुतप्तं प्रवाहगतं वसंतकालीनं प्रयागगतंवा जलं पिबति स कालो नाडिकेत्युच्यते । तदुक्तं "काकिणिकाचतुष्कंच विंशांशेत्यभिधीयते । कृष्णलेत्यपितंब्रूयुस्तैश्चतुर्भिस्तुमाषकः । चतुरंगुलदीर्घेतु कृतेमाष चतुष्टये । यावान्स्यात्परिणाहेन तावद्वारंविधीयते । प्रस्थस्यनाडीपात्रस्य षट्पलस्यशुभेजले । भाराधिक्येनोदकेन क्षिप्रंपूर्तिर्भविष्यति । अतिशैत्यकलंकेच माद्येनैवतुपूरणं । तस्माद्वसंतकालेच प्रयागस्थोदकेनच । नाडीशुद्धिःपरीक्षास्यादन्यथानैवसंभवे -" दिति । " निर्मलेनसमोष्णेन नित्यंसूर्यांशुवारिणा । प्रवाहगेन कार्यास्यात्कालशुद्धिःसदैवत्वि -" तिच ॥ ९ ॥

घटिका एंबदु ह्यागे तिळियबेकेंदरे घटिकाद विधानवन्नु हेळुवदक्के आ घटिकापात्रनिर्माणप्रकारवन्नु हेळुवरु— ' द्वादशार्धपलोन्मानं ' उन्मीयते अनेनेति उन्मानं— १६ माष= १ कर्ष. ४ कर्ष.= १ पल. इंथ ६ पलनूकवुळ्ळ ताम्रमयवाद पात्रिगे नाल्कु मासि तुकवुळ्ळ सुवर्णदिंद नाल्कुबेरळु, वृद्धादकड्डियन्नु माडि अदरिंद मध्यदल्लि

छिद्रवन्नुमाडि, आ पात्रियन्नु निंतनीरिनल्लि बिट्टरे आपात्रेयु एष्टु होत्तिगे मुळगुवदो आ होत्तिगे ओंदु घटिका एन्नुवरु. ई विषयक्के हींगे हेळल्पडुवदु– नाल्कुकाकिणिकाएंदरे ओंदु विंशांशवु, ४ विंशांशगळिंगे ओंदु माषएन्नुवरु, अंथ ४ माष सुवर्णवन्नु नाल्कु अंगुल बृहमाडिदरे एष्टु आळतियागुवदो, अदरिंद आ आरुपल तूकवुळ्ळ ताम्रमयवाद पात्रिंगे छिद्रवन्नुमाडि आ पात्रियन्नु अतिशीत कल्कमंदमोदलाद दोषविल्लद निर्मलवाद समशीतोष्णवुळ्ळ, निरंतर सूर्यकिरणदिंद कायुव प्रवाहदल्लिरतक्क वमंत कालद, अथवा प्रयागदल्लिरतक्क स्वच्छवाद नीरिनल्लि आ पात्रियु एष्टु अवधियल्लि मुळुगुवदो आ कालवु ओंदु घटिका एनिसुवदु. नोरु भारवागिद्दरे पात्रियु तीव्रमुळुगुवदु अत्यंतशीतोदकवादरे मंदवाद कारण सरियागि वेळेगे मुळुगुवदिल्लवु, आदकारण वसंतकालदल्लि प्रयागदल्लिय गंगाप्रवाहद उदकवन्नु ओंदु दोड्डपात्रेयल्लि हिडिदु (तुंबि) अदरल्लि आ पात्रे (घटिकापात्रे) यन्नु बिट्टरे अदु सरियागि मुळुगुवदु. इदक्के एनादरू हेच्चु काडिमेयादरे घटिका, कालनिर्णयवु सरियागि आगुवदिल्लवु. ॥ ९ ॥

यामाश्चत्वारश्चत्वारो मर्त्यानामहनी उभे ॥ पक्षः पंचदशाहानि शुक्लः कृष्णश्च मानद ॥ १० ॥ तयोः समुच्चयो मासः पितॄणां तदहर्निशं ॥ द्वौ तावृतुः षडयनं दक्षिणं चोत्तरं दिवि ॥११॥ अयने अहनी प्राहुर्वत्सरो द्वादशस्मृतः ॥ संवत्सरशतं नॄणां परमायुर्निरूपितं ॥ १२ ॥ ॥ ॥ ॥ ॥

उभे अहनी अहोरात्रे अहनीत्युक्तेऽन्होद्वित्वं रात्रिर्नसिध्यतीत्यतउभेति । यत्रोभयोःसशब्दःस्यात्तत्तद्विवचने-प्युभ '' इत्यभिधानात् ॥ १० ॥ उत्तरलिंगापेक्षया तदित्युक्तं । स मनुष्यमासः पितॄणामहोरात्रे तौ द्वौ मासावृतुः षट्ऋतवो दक्षिणायनं उत्तरायणमिति संज्ञिताः ॥ ११ ॥ दिवि स्वर्गे देवानां द्वे अयने अहनी अहोरात्रे रात्रिक्रियाभावाद्रात्रिरप्यहःशब्देनोच्यत इत्यहनी इत्युक्तं । मानुषद्वादशमासावत्सरः ॥ १२ ॥

मनुष्यरिंगे हगलुरात्रि ई एरडु नाल्कु नाल्कु यामवुळ्ळद्दवु. ' हे मानद ' एलै सज्जनरिंगे मर्यादेयन्नु कोडतक्क विदुरने, अंथ हदिनैदु हगलुरात्रिगळुळ्ळ दिवसगळु शेरि, शुक्लपक्षवेंतलू कृष्णपक्षवेंतलू एरडु पक्षगळागुववु. (एंदरे प्रतियोंदु पक्षदल्लियू १५ दिवसगळु) ई श्लोकदल्लि ' अहनी ' एंब द्विवचनप्रयोगदिंद एरडु एंब अर्थवु दोरेयुत्तिरलु, पुनः ' उभे ' एंबदन्नु प्रयोगिसुवदु व्यर्थवागि तोरुवदु एंदरे ई विषयक्के प्रमाणसहितवागि हेळुवरु–– ' याव वाक्यदल्लि विजातिय एरडु शब्दगळु बोधवागुवंते प्रयोगमाडतक्कद्दिद्दु आ एरडु शब्दगळल्लि ओंदे शब्दवन्नु

१. अत्र द्विवचनेनैव विवक्षितोभयलाभे पुनरुभे इति व्यर्थमित्याशंकां तत्सार्थक्याभिधायकप्रमाणेनैव परिहरति ॥ यत्रेति ॥ यत्र वाक्ये उभयोर्विजातीययोरितिशेषः । सशब्दः एकएवशब्दः प्रत्युक्तः स्यात् तत्रद्विवचनेपि द्विवचने प्रयुक्तेपि । विजातीयद्वयग्रहणाय उभे इति पुनःप्रयोक्तव्यमेवेत्यर्थः अन्यथा सजातीयद्वयग्रहणमात्रेण द्विवचनपर्यवसाने ऽपेक्षितस्य विजातीयद्वयस्य बोधोनस्यादिति भावः ॥— (**या.**)

द्विवचनदिंद प्रयोगमाडिदाग्यू अदरमुंद ' उभे ' एरडु– एंबशब्दवन्नु प्रत्येकवागि प्रयोगमाडलेबेकु. इल्लदिद्दरे आ विजातीय एरडुशब्दगळल्लि याव शब्दवन्नु द्विवचनदिंद प्रयोगिसिरुवरो आ शब्दद, सजातीय एरडु एंदु बोधवागुवदु. (इल्लि अहनी एंबल्लि अहःशब्दक्के मत्तोंदु अहःशब्दवु सजातीय एंनिसुवदु. रात्रिशब्दवु विजातीय एनिसुवदु. प्रकृतक्के ' उभे ' एंब शब्दप्रयोगमाडिदद्दरे एरडु हगलु एंदु बोधवागुत्तित्तु) ओंदु हगलु ओंदु रात्रि हींगे एरडु एंदु बोधवागबेकादरे अवश्यवागि ' उभे ' एंबदन्नु प्रयोगमाडलेबेकु ॥ १० ॥ आ शुक्लपक्ष कृष्णपक्ष एरडू शेरि ओंदुमास (तिंगळु) एनिसुवदु. आ मनुष्यमानद मासवु पितृगाळिंगे ओंदु हगलु रात्रेयुळ्ळ दिवसवेनिसुवदु. आ मनुष्यमानद एरडु मासगळु शेरि ओंदु ' ऋतु ' एनिसुवदु (आरुतिंगळिंगे ओंदु अयनवु आ अयनगळु दक्षिणायनवेंतलू उत्तरायणवेंतलू एरडु इरुवु) आरु ऋतुगळु शेरिदरे दक्षिणायनवेंतलू उत्तरायणवेंतलू एरडु हेसरु बरुववु. ई श्लोकदल्लि ' तदहर्निशं ' एंबल्लि विजयध्व. व्या. व्यत्यस्त तोरुत्तदे एंब नियमानुसारवागि हिंदे ' मासः ' एंबदु पुल्लिंगविद्दकारण ई तच्छब्दवादरू पुल्लिंगदल्लि सः एंदागतक्कदु; अंथाद्दु तत् एंदु नपुसकलिंग ह्यागे प्रयोगिसिदरेंदरे. पूर्वद अर्थवन्नु परामर्शि विधेयलिंगानुसारवागि नपुंसकप्रयोगवु. अहर्निशं एंबदु विधेयवु. ॥ ११ ॥ मनुष्यमानानुसारवाद उत्तरायण दक्षिणायनगळु स्वर्गलोकदल्लि इद्द देवतिगळिंगे हगलु रात्रिगळेनिसुववु. आ लोकदल्लि मनुष्यलोकदंते रात्रिय कल्पविल्लद्दरिंद रात्रिगादरू अहःवेंदु ' अहनी ' प्रयोगमाडिरुवरु. (अंदरे मनुष्यरिंगे ओंदु वरुषवादरे देवतिगळिंगे ओंदु दिवसवु. अदरल्लि उत्तरायणवु हगलु दक्षिणायनवु रात्रियु) मेले हेळिद मनुष्यमानद हन्नेरडु तिंगळिंगे ओंदु संवत्सरवेन्नुवरु. मनुष्यरिंगे इंथ नूरुवरुष आयुष्यवु परमावधियु अदक्के प्रायः हेच्चु इल्लवु.॥ १२ ॥

ग्रहर्क्षताराचक्रस्थः परमाण्वादिना जगत् ॥ संवत्सरावसानेन पर्येत्यनिमिषो विभुः ॥ १३ ॥

सूर्यादिनवग्रहाणां अश्विन्यादिनक्षत्राणां ध्रुवादितारकाणां चक्रस्थो मंडलस्थः । प्राणिनां पुण्यपापकर्मदर्शनादनिशं मिषणाद्गमनाद्वा विकसनाद्वा मिषगतौ विकासेचानिमिषो विभुः परमाण्वादिसंवत्सरावसानेन कालेन पर्येति जगदितिशेषः । ''सर्वदादर्शनात्तस्यानिमिषत्वंविदुर्बुधाः । सततंगमनाद्वापि कालस्थस्यमहात्मन'' इति । अनेनापिमुख्यतः कालशब्दवाच्यो हरिरिति सिद्धं ॥ १३ ॥

' ग्रहर्क्षताराचक्रस्थः ' ग्रहगळेंदरे– सूर्यनेमोदलाद नवग्रहगळु. ऋक्षएंदरे– अश्विनीमोदलाद २७ नक्षत्रगळु. तराएंदरे– ध्रुवमोदलाद तारागळु. ई ज्योतिश्चक्रमंडलदल्लिद्दु श्रीहरियु; एल्ल प्राणिगळू माडतक्क पुण्यपापकर्मगळन्नु नोडुत्त कण्णेवेगळन्नु, हाकदिद्दकारण अनिमिषनेनिसुव, अथवा ई ज्योतिश्चक्रदसंगड सदागमनवुळ्ळवनाद्दरिंद अनिमिषनेनिसुव, अथवा ' ई यावत्तू नोडि मुगळुनगोयिंद नगुत्तिद्दरिंद अनिमिषनेनिसुव. ' मिष् ' एंब धातुवु गत्यर्थदल्लियू विकासदल्लियू इरुवदरिंद मेलेहेळिद अर्थवु सरियादद्दु. ईप्रकार अनिमिषनेनिसुव श्रीहरियु, परमाणुकालारंभिसि

१ चंक्रमणाच्चक्रनामकं मंडलं तत्र स्थितः ।– (**या.**)

संवत्सपर्यंतरवाद कालदिंद जगद्व्यापारनडिसुवनु अथवा जगत्तनु तिरिगिसुवनु. इदक्के प्रमाणवु ' सर्वदा सर्वजनर चेष्टेगळन्नु नोडुत्तिद्दरिंद आ श्रीहरिगे ज्ञानिगळु अनिमिषनेन्नुवरु अथवा सर्वदा संचारवुळ्ळवनाद्दरिंद कालचक्रदल्लिद्दवगे अनिमिषनेन्नुवरु. ' ई स्पष्ट मूलश्लोकद वाक्यदिंदादरू कालशब्ददिंद श्रीहरिये मुख्यवागि करिसिगोळ्ळुवनेंदु, सिद्धवायितु. ॥ १३ ॥

संवत्सरः परिवत्सर इडावत्सर एव च ॥ अनुवत्सरो वत्सरश्च विदुरैवं प्रभाष्यते ॥ १४ ॥ ॥

तत्तत्संज्ञकालस्थत्वेन तन्नियंतृत्वेन तत्तन्नामवानित्याह । संवत्सरइति । सौरद्वादशमासाः संक्रमणावसानास्तेषु द्वादशेषु मासेषु स्थितः संवत्सरः द्वादशराशिषु बृहस्पतेरावृत्त्या यः कालः तस्य द्वादशमे भागे यस्तिष्ठति स परिवत्सराख्यः सप्तविंशन्नक्षत्राणि तद्वादशमासेषु स्थित इडावत्सरनामा तिथीनां द्वादशावर्तो यो द्वादशमासरूपस्तत्र स्थितो हरिरनुवत्सरः अन्हां षष्ट्युत्तरशतत्रयात्मा द्वादशमासेषु स्थितो हरिर्वत्सरनामा कालांतर्यामी हरिरेवं रूपो भाष्यत इत्यन्वयः।तदुक्तं " इडावत्सरनामासौ नक्षत्रद्वादशेस्थितः । तिथीनांद्वादशावर्ते योहरिःसोऽनुवत्सरः । वत्सरोयःस्थितस्त्वन्हां षष्ट्युत्तरशतत्रये । गुर्वावर्तद्वादशांशे यःस्थितःपरिवत्सरः । सौरद्वादशमासेषु यत्स्थःसंवत्सरोहरिः । एवंसकालनामापि कालस्थःपरमेश्वर - " इति स्मृतिसिद्धत्वादिदं ग्राह्यं ॥ १४ ॥

श्रीहरियु आया संज्ञावुळ्ळ कालद्लिद्दु अदक्के नियामकनाद्दरिंद, आया हेसरुळ्ळवनेंदु हेळुवरु— सूर्यमानदिंद १२ तिंगळुगळु अंदरे मेषसंक्रमणवे मोदलाद १२ संक्रमणगळिंद सूर्यनु संचरिसुवनु. १२ संक्रमणगळु मुगिदरे ओंदु संवत्सरवेन्नुवरु. मत्तू ई १२ संक्रमणगळल्लि नियामकनाद श्रीहरियु, १ संवत्सरनेनिसुवनु. (सौरमानक्के संवत्सरवेन्नुवरु) हन्नेरडु– १२ राशिगळल्लि बृहस्पतियु संचारमाडुव कालदोळगे $\frac{1}{12}$ हेन्नरडरल्लि ओंदु भागकालदल्लिद्द श्रीहरियु परिवत्सरनेनिसुवनु. बृहस्पतियु, ओंदु राशियल्लि साधारणवागि (स्वल्पु हेच्चुकडिमेयिंद) ओंदु वरुषइरुवनु. आ मानक्के (बार्हस्पत्यमानक्के) २ परिवत्सरएन्नुवरु— मत्तू अश्विनीमोदलाद २७ नक्षत्रगळु हन्नेरडावर्ति संचरिसुव कालदल्लिद्द श्रीहरियु इडावत्सरनेनिसुवनु. (नक्षत्रमानक्के ३ इडावत्सरनेन्नुवरु.) मत्तू प्रतिपदा तिथियिंद अमावास्यादवरेगे ई ३० तिथिगळु हन्नेरडुसारे तिरुगुव, हन्नेरडु तिंगळल्लिद्द श्रीहरियु अनुवत्सरनेनिसुवनु. (मासमानक्के) ४ अनवत्सरनेन्नुवरु. ३६० मुन्नूरा अरवत्तुदिवसगळ स्वरूपनागि हन्नेरडु तिंगळल्लिद्दु वत्सरनामकनागि कालांतर्यामियाद श्रीहरियु, हे, विदुरने ई ऐदु शब्दगळिंद होगळिसिगोळ्ळुवनु. (३६० दिवसगळिगे ५ वत्सरनेन्नुवरु.) इदक्के प्रमाणवु ' नक्षत्रगळ १२ सारे संचारदल्लिद्द हरियु इडावत्सरनेनिसुवनु. तिथिगळ १२ सारे संचारदल्लिद्द हरियु अनुवत्सरनु. ३६० दिवसगळल्लिद्दवनु वत्सरनु. गुरुसंचारद $\frac{1}{12}$ कालदल्लिद्दवनु परिवत्सरनेनिसुवनु. सूर्यन १२ तिंगळल्लिद्दवनु वत्सरनेनिसुवनु. ईप्रकार आया कालदल्लिद्दु श्रीरियु आया कालनामकनेनिसुवनु ' एंदु ब्रह्मतर्कवेंब ग्रंथदल्लि हेळिद्दरिंद ई अर्थवु ग्राह्यवादद्दु ॥ १४ ॥

---

१. वेदादाविति शेषः ।– (या.)

यः सृज्यशक्तिमुरुधोच्छ्वसयन् स्वशक्त्या पुंसोऽभ्रमाय दिवि धावति भूतभेदः ॥ कालाख्यया गुणमयीं क्रतुभिर्वितन्वंस्तस्मै बलिं हरत वत्सरपंचकाय ॥ १५ ॥ ॥ ॥ ॥ ॥

वत्सरादिनामकरणप्रयोजनमाह यइति । यः कालांतर्यामी हरिः क्रतुभिः स्वप्रज्ञाभिः स्वेच्छानुरूपाभिः कालाख्यया स्वशक्त्या प्रकृत्या गुणमयीं सत्वादिगुणविकाररूपां सृज्यशक्तिं सृष्टव्यपदार्थविषयां प्रकृतिं उरुधोच्छ्वसयन् जृंभयन् पदार्थान् वितन्वन् विस्तारयन् पुंसोऽभ्रमायाज्ञाननिवृत्तये भूतानां भेदो ज्यैष्ठ्यकानिष्ठ्यविवेकज्ञानं यस्मात्स तथोक्तः । " भूतानांज्यैष्ठ्यकानिष्ठ्यज्ञप्त्यैयज्ञादिवृत्तये । बोधयन्सृज्यशक्तिंच कालस्थोवर्ततेहरि - " रितिच दिवि व्योम्नि धावति सूर्यस्थो भूत्वा वेगेन गच्छति तस्मै वत्सरपंचकाय संवत्सरादिपंचकांतर्यामिणे बलिं हरत कुरुतेत्यन्वयः । अनेकार्थत्वाद्धातूनां ॥ १५ ॥

वत्सरमोदलाद हेसरु इडुवदक्के कारणवन्नु हेळुवरु— याव कालांतर्यामियाद श्रीहरियु– तन्न इच्छाम्वरूपवाद प्रज्ञागळिंद– कालस्वरूपळाद प्रकृतियिंद (अंदरे सृष्टिकालबंदाग्गे अदक्के तक्कंते) सत्वादिगुणविकारस्वरूपळाद, सृष्टिगे योग्यळाद जडप्रकृतियन्नु अनेकप्रकारवागि प्रकटमाडुत्त अंदरे जडप्रकृतियिंद अनेकपदार्थगळन्नु विस्तारवागि सृष्टिमाडुत्त लोकदल्लि कालकालक्के तक्क सत्कर्मानुष्ठानमाडतक्क योग्यपुरुषरिगे, आयाकालक्के सरियागि आयाकर्मानुष्ठानगळन्नु माडुवदक्के कालसंबंधवाद भ्रमवु (अपराह्णकालवु यावदु मध्यान्हवु यावदु एंब भ्रमवु) बारदंते, मत्तू प्राणिगळल्लि जेष्ठरु यारु? कनिष्ठरु यारु? एंबदु तिळियुवदक्कागि (द्वुट्टि १० वरुषआदवनु ४ वरुषदवनक्किंत ज्येष्ठनु एंदु ज्येष्ठ कनिष्ठ निर्णयक्क कालवु बेकु एंब आभिप्रायवु) अंतरिक्ष लोकदल्लिद्द सूर्यमंडलदल्लिद्दु वेगदिंद याव श्रीहरियु धाविसुवनो, हिंदेहेळिद संवत्सरमोदलाद ऐदु स्वरूपवुळ्ळ आ श्रीहरिगे बलियन्नु अर्पणमाडिरि. इल्लि ' हरत ' एंबदरिंद वय्यरि एंदु अर्थवागबेकु माडरि एंदु ह्यागे अंदरे धातुगळिगे संदर्भानुसार अनेक अर्थगळु ॥१५॥

विदुर उवाच ॥ पितृदेवमनुष्याणामायुः परमिदंस्मृतं ॥ परेषा गतिमाचक्ष्व ये स्युः कल्पाद्बहिर्विदः ॥ १६ ॥ भगवान्वेद कालस्य गतिं भगवतो ननु ॥ विश्वं विचक्षते धीरा योगराद्धेन चक्षुषा ॥ १७ ॥ ॥ ॥

विदुर उक्तार्थमनूद्य वक्तव्यार्थं विज्ञापयति पितृदेवेति । ये विदो ज्ञानिनः कल्पात् लोकत्रयात् बहिर्महर्लोकादिषु वर्तमानाः स्युस्तेषां परेषामुत्तमानां गतिं स्थितिमाचक्ष्वेत्यन्वयः ॥ १६ ॥ मैत्रेयस्य वक्तव्यार्थे ज्ञानपाटवमस्तीत्याह भगवानिति । कालस्य कालांतर्यामिणो भगवतो गतिं गमनं वर्तनं वेद ननु कुतः धीराः धीषु रममाणाः ज्ञानिनो योगराद्धेनाष्टांगयोगसिद्धेन चक्षुषा विश्वं विचक्षते भगवानपि तेष्वेकइति तत्तस्मादिति शेषः ॥ १७ ॥

१. पुमः वाहतकर्मकतुः । अभ्रमाय यज्ञागकालभ्रमाभावाय यज्ञादप्रवृत्तयात यावत् । —(या.)

ईप्रकार मैत्रेयरु हेळिद अर्थवन्नु विदुरनु अनुवादमाडि मुंदे ई विषयन्नु हेळबेकेंदु विज्ञापनमाडिकोळ्ळुवनु— हे मैत्रेयरे, तावु इद्दूवरेगे हेळिदु, पितृगळु देवतिगळु मनुष्यरु इवर आयुर्मानवेंदु आयितु— ;यांव ज्ञानिगळु भूर्भुवस्वः एंब मूरुलोकद होरगे महर्लोकादिगळल्लिरुवरो आ उत्तमर स्थितियन्नु (कालगतियन्नु) हेळबेकु ॥ १६ ॥ ईप्रकार तानु प्रश्नमाडिद्दक्के उत्तरवन्नु हेळुवविषयदल्लि मैत्रेयरिगे ज्ञानवु प्रकाशरूपवागिरुवदेंदु हेळुवनु— कालांतर्यामियाद श्रीहरिय संचारवन्नु तावु बल्लिरि, एंबदु निश्चयवु. यार्केंदरे— 'धीराः' तम्म बुद्धियल्लिये आनंदवडतक्क ज्ञानिगळु अष्टांगयोगाभ्यासदिंद सिद्धवाद ज्ञानचक्षुःसिनिंद जगत्तन्नेल्ल बल्लरु. परमपूज्यराद तावादरू अंथ ज्ञानिगळ समूहदोळगिनवरेः आद कारण ई विषयन्नु तम्मन्नु केळिरुवेनु. ॥ १७ ॥

मैत्रेयउवाच॥ कृतंत्रेता द्वापरं च कलिश्चेति चतुर्युगं ॥ दिव्यैर्दादशसाहस्रैः सावधानं निरूपितं ॥ १८ ॥
चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमं ॥ संख्यातानि सहस्राणि द्विगुणानि शतानि च ॥ १९ ॥

महर्लोकादिस्थितानामायुर्वक्ष्यन् कृतादिचतुर्युगतत्संध्याकालपरिमाणं वक्ति कृतमिति । दिव्यैर्देवानां विद्यमानैः ॥१८॥ एतदेव विवेचयति । चत्वारीति । एवं कृतादिषु दशसहस्राणि एकैकन्हासक्रमेण संख्यातानि द्विगुणानि शतानि अवशिष्टद्विसहस्रगतशतानि कृतादिपूर्वापरसंध्यारूपाणि कलियुगपूर्वापरसंध्यामारभ्य द्विगुणानि ज्ञेयानि । तथाहि कलियुगपूर्वापरसंध्ये शतं द्वापरपूर्वापरसंध्ये द्विशतं त्रेतायुगपूर्वापरसंध्ये त्रिशतं कृतयुगपूर्वापरसंध्ये चतुःशतं एवं विंशच्छतानां युगेभ्यो द्विगुणित्वं ॥ १९ ॥

मैत्रेयरु विदुरन प्रश्नानुसारवागि महर्लोकमोदलादवुगळल्लिद्दवर आयुर्मानवन्नु हेळुत्त कृतयुगमोदलाद नाल्कुयुगगळ कालपरिमितियन्नू आयायुगगळ संधिकालपरिमितियन्नू हेळुवरु—हे विदुरने, कृतयुगवु, त्रेतायुगवु, द्वापरयुगवु, कलियुगवु एंदु नाल्कु युगगळु इरुवुवु. ई नाल्कुयुगगळ मानवु, देवमानदिंद हन्नेरडु सहस्रवरुषगळेंदु क्लृप्तवागिरुवदु. ॥ १८ ॥ इद्दन्ने विंगडिसुवरु— कृतयुगवु देवमानदिंद (मनुष्यमानद ३६० वरुषगळादरे देवतिगळिगे ओंदु वरुषवु.) नाल्कुसहस्रवरुष अवधियुळ्ळदु त्रेतायुगवु. २ मूरुसहस्रवु द्वापारवु. एरडसहस्रवु कलियुगवु. ओंदुसहस्रवु. ईप्रकार क्रमानुसारवागिरुववु. हागादरे--वट्टु हत्तु सहस्रवरुषवायितु. इन्न एरडुसहस्रवेल्लि एंदरे? १ कलियुगवु होगि कृतयुगवु बरुवसंधियल्लि देवमानदिंद २०० वरुषगळु होगुववु. मत्तू कृतयुगवु होगि त्रेतायुगवु बरुवसंधियल्लि ८०० वरुषगळु, देवमानदिंद होगुववु. त्रेतायुगवु होगि द्वापरवु बरुव संधियल्लि ६०० वरुषगळु होगुववु. द्वापरवु होगि कलियुगवु बरुवसंधियल्लि ४०० वरुषगळु देवमानदिंद, होगुववु. ईप्रकार ई २००० महस्रवरुषगळु अवांतरसंधिकालक्के संबंधपट्टिरुवनु. इदेप्रकार प्रमाणविरुवदु. आ प्रमाणद अर्थवु मेले हेळिदंते इद्दकारण पुनः हेळुवदु कारणविल्लवु.॥१९॥

संध्यांशयोरंतरेण यः कालः शतसंख्ययोः ॥ तमेवाहुर्युगं तज्ज्ञा यत्र धर्मो विधीयते ॥ २० ॥ धर्मश्चतुष्पान्मनुजान्कृते समनुवर्तते ॥ स एवान्येष्वधर्मेण व्येति पादेन वर्धता ॥ २१ ॥ ॥ ॥ ॥

एवं तर्हि कृतादियुगत्वं कस्य कालस्येति तत्राह । संध्येति शतसंख्ययोः संध्या संध्यांशयोः अंतस्थो यः कालः यत्र तत्तद्युगधर्मो विधीयते तमेव युगज्ञा युगमानमाहुः । कृतादिषु संध्याकालाः पूर्वापरकोटिसंबद्धा द्वारस्थाः कालविशेषाः संध्यांशाख्या इति ॥ २० ॥ कृतादिषु यो धर्मो विधीयते स किमवयवो वर्तत इति तद्वृत्तिप्रकारं वक्ति धर्मइति । तपः सत्यं दया शौचमिति चतुष्पान्मनुजानुद्दिश्येतिशेषः । अन्येषु त्रेतादिषु स्वनामानुसारेण तपोविरोधिना वर्धता वर्धमानेनाधर्मेण व्येति ह्रसति क्रमेणेति योज्यं ॥ २१ ॥

त्यागात्यागौ त्वितरप्रार्थनया महतां स्वभावइतिभावेनाहसइत्थामिति । अद्यापि सह स्थितत्वान्नेयं निजा सरस्वती किंत्वन्यैव । त्यक्ता सा केति मंदाशंका । " यांतत्याज विभुर्ब्रह्मामानुषीवाकृतुसास्मृता । सरस्वतीनिजा भार्या देवींवाचंतुतांविदुरि - " तिवाक्येन परिहर्तव्या दिशइति दिक्स्था जना लक्ष्यंते अन्यथा मानुषीतिविशेष्योक्तिर्व्यर्था स्यात् तथाच यद्यस्या उत्पन्नं नीहाराख्यं तमो विदुरित्यर्थः ॥ ३३ ॥ वेदादितदभिमानिनीनां सृष्टिरुर्वरितेति सुप्तप्रतिबुद्धइव तत्सृष्टिं कथयति कदाचिदिति चतुर्मुखादिति चतुर्भ्यो मुखेभ्य इत्यर्थःचातुर्होत्रकर्मादिकमपि भगवत्ध्यानपूर्वकं सृष्टत्वाद्गाह्यमितिभावेनाह कथमिति । कर्मणा समवेतानुपपन्नाल्लोकान् कथं स्रक्ष्यामि द्रक्ष्यामीति ध्यायतो ब्रह्मणो वाचा कर्मतंत्रं कर्मशास्त्रं समुत्पन्नं उपवेदस्मृतिलक्षणैर्नयैरुपोद्घातग्रंथैः सह । अत्र विशेषस्तु " अभिमानिनःशब्दतश्च ब्रह्मा वेदान्ससर्जह । यज्ञादींश्चक्लृपे वाचा तथासर्वाभिमानिनः । इतिहासपुराणेतु श्रुत्वाहरिमुखात्स्वयं । भारतादीन् विनापश्याद्धरिणान्यैश्चनिर्मितान् " इत्यनेन ज्ञातव्यः । आश्रमवृत्तयः । आश्रमाश्च तदाचाराश्च ॥ ३४ ॥ ३५ ॥

---

१. होत्रादीनां चतुर्णां संबंधि कर्म तंत्रं यज्ञविस्तारः उपवेदाः गांधर्वादयः नयाः नीतिशास्त्राणि तैःसह ॥— (**या.**) २. ' यामिति ' मानुषीवाक् मनुष्यवागभिमानिनी काचन देवता । ' सरस्वतीति ' दैवी या वाकृतदभिमानिनी निजभार्येत्यर्थः॥— (**दी.**) ३. मनुष्यसंबंधिनी वागेव । कणादादिनिर्मितकुशास्त्ररूपा तदभिमानिनीतियावत् ॥— (**या.**) ४. तां देवींतु देवीमेववाचं वेदादिरूपवागभिमानिनी ज्ञानिनो विदुरित्यर्थः ॥— (**या.**) ५. वेदान् समसर्जेत्यस्य वेदाभिमानिदेवतादेहान् समसर्जेत्येवार्थो नत्वितरशास्त्रवच्छब्दतमर्जनमित्यर्थः ॥— (**या.**)

यवदादरोंदु वस्तुगळन्नु तेगेदुकोळ्ळुवदू बिडुवदू हत्तरद्द इतरजनर प्रार्थनानुसारवागि माडतक्कदु महर्नायर सहजस्वभाववेंब अभिप्रायदिंद हेळुवरु–आग्ये आ ब्रह्मदेवनु तन्नमुंदे हींगे प्रार्थनेमाडि कोळ्ळुत्तिरुव प्रजेश्वरराद पुत्ररन्नुनोडि तानु सकलप्रजेश्वररिगे पतियाद्दरिंद लज्जितनागि आ सुंदरस्त्रीयळन्नु परित्यागमाडिदनु. आदरे ई परित्यक्तळाद स्त्रीयळु ब्रह्मदेवन निजभार्यळाद सरस्वतियल्लवु. आ सरस्वतियु अद्यापि ब्रह्मसन्निधियल्लिये इरुवळु. हागादरे ई परित्यक्तळादवळु यारेंदरे– ' यावळन्नु ब्रह्मदेवनु परित्यागमाडिदनो अवळु मनुष्यसंबंधी वाणियु अंदरे कणादने मोदलाद तार्किकरु निर्माणमाडिद कुच्छितवाद न्यायशास्त्रवे मोदलादवुगळिगे अभिमानियु. सरस्वती एंबवळु ब्रह्मदेवन निजभार्यळु आ सरस्वतियु देवतिगळ वाणीगू तत्वप्रतिपादकवाद सच्छास्त्रगळिगू अभिमानिएंदु आ सरस्वतियन्नु ज्ञानिगळु बल्लरु. ' एंब प्रमाणानुसारवागि हिंदिन मंदेहवन्नु परिहरिसितक्कदु आ ब्रह्मदेवनिंद परित्यक्तळाद घोरतर मनुष्यवाण्यभिमानियाद देवतियन्नु नाल्कुदिक्कुगळल्लिद्द जनरु स्वीकारमाडिदरु. मनुष्यरु स्वीकारमाडिदरेंदु हेळदिद्दरे मनुष्यरवाणीएंदु हिंदे विशेषणकोट्टु हेळिदु व्यर्थवागबेकादीतु. मत्तू याव मनुष्यवाणिगे अभिमानियाद देवते देशेयिंद नीहार (मंजु) एंब नामवुळ्ळ कत्तले उत्पन्नवायितो अदे मज्ज्ञानक्के प्रतिबंधकवाद मिथ्याज्ञानवेंदु ज्ञानिगळु तिळियुवरेंदर्थवु. ॥३३॥ इष्टु ई संगतियन्नु हेळि, वेदगळू ' वेदाभिमानिगळू इवर सृष्टियु हेळदे उळिदिरुवदन्नु तिळिदु, मत्तगिदवनु चतुर्वदिकेयिद एदंते मोदलु आ सृष्टियन्नु हेळुवरु— सृष्टिकर्तृवाद ब्रह्मदेवनु वंदु वेळे योचनेमाडुत्तिरलु अवन नाल्कूमुखगळिंद नाल्कु वेदगळु होरटवु.॥३४॥ नाल्कुजन ऋत्विजरिंद नडेयतक्क यज्ञादिकर्मवादरू भगवद्ध्यानपूर्वकवागि सृष्टवादकारण अदु ग्राह्यवेंब अभिप्रायदिंद हेळुवरु–तम्म तम्म कर्मगळिंद सहितवागि प्रजरु हिंदिन सृष्टियल्लि यावप्रकार इद्दरो; अदरंते ईग्ये तम्म कर्मसहितरागि हुट्टिद प्रजरन्नु नानु ह्यागे कंडेनु; एंदु ध्यानमाडुत्त कुळित चतुर्मुखन वाक्यदिंद स्मृतिगळेंब उपोद्घात ग्रंथ (याव कर्मगळन्नु ह्यागे माडबेकेंबदन्नु प्रतिपादन माडतक्क शास्त्र) गळिंद सहितवाद कर्मप्रतिपादकशास्त्रवु उत्पन्नवायितु. ईविषयक्के विशेषसंगतियु –' वेदाभिमानिदेवतिगळिंद सहितवाद शब्दस्वरूपवाद वेदगळन्नु ब्रह्मदेवनु सृष्टिमाडिदनु. (अंदरे वेदगळु मोदल्गि ब्रह्मन मुखदिंद होरटवु. आ वेदमंत्रगळिंद यज्ञगळन्नु माडतक्क ग्रंथगळन्नु तन्न वाक्यदिंद रचिसिदनु, मत्तू अवुगळिगे अभिमानिदेवतिगळु इंथवरेंदु क्लृप्तमाडिदनु इतिहासपुराणगळन्नु श्रीहरिमुखदिंद तानु केळि अदरंते रचिसिदनु अदरल्लियू भारतमोदलाद केलवु ग्रंथगळु आमेले श्रीहरियिंदलू अवन शिष्यरिंदलू रचितवादवु. ' एंब ई प्रमाणदिंद तिळकोळ्ळुतक्कदु मत्तू ब्रह्मदेवनिंद धर्मद नाल्कु पादगळु नाल्कुप्रकारवाद आश्रमधर्मगळू सृष्टवादवु. ॥ ३५ ॥

विदुरउवाच ॥ स वै विश्वसृजामीशो वेदादीन्मुखतोऽसृजत् ॥ यद्यद्येनासृजद्देवस्तन्मे ब्रूहि तपोधन ॥ ३६ ॥

विदुरः स्वयं विभागं जानन्नपि लोकहितार्थं विविच्य वक्तव्यमिति पृच्छतीत्याह विदुरइति ॥ ३६ ॥

विदुरनु ईमुंदे हेळतक्क वेदविभागवन्नु स्वतः तानु बल्लवनादरू लोकहितार्थवागि, ईविषयवन्नु विंगडिसि हेळबेकेंदु प्रश्नमाडुवनु.– (विदुरनु अंदनु) ' हे तपोधन ' तपस्समृद्ध्यर्थमंतिदुगोंड मैत्रेयरे आ जगत्तन्नु सृष्टिमाडुववरिगे स्वामियाद आ ब्रह्मदेवनु वेदमोदलादवुगळन्नु सृष्टिमाडिदनष्टे याव याव मुखदिंद एनेनु सृष्टि माडिदनो आयावत्तू विस्तारवागि ननगे हेळबेकु ॥ ३६ ॥

मैत्रेयउवाच ॥ ऋग्यजुःसामाथर्वाख्यान् वेदान्पूर्वादिभिर्मुखैः ॥ शस्त्रमिज्यां स्तुतिस्तोमं प्रायश्चितं व्यधात्क्रमात् ॥३७॥ आयुर्वेदं धनुर्वेदं गांधर्वं वेदमात्मनः ॥ स्थापत्यं चासृजद्वेदं क्रमात्पूर्वादिभिर्मुखैः ॥ ३८ ॥ इतिहासपुराणंच पंचमंवेदमीश्वरः ॥ सर्वेभ्य एव वक्त्रेभ्यः ससृजे सर्वदर्शनः ॥ ३९ ॥ ॥ ॥ ॥

मैत्रेयोपि लोकहिताय विस्तरतो विदुरप्रश्नं परिहरतीत्याह ऋग्यजुरिति । पूर्वादिभिः पूर्वदक्षिणपश्चिमोत्तरदिक्भेदभिन्नैः शस्त्रं मंत्रं ऋग्वेदगतमिज्यां मंत्रं याजुषं स्तुतिस्तोममंत्रौ सामवेदगौ स्तोमः क्रियमाणकर्म पुरतः क्रियमाणस्तुतिविशेषः अन्यदा क्रियमाणा स्तुतिः प्रायश्चित्तमाथर्वणं व्यधात् विभागं कृतवान् वेदानां पूर्वमेवोद्धृतत्वात् ॥३७॥ आयुर्वेदं बाहढं धनुर्वेदमायुधविद्यां गांधर्वं भरतशास्त्रं स्थापत्यं तक्षशास्त्रं ॥३८॥ इतिहाससहितं पुराणं शब्दतएव रचनं नत्वर्थतः तस्य वैदिकत्वात् वेदस्य व्यक्तिमात्रमेव करणं नच जनिवादिनो वाक्यस्याविषयत्वेनाप्रमाण्यं तस्य स्वाभिमान्युत्पत्त्या चरितार्थत्वात् । " अभिमानिनःशब्दतश्च ब्रह्मावेदान्ससर्जहे " त्यादेः सर्वदर्शनः सर्वज्ञः अनेन ब्रह्मोक्तस्याप्रिमूलत्वं दर्शितं सर्वाणि दर्शनानि यस्मादुत्पन्नानि स तथोक्त इति वा ॥ ३९ ॥

मैत्रेयऋषिगळादरू लोकहितार्थवागिये विदुरन प्रश्नेयन्नु परिहरिसुवरु— आ ब्रह्मदेवन पूर्वमुखदिंद ऋग्वेदवु होरटितु. दक्षिणमुखदिंद यजुर्वेदवु होरटितु. पश्चिममुखदिंद सामवेदवु होरटितु. उत्तरमुखदिंद अथर्वणवेदवु होरटितु. मत्तू अवे नाल्कुमुग्वगळिंद क्रमानुसारवागि 'शस्त्रं' ऋग्वेदमंत्रगळन्नु शंसन माडतक्क भागवु होतुविन कर्मवु 'इज्यां' यजुर्वेदगतवाद अध्वर्यनु होममाडतक्क कर्मवु 'स्तुतिस्तोमं' सामवेददल्लिद्द स्तोत्रभागद मंत्रगळन्नु गानमाडतक्क उद्गातृ एंबवन कर्मवु. 'प्रायश्चितं' अथर्वणवेदल्लि हेळिद मंत्रगळिंद यज्ञकर्मदल्लि न्यूनातिरिक्तपरिहारक कर्मवु; ब्रह्मन कर्मवु ईप्रकार ई नाल्कुकर्मवन्नु पूर्वादिमुखगळिंद सृष्टिमाडिदनु. वेदगळु नित्यवादकारण ब्रह्मदेवनमुग्वदिंद वेदगळु मोदले होरटिद्दवु. ॥ ३७ ॥ मत्तू वैद्यशास्त्रवन्नू, आयुधगळविद्येयन्नु, भरतशास्त्र— अभिनयपूर्क नटनगानमोदलाद शास्त्रवन्नू तक्षशास्त्र= बडिगरू, मोनगाररू, कंचगाररू, कम्माररू, उप्पाररू, ई पंचाल्गर कृतिविषयवाद शास्त्रवन्नू क्रमानुसारवागि तन्न नाल्कुमुखदिंद ब्रह्मदेवनु सृष्टिमाडिदनु ॥ ३८ ॥ श्रेष्ठनाद ब्रह्मदेवनु इतिहासमहितवाद पुराणवेंब, एंदने वेदवन्नु सकलज्ञानवुळ्ळवनादकारण तन्न एल्लमुखगळिंदलू सृष्टिमाडिदनु. ब्रह्मदेवनु इतिहासपुराणगळन्नु शब्दिंदमात्र रचने माडिदने होर्तु अवुगळल्लि हेळतक्क अर्थवन्नेनु रचिसिल्लवु. आ इतिहासपुराणगळल्लिरतक्क अर्थवु वेदगळल्लिद्दद्दे बेरे अल्लवु. आ वेदगळु ब्रह्मदेवन मुखदिंद होरगे होरटवष्टे होर्तु ब्रह्मदेवनु अवुगळन्नु ई इतिहासपुराणगळंतमह रचने माडिल्लवु. आ वेदगळु अपौरुषेयवागि अनादिकालदिंद एकप्रकारवागिरुववु. वेदगळु द्रुष्टिरुवंतु हेळतक्क वादिगे आ वेदवाक्यगळिगे विषयवु दोरेयदे इद्दरिंद वेदगळिगे अप्रामाण्य हेळुव प्रसंगवु बरुवदु (ई विषयवन्नु तत्वनिर्णयग्रंथदल्लि आचार्यरु विस्तरिसिद्दारे इल्लि आ परवादिय अभिप्रायवन्नु तिळिसुवंकादरे ग्रंथवु बहळागुवदु.) हागादरे वेदगळु उत्पन्नवादवेंदु इदे मूलग्रंथदल्लि हेळल्पट्टित्तल्लवेंदरे— हागे हेळिद मूलग्रंथद अभिप्रायवेनेंदरे आ वेदाभिमानि (सरस्वती भारतीमोदलाद) देवतेगळु उत्पन्नरादरेंदु हेळुवदरिंद

१. शस्त्रं ऋग्वेदमंत्रशंसनं होतुः कर्म । इज्यां यागं अध्वर्योः कर्म । स्तुतिस्तोमशब्दौ सामवेदगस्तोत्रविशेषपरौ तच्छंसनं औद्गात्रं कर्म प्रायश्चितं ब्राह्मं ॥— (या.)

वेदगळ उत्पत्तियु हेळिद्दंतायितु- ' वेदाभिमानि देवतेगळ उत्पत्तिथिदलू इतिहासपुराणगळ शब्दरचनेयिंदलू ब्रह्मदेवनु वेद, पुराणगळन्नु सृष्टिमाडिदनु ' एंदु प्रमाणविरुवदु. हींगे हेळुवदरिंद ब्रह्मदेवनु रचनेमाडिदग्रंथगळिगेल्ल प्रामाण्यउंटेदु तोरिसल्पट्टितु. (वक्तृश्रोतृप्रमर्क्कानां यदाप्तिरनुकूलता ॥ आप्तवाक्यतया तेन श्रुतिमूलतया तथा । युक्तिमूलतयाचैव प्रामाण्यंत्रिविधं महत् ॥ एंब अनुव्याख्यानद व्याख्याकालक्के सुधाचार्यरिंद ' आप्तिमूलत्वं ' एंब शब्दार्थवु हेळल्पट्टिरुवदु.) ' सर्वदर्शनः ' यावत्तू ज्ञानदायकवाद ग्रंथगळु ब्रह्मदेवनिंदले उत्पन्नवादवेंदर्थवु ॥ ३९ ॥

षोडश्युक्थ्यौ पूर्ववक्त्रात्पुरीष्याग्निष्टुतावथ ॥ आप्तोर्यामातिरात्रौ च वाजपेयं सगोसवं ॥ ४० ॥ तपः शौचं दया सत्यं धर्मस्येति पदानि च ॥ आश्रमांश्च यथासंख्यमसृजत्सह वृत्तिभिः ॥ ४१ ॥ ॥ ॥

षोडश्यादयो यज्ञविशेषाः तद्भेदः कल्पतो बोद्धव्यः अथ पुरीष्याग्निष्टुतादिकं द्वयं द्वयंच दक्षिणादिवक्त्रेभ्य उत्पन्नं ॥ ४० ॥ तपआदिधर्मपादानामपि वक्त्रचतुष्टयाज्जन्मेति ज्ञातव्यं यथासंख्यं ब्रह्मचर्याद्याश्रमांश्च पूर्वादिवक्त्रेभ्यः ससर्ज भैक्ष्यचर्यादिवृत्तिभिः सह ॥ ४१ ॥

षोडशी एंब यज्ञवू उक्थ एंबयज्ञवू ई एरडू ब्रह्मदेवन पूर्वद मुग्वदिंद उत्पन्नवादवु. पुरीष्य- अग्निष्टुत एंब ईएरडू यज्ञगळू दक्षिणमुग्वदिंद उत्पन्नवादवु. आप्तोर्याम— अतिरात्र एंब ई एरडु यज्ञगळु पश्चिममुग्वदिंद उत्पन्नवादवु. वाजिपेय— गोसव एंब ई एरडु यज्ञगळु उत्तरमुग्वदिंद उत्पन्नवादवु. ई यज्ञगळ उत्पत्तिएंदरे आया यज्ञाभिमानिदेवतिगळ उत्पत्तियू यज्ञगळन्नु माडतक्क नियमगळ रचनेयू ब्रह्मदेवनिंदायितेंदु तिळियतक्कदु. ॥ ४० ॥ सपस्समोदलाद धर्मद पादगळिगू मुखचतुष्टयदिंद उत्पत्तिएंदु तिळुकोळ्ळतक्कदु— ब्रह्मदेवनु यथासंख्यवागि (गणने माडुवदक्के बरुवहागे) तन्न नाल्कु मुग्वगळिंद धर्मद तपः— शौचं— दया-सत्यं एंब ई नाल्कुपादगळन्नू ब्रह्मचर्य, गार्हस्त्य, वानप्रस्थ, सन्यासगळेंब आश्रमगळन्नू आ आ आश्रमगळल्लिद्द जनरिगे, जविनोपायक्के सहायवाद भैक्ष्यचर्य मोदलाद वृत्तिगळिंद सहितवागिये सृष्टिमाडिदनु. ॥ ४१ ॥

सावित्रं प्राजापत्यं च ब्राह्मं चाथ बृहत्तथा ॥ वार्तासंचय शालीनं शिलोंञ्छ इति वै गृहे ॥ ४२ ॥

यथासंख्यमित्यनेनाश्रमचतुष्टयावांतरभेदोपि विवक्षितस्तत्र ब्रह्मचर्याश्रमावांतरभेदमाह सावित्रमिति । गुरुकुले ब्रह्मचारिणो द्वादशवर्षपर्यंतमध्ययनकर्म सावित्रं प्राजापत्यं ब्रम्हचर्यं एकभार्यर्तुगमनं । " प्राजापत्यंब्रम्हचर्यमेकभार्यर्तुगामिते - " तिवचनात् । ब्राम्हं ब्रम्हचर्यं यावद्विवाहमध्ययनं बृहन्नामब्रह्मचर्यं यावज्जीवं नैष्ठिकं गृहे गृहस्थाश्रमेपीत्येवं चातुर्विध्यं वार्ता यायावरं भैक्ष्यचर्यविशेषः असंचय एकाहित्वं तत्तद्दिनार्जितव्रीह्यादेस्तद्दिनएव व्ययः । शालीनंतु वत्सरपर्यंतं स्ववृत्तिहेतोः कुसूलमंजूषादिषु व्रीहिधान्यादिग्रहणं । शिलोंञ्छस्तु व्रीहिसस्यक्षेत्रेषु गलितव्रीह्यादिना देहयात्रावर्तनं । "वार्तायायावरंज्ञेयमेकाहित्वमसंचय" इति ४२

हिंदिन श्लोकदल्लि ' यथासंख्यं ' एंदेन्नुवदरिंद नाल्कू आश्रमगळल्लियु अवांतरभेदवू उंटेंदु तोरुवदु आद्दरिंद आ अवांतर भेदगळन्नु हेळुवरु— ब्रह्मचर्याश्रमदल्लि नाल्कु भेदगळुंटु. सावित्र,

प्रजापत्य, ब्राह्म, बृहत् एंब ईप्रकारवागि; अदरल्लि सावित्रवेंदरे उपनयनवादकूडले ब्राह्मणरु योग्यगुरुगळल्लि होगि १२ वरुषगळवरेगे वेदाध्ययन माडतक्कदु. प्राजापत्यवेंदरे गृहस्थाश्रमियु एकपत्नी-व्रतदिंदिद्दु आ भार्यळु ऋतुस्नातळादाग्ये मात्र ओम्मेगमनमाडुवदु. इदरंते प्रमाणविरुवदु. ब्राह्मवेंदरे --विवाहआगुववरेगे अध्ययनमाडुवदु. बृहत् एंब ब्रह्मचर्यवु तानु बदिकिरुववरेगू नैष्ठिक व्रतदिंद इरोणवु. नैष्ठिकवेंदरे भगवन्निष्ठाबुद्धियुळ्ळवनागि विषयसेवने माडदे इरुवंदन्न भाववु गृहस्थाश्रमदल्लियादरू ईप्रकारवे नाल्कुभेदगळन्नु हळुवरु— 'वार्ता' योग्यजनरल्लि मात्र भिक्षे तेगेदुकोळ्ळोणवु. 'असंचय' यावदिवम भिक्षेयिंद भत्त (नेल्लु) अक्कि-- मोदलाद धान्यगळन्नु संपादिसुवनो अवुगळन्नेल्ल एनू उळिमिदंते आदिवसवे वेच्चमाडोणवु. 'शालीनं' ओंदु वरुषदवरेगे तन्न कुटुंबनिर्वाहक्के सालुवष्टु खणज (बोरे-पणत) कट्टिगेय दोड्डमंदुक मोदलादुवुगळल्लि भत्त (नेल्लु) अक्के व्याळिमोदलाद धान्यसंग्रहदिंद उपजीविसुवदु 'शिलोञ्छ' भत्त, जोळ, गोधिमोदलाद बीजगळन्नु बित्ति बेळद होल्गळल्लि धान्यदराशियन्नु माडि रैतरु आ राशियन्नु वैयिदमेले खणदल्लि बिद्द काळु आरिमिगोंडु बंदु अवुगळिंद उपजीवनमाडोणवु. ई नाल्कुप्रकारगृहस्थाश्रमद भेदवु इदक्के प्रमाणवू हेळल्पट्टदे. ॥ ४२ ॥

वैखानसा वालखिल्योदुंबराः फेनपा वने ॥ न्यासे कुटीचकः पूर्वं बहूदो हंसनिष्क्रियौ ॥४३॥ ॥

वने वानप्रस्थाश्रमे । " वैखानसामूलभक्षाः फलभक्षाउदुंबराः। वालखिल्याः सर्वभक्षाः फेनपावत्सफेनपा "इत्यनेन व्याख्यातोयं श्लोकः वत्समुखगलितपयः-फेनपानेन जीवंतः । न्यासे यत्याश्रमे पूर्वं कुटीचकः कुटयां स्वगृहएव पुत्रादिदत्तान्नादिना चकते तृप्यति अलंबुद्धिमाप्नोतीति चकतृप्राविितिधातुः । द्वितीयो बहूदः सवनत्रयस्नानंविना त्वकाले तीर्थजलदर्शने तत्र स्नानं कुर्वन्त्रिदंडी तृतीयचतुर्थौ हंस एकदंडी यज्ञोपवीतीच । निष्क्रिय एकदंडीहिंसादिक्रियारहितः परमहंसः ॥ ४३ ॥

वानप्रस्थाश्रमदल्लियू नाल्कुप्रकारवु 'वैखानमाः' नेलदोळगिन गड्डेगळन्नु तिंदु इरुवरु– वैखानमरु फलगळन्नु भक्षणमाडुववरु—उदुंबररु गड्डेगळन्नू फलगळन्नू वनदल्लिय यावत्तू पदार्थगळन्नू भक्षणमाडुववरु--वालखिल्यरु आकळ करुवु तायिय मोले तिन्नुवकालक्के अदर बायोळगिंद मोले हालिन बुरुगु केळगे बीळुवदन्नु प्राशनमाडि बदकुववरु--फेनपरेनिसुवरु--इदरंते यत्याश्रम-दल्लियू नाल्कुप्रकारवु--मोदलनेदु--कुटीचकरेंबदु तन्न मनेयल्लिये मुप्पिनकालक्के तन्न मक्कळेमोदलादवरु हाकिदिष्टु अन्न वुंडु तृप्तनागि निर्लिप्तनागि भगवध्यानपरनादवनु -कुटीचकनु यरडनेयवनु 'बहूदः' प्रातः माध्यान्ह सायान्ह एंब मूरुकाल्गाळल्लियू स्नानमाडुवदु अल्लदले 'अकाले' मूरुत्येळ्ये स्नानदहोर्तु एरडने त्येळ्यदल्लि (तीर्थयात्रेगळन्नु संचरिसुत्त मध्यमार्गदल्लि) तीर्थजलगाळन्नु कंड-कूडले आ तीर्थजलस्नानमाडुववनु– त्रिदंडिसंन्यासियु मूरनेयवनु, हंसनेंबवनु ओंदे दंडवुळ्ळवनु मत्तू यज्ञोपवीतियागिरुवनु, नाल्कनेयवनु-- 'निष्क्रियः' एकदंडवुळ्ळवनु मत्तू हिंसेमोदलाद कर्मगळन्नु माडदे इद्दु परमहंसनेनिसुवनु. ॥ ४३ ॥

आन्वीक्षिकी त्रयी वार्ता दंडनीतिस्तथैव च ॥ एवं व्याहृतयश्चासन् प्रणवेनास्पदं गताः ॥ ४४ ॥

आन्वीक्षिकी वेदानुसारिणी तंत्रविद्या त्रयी त्रयो वेदाः वार्ता वाणिज्यादि दंडनीतिः राजधर्मः एते यथा ब्रह्मणो वक्त्रचतुष्टयादासन् एवं भूरादि-व्याहृतयश्च अजस्य मुखचतुष्टयादपि व्यक्ताः प्रणवेनसह तद्वक्त्रस्यास्पदं गताश्चेत्यन्वयः त्रय्या सहपाठान्न शिवप्रोक्तान्वीक्षिकी तस्या वेदबहिष्कारादिष्णुप्रोक्तेयं । तदुक्तं " आन्वीक्षिकीतंत्रविद्या साचवेदानुसारिणी । विष्णुप्रोक्ता शिवाद्युक्ताज्ञेयावेदबहिष्कृता । दंडनीतीराजधर्मस्त्रयीवेदाः प्रकीर्तिता " इति आन्वीक्षिक्या त्रय्याच ब्राह्मणानां जीवनं दंडनीत्या राज्ञां वार्तया वैश्यादीनामित्येतत् द्योतयितुं च पुनस्त्रयीग्रहणं । " वार्तावाणिज्यकादिस्यादेताभिर्यत्तुजीवनं । तदान्वीक्षि-क्यादिनाम ब्रह्मणा निर्मितं पुरे- " तिच । यद्वा प्रणवेन सहास्पदं ब्रह्म गतास्तत्प्रतिपादकत्वेन तदेकविषयत्वं प्राप्ता इत्यर्थः । प्रणवेनेति तृतीयया प्रणवस्या-प्राधान्यं न श्रद्धेयं तस्य पूर्ववक्त्रजत्वात्तदुक्तं । " प्रणवः पूर्ववक्त्रेण भूराद्याश्चमुखत्रयात् । प्रदक्षिणमवर्तत वेदाश्चैवाश्रमास्तये- " ति तस्मात् प्रणवं मुखीकृत्य ब्रह्म प्राप्ता इत्येवमर्थं तृतीयेति ॥ ४४ ॥

आन्वीक्षिकी= वेदक्के अनुसरिसिद तर्कगळिंद सिद्धवाद तंत्रविद्येयु 'त्रयी'– मूरुवेदगळु ई यरडरिंदले ब्राह्मणरु उपजीवनमाडबेकेंदु तिळिसुवदक्के वेदगळ उत्पत्तियु हिंदे हेळल्पट्टाग्यू पुनः हेळिदरु- दंडनीतिः– राजरु राज्यनडिसतक्क नियमबंधवु (कायिदे) (मत्तू युद्धमाडतक्क नियमवु शास्त्रविद्येयु) इदरिंद क्षत्रियरु इरतक्कदु. वार्ता व्यापारमोदलादद्दु वैश्यवृत्तियु. ई नाल्कू ब्रह्मदेवन नाल्कूमुखदिंद क्रमानुसारवागि उत्पन्नवादवु. इदरंते ॐकारसहितवाद भूः, भुवः, स्वः, महः, जनः, तपः, सत्यं एंब व्याहृतिगळू एरडेरडुकूडि ओंदोंदु मुखदिंद होरगे प्रकटवादवु. आ ब्रह्मदेवन मुखक्के बंदवु. इल्लि हेळिद आन्वीक्षिकीएंबदु वेदसंगडा पठितवादद्दरिंद इदु शिवनिंद हेळल्पट्टदल्लवु. शिवनु हेळिदु वेदविरुद्धवादद्दु. ई आन्वीक्षिकी एंबदु श्रीविष्णुविनिंद हेळल्पट्टदु ईविषयवागि श्रीमदाचार्यरु प्रमाणहेळिरुवरु आ प्रमाणद अर्थवु मेले बरेद अर्थक्के एनू हेच्चिल्लवादरिंद पुनः अवे मातुगळन्नु बरेयुवदु कारणविल्लवु. 'प्रणवेनास्पदंगताः' एंबदक्के एरडने अर्थवु. एळू व्याहृतिगळू प्रणवदिंद सहितवागि परब्रह्मनन्ने प्रतिपादन माडुत्त ओंदेविषयवन्नुळ्ळवादवु. मत्तू इल्लि व्याहृतिशब्दवु प्रथमांतवागियू प्रणवशब्दवु तृतीयांतवागियू इद्दरिंद प्रणवशब्दक्के अमुख्यत्ववेंदु तिळियतक्कद्दल्लवु यार्केंदरे आ प्रणववु ब्रह्मदेवन पूर्वद (मोदलने) मुखदिंद होरटिरुवदु. 'प्रणववु पूर्वमुखदिंद उत्पन्नवागिरुवदु भूः मोदलाद व्याहृतिगळु मिक्काद मूरुमुखदिंद प्रदक्षिणाकारवागि उत्पन्नवागिरुवनु. इदरंते वेदगळू आश्रमगळू उत्पन्नवादवु.' ई प्रमाणानुसारवागि व्याहृतिगळु प्रणववन्नु मुख्यमाडिकोंडु होरटकारण इल्लिय तृतीयाविभक्तियिंद प्रणवक्के अमुख्यार्थ हेळगूडदु ॥४४॥

तस्योष्णिगासील्लोमभ्यो गायत्री च त्वचो विभोः ॥ त्रिष्टुप्मांसास्नुतोऽनुष्टुब्जगत्यस्थ्नः प्रजापतेः ॥ मज्जायाःपंक्तिरुत्पन्ना बृहती प्राणतोभवत् ॥ ४५ ॥ ॥ ॥ ॥ ॥ ॥

यस्य ब्रह्मणो रोमादिभ्यः सप्तच्छंदसां सर्गप्रकारमाह तस्येति । अत्र " क्रमव्यत्ययस्तस्योष्णिग्लोमानी " त्यादिश्रुत्यनुसारात्कारणानुगुण्याच्च ॥४५॥

१. स्नायुतः ॥— (या.)

आ ब्रह्मदेवन रोममोदलादवुगळिंद एळुप्रकार छंदःसुगळ उत्पत्तिक्रमवन्नु हेळुवरु– आ ब्रह्मदेवन रोमगळिंद उष्णिक् एंब छंदःसु उत्पन्न (प्रकट) वायितु. त्वगिंद्रियदिंद गायत्री छंदःसु उत्पन्नवायितु. अवन देहगतवाद मांसदिंद त्रिष्टुप् एंब छंदःसु उत्पन्नवायितु. स्नायु (करळु) दिंद अनुष्टुप् एंब छंदःसु उत्पन्नवायितु अस्थिगळिंद जगतीछंदःसु उत्पन्नवायितु. मज्जा (अंदरे मांसदल्लिद्द तुप्प) दिंद पंक्ति एंब छंदःसु उत्पन्नवायितु. प्राणदिंद बृहती एंब छंदःसु उत्पन्नवायितु. इल्लि हेळिद छंदःसुगळ क्रमवु हिंदेमुंदे इद्दाग्ग ' तस्योष्णिग्लोमानि ' एंब इवे मोदलाद श्रुतिगळल्लि इद्द क्रमानुसारवागिरुवदरिंद बाधकवल्लवु ॥ ४५ ॥

स्पर्शास्तस्याभवन् जीवात्स्वरो देह उदाहृतः ॥ ऊष्माण इंद्रियाण्याहुरंतस्था बलमात्मनः ॥ ४६ ॥

पंचाशद्वर्णानामपि ब्रह्मणोभिव्यक्तिप्रकारमाह स्पर्शाइति । कादयोमावसानाःस्पर्शास्तस्य ब्रह्मणो जीवाच्चैतन्यादभवन्नभिव्यक्ता आसन्वर्णानां नित्यत्वाद-भिव्यक्तिरेव । स्वरोऽकारादिर्देहः देहादुदाहृत उद्धृतः शषसहा ऊष्माणः श्रोत्रादींद्रियाणि इंद्रियेभ्य उत्पन्ना इत्याहुः । यरलवा अंतस्था आत्मनो ब्रह्मणो बलं बलादभिव्यक्ताः । अत्र सामानाधिकरण्यवचनं " यस्माद्यज्यायतेचांगात्तत्तदंगाभिधंभवेदि- " तिवचनाद्युक्तं । प्रथमा पंचम्यर्थे अकुहविसर्जनीयानांकंठ इत्यादिस्थानभेदवत् ग्रंथांतरे स्थानभेदसंभवे कथमत्रोक्तं एवं स्थानमिति निर्णय इतीदं चोद्यं । " स्पर्शास्तस्याभवन्जीवात्स्वरादेहात्प्रजज्ञिरे । ऊष्माणइं, द्रियेभ्यश्च अंतस्थाबलतोविभोरि " त्यनेन परिहर्तव्यं ॥ ४६ ॥

ऐवत्तुवर्ण (अक्षर) गळादरू ब्रह्मदेवन देशेयिंदले अभिव्यक्तवादवु (होरगे होरटवु) एंबदन्नु हेळुवरु– आ अक्षरगळल्लि क– मोदलुमाडि म– पर्यंत स्पर्शगळेन्नुवरु. ई स्पर्शगळु ब्रह्मदेवन जीवचैतन्यदिंद उत्पन्नवादवु. अंदरे होरगे होसदागि प्रकटवादवेंदर्थवु; यावेंदरे ' वर्णगळु नित्यवादकारण अवुगळिगे उत्पत्ति इल्लवु. अकारमोदलाद स्वरगळु आ ब्रह्मन देहदिंद उत्पन्नवादवु. श, ष, स, ह इवुगळिंगे, ऊष्माण एन्नुवरु. अवु श्रोत्रमोदलाद इंद्रियगळिंद उत्पन्नवादवु. य, र, ल, व इवु अंतस्थवेनिसुववु. इवु आ ब्रह्मन देहगतवाद बलदिंद उत्पन्नवादवु अभिव्यक्तवादवु. ' सामानाधिकरण्यवचनं ' अंदरे– ई श्लोकदल्लि देहात्– स्वरः एंदु प्रयोग माडतक्कद्दिद्दु हागे प्रयोगिसद स्वरो देहः– एंदु एरडू पदगळन्नु समान (ओंदे) विभक्तियिंद प्रयोगमाडिद्दरिंद देहवे स्वरवु एंदर्थवागुवदे होर्तु देहदिंद स्वरवु एंदु ह्यागे अर्थवु एंदरे– ' याव अंगदिंद यावदु उत्पन्नवागुवदो अदु अदर अंगवेनिसुवदु ' एंब वचनदिंद पंचमीअर्थ हेळुवल्लि प्रथमाविभक्तिप्रयोगवु उचितवादद्दु. ओळ्ळेदु व्याकरणशास्त्रदल्लि ' अकुहविसर्जनीयानां कंठे ' अ अंदरे अकारवु कु अंदरे कवर्गवु ह हकारवु इवुगळु विसर्जनीय एंदरे अः मोदलाद विसर्गगळु इवुगळेल्ल कंठस्थान-दल्लि उत्पन्नवागिरुवंदु हेळिद्दरिंद इल्लि हेळिद वर्णोत्पत्तिगू ग्रंथांतरोक्त वर्णोत्पत्तिगू स्थानभेदवाद्दरिंद इल्लि हेळिद वर्णोत्पत्तिय स्थानवे उचितवेंदु ह्यागे निर्णयवु वेंदरे ' ककारदिंद मकारदवरेगे स्पर्शगळु आ ब्रह्मदेवन जीवदिंद उत्पन्नवादवु अकारमोदलाद स्वरगळु देहदिंद उत्पन्नवादवु. श, ष, स, ह एंब ऊष्मगळु इंद्रियगळिंद य, र, ल,व एंब अंतस्थगळु समर्थनाद ब्रह्मदेवन बलदिंद उत्पन्नवादवु एंब ब्रह्मपुराणवचनविद्दकारण इल्लि हेळिद्द मूल वर्णोत्पत्तियु इदे प्रमाणवु एंदु मेलिन संशयवु परिहार माडल्पट्टितु ॥ ४६ ॥

स्वराः सप्त विहारेण भवंति स्म प्रजापतेः ॥ शब्दब्रह्मात्मनस्तात व्यक्ताव्यक्तात्मनः प्रभोः ॥ ४७ ॥

" निषादर्षभगांधारषड्जमध्यमधैवताः । पंचमश्चेत्यमीसप्ततंत्रीकंठोत्थिताः स्वरा " इति सप्तस्वराः प्रजापतेर्विहारेण शरीरसंचरणविशेषेण भवंतिस्म अभवन्नित्यन्वयः । स्वराणां सप्तविशेषत्वात्तत्सामग्रीमतस्तदुत्पादनसामर्थ्यं स्यात्तदस्य कथमिति तत्राह शब्देति । " शब्दब्रह्मात्मकोब्रह्मा सर्वशब्दाभिधोयतः । ऋतेनारायणादीनिनाम्नांसविषयोयत " इति वचनान्नारायणादिनाम्नां व्यतिरेकेण सर्ववेदादिशब्दराशेर्विषयत्वात्तदुत्पादनसामर्थ्यमस्तीत्यर्थः । नित्यवर्णा-त्मकवेदानां नित्यत्वेन व्याप्तत्वापरिच्छिन्नस्यब्रह्मणस्तद्विषयत्वं कथमत्राह व्यक्तेति । " व्यक्तंब्रह्मांडमुद्दिष्टमव्यक्तंमहदादिच । तद्व्यापकत्वाद्ब्रह्मातु व्यक्ताव्यक्ता त्मकःस्मृत " इत्यतो व्याप्तिमत्त्वात्तद्विषयत्वं युक्तं । उक्तादन्यत्रापि व्याप्तिशक्तिमत्त्वात्प्रभोरित्युक्तं ॥ ४७ ॥

निषाद, ऋषभ, गांधार, षड्ज, मध्यम, धैवत, पंचम एंब इवु एळु तंतिगळिंदलू कंठदिंदलू उत्पन्नवागुव स्वरगळु, मोदल्लिगे चतुर्मुखब्रह्मन शरीरसंचारविशेषदिंद उत्पन्नवादवु. स्वरगळु एळुप्रकारवागि ओंदक्कोंदु हेच्चुकडिमेयागि विलक्षण इरुववु. आ स्वरगळु उत्पन्नवागुवदक्के कारणवाद सामग्रीविशेषवनिगे आ स्वरगळन्नु दृष्टिसुव (उपादान– शब्द) सामर्थ्यविद्दीतु अदु इवनिगे ह्यागेंदरे हेळुवरु– ' शब्द ' ब्रह्मवेंदरे वेदवु आ वेददिंद प्रतिपाद्यनादकारण चतुर्मुखनु, शब्दब्रह्मात्मकनेनिसुवनु वेदगळल्लिद्द एल्लशब्दगळिंद इवनु प्रतिपाद्य (होगळिसिगोळ्ळुव) नादकारण, अदरोळगू आ वेदगळल्लि लक्ष्मीनारायणरु मुख्यप्रतिपाद्यरु अवर अनंतर आ नारायणन संबंधवाद नामगळू लक्ष्मीसंबंधवाद नामगळू मत्तू अवर चिन्हगळन्नु हेळतक्क श्रुतिगळू इवुगळन्नु विट्टु मिक्काद यावत्तू वेदगतशब्दगळिंद ब्रह्मनु प्रतिपाद्यनु, आ वेदशब्दगळिंगे इवने विषयनु. आदकारण आ सप्तस्वरगळिंगे उपादान (कारणवाद शब्दगळिंगे इवनु मुख्यनाद्दरिंद) सामर्थ्यवु इवनल्लि उंटेंदु तिळियतक्कदु. नित्यवर्णगळ स्वरूपवाद वेदगळु नित्यवादकारण आ वेदगळु व्याप्तवागिरुववु. परिछिन्नपरिमिति (इंतिष्टु एंदु अळतेयुळ्ळ) ब्रह्मदेवनिगे सर्वत्र व्याप्तवाद वेदविषयत्ववु ह्यागे संभविसुवदु एंदरे– ' ब्रह्मांडवु व्यक्तवेनिसुवदु महदादितत्वगळु अव्यक्तवेनिसुववु. ई एरडरल्लियू ब्रह्मदेवनु व्याप्तनादकारण व्यक्ताव्यक्तात्मकनेनिसुवनु. ' एंदु ब्रह्मतर्कदल्लि हेळिद्दरिंद चतुर्मुखब्रह्मदेवनु सर्वत्र व्याप्तनादकारण व्याप्तवाद वेदगळिंद प्रतिपाद्य (विषय) नेंबदु संभविसुवदु. मेले हेळिद्दक्किंत हेच्चागियू अवनु व्याप्तनादकारण ' प्रभोः ' एंब विशेषण कोट्टिरुवरु ॥ ४७ ॥

ब्रह्मानुभाववितते नानाशक्त्युपबृंहितः ॥ ततोपरामुपादाय स सर्गाय मनो दधे ॥ ४८ ॥

देहात्तदवयवेभ्यो ब्रह्मणः सृष्टिमुक्त्वाऽधुना प्रकारांतरेण तस्मात्सृष्टिं वक्ति ब्रह्मेति । ब्रह्मा ततः पूर्वस्मादपरां स्त्रीपुरुषीकरणशक्तिमुपादाय सर्गाय मनोदध

---

१. ब्रह्मणः परब्रह्मणोनुभावः आनुकूल्येन चितनं अनुग्रहोवा तेनविततः पूर्णः ॥— (**या.**)

इत्यन्वयः परतंत्रस्य ब्रह्मणः स्वाधीनसृष्टिः कथमत उक्तं अनुभावेति अनुभावेन परब्रह्मणा विततः तस्यानुग्रहामृतेन पूर्ण इत्यर्थः ब्रह्मानुभावविततः इत्येकं वा पदं परब्रह्मणः प्रभावेण विततः हरेरनुकूलेन भावेन सत्तया विततोऽधिकृतो विशेषसन्निधानवानितिवा अतएवनानाशक्त्युपबृंहितः नानाविधसृष्टिसामर्थ्यपूर्णः ॥ ४८॥

ब्रह्मदेवन देहदिंदलू, अवयवगळिंदलू आदमृष्टियन्नु हेळि; इन्नु मत्तोंदु तरद सृष्टियन्नु हेळुवरु - ब्रह्मदेवनु मोदलु सृष्टिमाडिद नारदनेमोदलाद केवल पुरुषरन्ने सृष्टि माडिदनंतर अवरहोर्तु इन्नु मुंदिनवरन्नु स्त्रीयरन्नू, पुरुषरन्नू प्रत्येकवागि सृष्टिमाडि अवरवर संयोगदिंद मुंदे परंपरा सृष्टियागबेकेंब इच्छेयिंद स्त्रीपुरुषरन्नु उत्पत्तिमाडततक्क शक्तियन्नु तंगेदुकोंडु सृष्टिमाडुवदक्के मनस्सुधरिसिदनु. पराधीननाद ब्रह्मनिंगे स्वाधीनवागि सृष्टियु ह्यागे संभविसुवदेंदरे—' अनुभावविततः ' युगं अनु प्रतियुगं आत्मानं भावयति स्वात्मना अवतरति इति अनुभावः श्रीहरिः श्रीहरिय अनुग्रहामृतदिंद पूर्णनागिरुवनु. अथवा ' ब्रह्मानुभावविततः एंदु ओंदे पदवन्नु माडि परब्रह्मनेनिसिद श्रीहरिय तेजःसिनिंद पूर्णनादवनु अथवा सृष्टिगे अनुकूलवागतक्क मत्तादिंद (सामर्थ्यदिंद) श्रीहरिय विशेषसान्निध्यउळ्ळवनु. आद्दरिंदले आ चतुर्मुखब्रह्मनु सृष्टिमाडुवदक्के तक्कवाद अनेकप्रकार शक्तियिंद पूर्णनागिरुवनु. ॥ ४८ ॥

ऋषीणां भूरिवीर्याणामपि सर्गमविस्तृतं ॥ ज्ञात्वा तद्बृध्ये भूयश्चिंतयामास कौरव ॥ ४९ ॥

तत्र सिंहावलोकनप्रकारेणापरां सृष्टिं चिंतयतीत्याह ऋषीणामिति । यत्रंषश्चात्तनःश्रेष्ठस्तत्र सिंहावलोकनमि " तिवचनात् पश्चादुत्पत्स्यमानस्य मनोः श्रैष्ठ्यादत्र सिंहावलोकनं कृतमित्यर्थः । मरीच्यादिऋषीणां सकाशादपि तत्तस्मादविस्तृतत्वादेव अनेनमहतापि पुरुषेण करिष्यमाणं कार्यमालोच्य कर्तव्यं न सहसेति निदर्शितं ॥ ४९ ॥

आ समयल्लि ब्रह्मदेवनु सिंहावलोकनन्यायदिंद आ मत्तोंदु प्रकारद सृष्टियन्नु योचिसुवनेंदु हेळुवरु--- ' हे कौरव ' एलै विदुरने— याव स्थळदल्लि हिंदे हेळिदक्किंत श्रेष्ठवाद मुंदिन विषयदल्लि दृष्टियु इरुवदो; अदु-सिंहावलोकनवेनिसुवदु ई प्रकृतक्के हिंदे उत्पन्नराद मुनिगळक्किंत मुंदे हुट्टतक्क मनुवु, श्रेष्ठनादकारण सिंहावलोकनवु माडल्पट्टितु. महासमर्थराद मरीचिऋषिगळे मोदलादवरु उत्पन्नरादाग्यू अवरिंद सृष्टियु अभिवृद्धियागल्लिवु; एंदु तिळिदु, चतुर्मुखनु मुंदे ह्यागादरे ई सृष्टियु अभिवृद्धियादीतेंदु योचनेमाडिदनु. हीगे हेळुवदरिंद केवल श्रेष्ठपुरुषनादारू तानु मुंदे माडतक्क केल्सवन्नु आलोचनेमाडि प्रारंभिसतक्कदे, होर्तु ओम्मेले प्रारंभिसबारदु एंदु तोरिसिदंतायितु. ॥ ४९ ॥

अहो अद्भुतमेतन्मे व्यापृतस्यापि नित्यदा ॥ न ह्येधंते प्रजा नूनं दैवमत्रविघातकं ॥ ५० ॥ एवं युक्तिमतस्तस्य दैवंचावेक्षतस्तदा ॥ कस्य रूपमभूद्द्वेधा[२] यत्कायमभिचक्षते ॥ ५१ ॥ ॥ ॥ ॥

१. यत्रयस्मिन् प्रकृतेऽर्थे निरूपणीये तदपेक्षया पश्चात्तनः पश्चान्निरूप्यमाणोर्थः श्रेष्ठः श्रोतृबुभुत्सयानुसरणादिना मध्ये निरूपणीयतां प्राप्तः तत्र तस्मिन् प्रकृतेर्थे पुनर्विस्तरतो निरूप्यमाणे सिंहावलोकनं सिंहावलोकनन्यायानुसरणमावश्यकं अन्यथाऽप्रस्तुतोक्तित्वप्रसंगादित्यर्थः ॥— (**या.**) २. स्त्रीपुरुषरूपेण द्वेधाभूत् । ब्रह्मदेहः सरस्वतीब्रह्मदेहद्वयात्मना परिणत इत्यर्थः ॥ — (**या.**)

चिंतनविधां दर्शयति अहोइति । सृष्टौ व्यापृतस्य कुतस्तत्राह नहीति । चिंतया निश्चितमाह दैवमिति । दैवानुग्रहोस्तिचेत् सृष्टिः पूर्यतइति निरचिनोदित्यर्थः ॥ ५० ॥ फलितमाह एवमिति युक्तिमतः ध्यानवतः दैवानुग्रहमप्यपेक्षमाणस्य कस्य ब्रह्मणो रूपं द्विधाभूत् यद्रूपं केन ब्रह्मणा प्राप्तत्वात्कायंनामाभिचक्षते निरुक्तज्ञा इतिशेषः ॥ ५१ ॥

ब्रह्मदेवनु आलोचनेमाडिद संगतियन्नु हेळुवरु— अहा! इदु एनु अद्भुतवागि ननगे तोरुवदु? नानु दिनालू सृष्टियु अभिवृद्धियागुवदक्के प्रयत्नमाडुत्तालिद्दाग्यू, प्रजरु हेचिसलोल्लरु इदु अदृष्टनियामकनाद श्रीहरिय चित्तक्के बंदिल्ल, निश्चयवु. आ परदैवन अनुग्रहवु इद्दरे ई सृष्टियु पूर्णवादीतु. एंदु चिंतिसिदनु ॥ ५० ॥ आ योचनेय फलवन्नु हेळुवरु— ई प्रकार ब्रह्मदेवनु योचनाक्रांतनागि श्रीहरिय अनुग्रहवन्नु अपेक्षिसुत्तिरलु, ' क ' एंदु करिसिगोळ्ळुव, ब्रह्मदेवन रूपवु एरडुप्रकारवायितु. ओंदु स्त्रीरूपवु ओंदु पुरुषरूपवु. अदरल्लि स्त्रीरूपवे सरस्वतियु पुरुषरूपवे ब्रह्मदेवन स्वरूपवु. ' क ' शब्दवाच्यनाद ब्रह्मदेवन शरीरदल्लिये आ सरस्वतीशरीरवु ब्रह्मशरीरवू प्रकटवागि ब्रह्मनिंद व्याप्तवाद कारण आ एरडू शरीरगळिगू कायवेंदु शब्दार्थबल्लवरु हेळुवरु. ॥ ५१ ॥

ताभ्यां रूपविभागाभ्यां मिथुनं समपद्यत ॥ यस्तु तत्र पुमान्सोभून्मनुः स्वायंभुवः स्वराट् ॥५२॥ स्त्रीयासीच्छतरूपाख्या महिष्यस्य महात्मनः ॥ तदा मैथुनधर्मेण प्रजा एधां बभूविरे ॥ ५३ ॥ ॥ ॥

तद्रूपद्वयं किमभूदिति तत्राह ताभ्यामिति । तयोर्नामविशेषमाह यस्त्विति । स्वराट् चक्रवर्ती ॥ ५२ ॥ अस्य मनोः अयं योगो विभूतिकर इत्याह तदेति । तदा तन्मिथुनसृष्टिकालमारभ्य ॥ ५३ ॥

आ एरडू रूपगळिंदेनायितेंदरे हेळुवरु— आ सरस्वती ब्रह्मरूपगळिंद ओंदु हेण्णु ओंदु गंडु उत्पन्नवादवु. अवुगळल्लि याव गंडु कूसुहुत्तो अवने चक्रवर्तियाद स्वायंभुवमनुवेनिसुवनु हेण्णुकूसे—शतरूपा. एंबवळु आ श्रेष्ठपुरुषनाद स्वायंभुवन हेंडतियु. (आ इब्बरिगू ब्रह्मदेवनु विवाहमाडिदनु.) ॥ ५२ ॥ ई स्वायंभुवन उत्पत्तियु ब्रह्मदेवन मनोरथवन्नु पूर्णमाडुवदेंदु हेळुवरु— अंदिनिंद (अंदरे आ शतरूपा स्वायंभुवमनुन मिथुन सृष्टिकालवन्नारंभिसि) स्त्रीपुरुष संयोगधर्मदिंद प्रजेयु अभिवृद्धियागलारंभिसितु. ॥ ५३ ॥

स चापि शतरूपायां पंचापत्यान्यजीजनत् ॥ प्रियव्रतोत्तानपादौ तिस्रः कन्याश्च भारत ॥ ५४ ॥ आकूतिर्देवहूतिश्च प्रसूतिरितिसत्तम ॥ आकूतिं रुचये प्रादात्कर्दमाय तु मध्यमां ॥ दक्षायादात्प्रसूतिं च यैत आपूरितं जगत् ॥ ५५ ॥ इति श्रीमद्भागवते तृतीयस्कंधे त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ ॥ ॥

१. केन ब्रह्मणा प्राप्तत्वात् जातत्वात् कायइत्युच्यते देहसमुदाय इत्यर्थः ॥— (**या.**) २. कन्यात्रयात् ॥— (**या.**)

अनेन मनुना कान्यपत्यान्युत्पादितानीति तत्राह सचेति । तन्नामान्याह । प्रियव्रतेत्यादिना यतः कन्यात्रयात् ॥५४॥५५॥ इतिश्रीमद्भागवते तृतीयस्कंधे विजयध्वजटीकायां त्रयोदशोऽध्यायः ॥ १३ ॥

ई मनुविनिंद याव मक्कळु सृष्टिमाडल्पट्टवेंदरे हेळुवरु — ब्रह्मपुत्रनाद आ स्वायंभुवमनुवादरू तंदेय अप्पणेप्रकार आ शतरूपा एंब हेंडतियल्लि ऐदु मंदि मक्कळन्नु सृष्टिमाडिदनु. हे विदुरने, अवरल्लि, प्रियव्रतराजनेंतलू, उत्तानपादराजनेंतलू इव्वरु गंडुमक्कळु. आकूति. देवहूति. प्रसूति. एंब मूवरु हेण्णुमक्कळु. मज्जनरल्लि श्रेष्ठनाद विदुरने' आकूतियंबमगळन्नु आ मनुवु रुचिनामक प्रजेश्वरनिगे कोट्टनु कर्दमऋषिय गोस्कर नडुविन मगळाद देवहूतियन्नु कोट्टनु प्रसूति एंबवळन्नादरू दक्षप्रजेश्वरनिगे विवाहमाडिकोट्टनु ई मूरुजन हेण्णुमक्कळिंदल्ले जगत्तिनल्लि प्रजेयु तुंबितु ॥ ९४ ॥ ९५ ॥ ईप्रकार प्राकृतटीका ' सुखार्थबोधिनी ' कू. श्री. र. तृतीयस्कंधद १३ ने अध्यायवु समाप्तवु ॥ श्रीकृष्णार्पणमस्तु ॥

॥ श्रीशुकउवाच ॥ निशम्य वाचं वदतो मुनेः पुण्यतमां नृप ॥ भूयः पप्रच्छ कौरव्यो वासुदेवकथादृतः ॥ १ ॥
विदुरउवाच ॥ स वै स्वायंभुवः सम्राट् प्रियः पुत्रः स्वयंभुवः ॥ प्रतिलभ्य प्रियां पत्नीं किं चकार ततो मुने ॥ २ ॥

अस्मिन्नध्याये हरेरवतारकथाश्रवणादिना साक्षात्पुरुषार्थः स्यादिति निरूप्यते श्रीशुक परीक्षिते पुनरपि विदुरप्रश्नप्रकारं वक्ति निशम्येति ॥१॥ स्वधर्माचारैः स्वपतिं स्वर्गं नयतीति पत्नी तां प्रतिलभ्य तत इत्यनेन व्यापारांतरं निषेधति ॥ २ ॥

ई अध्यायदल्लि श्रीहरिय अवतारमोदल्लाद कथाश्रवणमुंतादवुगळिंद मुख्यवाद मोक्षवु दोरेयुवदेंदु हेळल्पडुवदु. आ मोदलु श्रीशुकाचार्यरु परीक्षितराजनिगे विदुरन प्रश्नमाडिद संगतियन्नु हेळुवरु—' हे नृप मैत्रेयमुनिगळु हेळतक्क अतिपुण्यपवित्रकरवाद वाणियन्नु केळि, आ कुरुकुलोत्पन्ननाद विदुरनु, वासुदेवकथागळल्लि अत्यंत आदरउळ्ळवनागि मत्ते प्रश्नमाडिदनु. ॥ १ ॥ विदुरनु माताडुवनु—स्वामिन् महामुनिगळाद मैत्रेयर ब्रह्मदेवनिगे प्रीतियपुत्रनाद चक्रवर्तियाद स्वायंभुवनु, प्रीत्याम्पदळाद पत्नियन्नु होंदि मुंदे एतु माडिदनु एंदरे तन्न स्वधर्माचारगळिंद पतियन्नु स्वर्गक्के वैय्यतक्कवळु. स्वायंभुवन हेंडतियु इंथवळु ततः= आ हेंडतियन्नु होंदिदकूडले एरडने व्यापारगळिल्लदंते एंदर्थवु. ॥ २ ॥

चरितं तस्य राजर्षेरादिराजस्य सत्तम ॥ ब्रूहि मे श्रद्दधानाय विष्वक्सेनाश्रयोह्यसौ ॥ ३ ॥ श्रुतस्य पुंसां सुचिरश्रमस्य नन्वंजसा सूरिभिरीडितोर्थः ॥ यत्तद्गुणानुश्रवणं मुकुंदपादारविंदं हृदयेषु येषां ॥ ४ ॥ ॥ ॥

कोसौ वैदुरिकः प्रश्न इत्यत्राह चरितमिति । मे मह्यं वक्तव्यत्वे हेतुमाह विष्वक्सेनेति । विष्वक् सर्वत्र सेना ज्ञानलक्षणा यस्य स तथोक्तः ॥ ३ ॥विष्वक्सेनचरितं तद्भक्तचरितंचेति द्वयमेव पुरुषार्थांतरंगत्वेन मुमुक्षुणा श्रोतव्यं सूरिभिरीडितत्वादित्याह श्रुतस्येति । सुचिरं श्रम आयासो यस्य स तथा तस्य पुंसां श्रुतस्य वेदाद्यर्थश्रवणस्य अंजसा तत्त्वेन सूरिभिरीडितार्थोयं ननु इदं फलं हि यत्तस्य हरेर्गुणानुवादश्रवणं येषां हृदयेषु मुकुंदस्य पादारविंदं लसतीति शेषः तेषां पुंसां चरितश्रवणं च ज्ञानिभिरभिष्टुतोर्थः इति यस्मात्तस्मात् स्वायंभुवमनोर्विष्वक्सेनकथाविनाभूतत्वात्कथां ब्रूहीतिभावः ॥ ४ ॥

विदुरन प्रश्नेय मुख्यांशवु यावदु एंदरे हेळुवरु. आ आदिराजनाद, राजर्षियाद स्वायंमुवन चरित्रेयन्नु; हे श्रेष्ठरे ननगे हेळबेकु आ राजन चरित्रेयन्नु याके केळुवेनेंदरे अवनु 'विष्वक्सेनाश्रयः' सर्वत्रदल्लियू ज्ञानवेंब सैन्यवुळ्ळ श्रीहरिये आश्रयनागिउळ्ळवनु अथवा श्रीहरियन्नु निश्चयवागि आश्रयमाडिदवनु आदकारण केळुवेनु. ॥ ३ ॥ आ विष्वक्सेनन (श्रीहरिय) चरित्रेयन्नू अवन भक्तर चरित्रेयन्नू केळुवदे पुरुषार्थक्के अंतरंगसाधकवादद्देंदु सज्जनरिंद प्रार्थ्यवादकारण आ यरडरन्ने श्रवणमाडतक्कदेंदु हेळुवनु. मनुष्यनु बहुकालश्रमपट्टु वेदमोदलादवुगळ अर्थ श्रवणमाडिदक्के यथार्थवागि सज्जनरिंद प्रार्थ्यमानवाद प्रयोजनवु इदे अष्टे? (यावदेंदरे) सज्जनरमुखदिंद वर्णनमाडल्पडुव श्रीहरियगुणगळ श्रवणवु (केळोणवु) याव उत्तम जनर हृदयकमलदल्लि मोक्षदायकनाद श्रीहरिय पादकमलवन्नु प्रकाशमाडुवदो, आ सत्पुरुषर चरितश्रवणवादरू सज्जरिंद प्रार्थ्यमानवाद प्रयोजनवे; आदकारण स्वायंभुवमनुविन चरित्रेयु श्रीहरिकथेयन्नु बिट्टु बेरे इल्लवाद्दरिंद अवन कथेयन्नु हेळबेकु एंदु अभिप्रायवु. ॥ ४ ॥

श्रीशुक उवाच ॥ इति ब्रुवाणं विदुरं विनीतं सहस्रशीर्ष्णश्चरणोपधानं ॥ प्रहृष्टरोमा भगवत्कथायां प्रणीयमानो मुनिरभ्यचष्ट ॥ ५ ॥ मैत्रेयउवाच ॥ यदा स्वभार्यया साकं जातः स्वायंभुवो मनुः ॥ प्रांजलिः प्रणतश्चेदं वेदगर्भमभाषत ॥ ६ ॥

श्रीशुकः परीक्षिते विदुरप्रश्नप्रकारं वक्तीति वक्ति सूतः शौनकादिभ्य इत्याह इतिब्रुवाणमिति । सहस्रशीर्ष्णोहरेश्चरणोपधानं पादपीठायितं भगवत्कथायां प्रणीयमानः प्रेर्यमाणः अभ्यचष्टाहेत्यन्वयः । विदुरमितिशेषः ॥ ५ ॥ संभाषणानंतरमन्यकथाप्रसंगो नास्तीति भावेनाह यदेति । नायमंजलिर्दीभिक इतिभावेनोक्तं प्रणतइति ॥ ६ ॥

श्रीशुकाचार्यरु परीक्षितराजनिगे मैत्रेयरु विदुरन प्रश्नानुसार उत्तर हेळुवरेंदु हेळुवरु— सूतनु इदरंते शौनकादिगळिंगे हेळुवनु.— अनंतशिरस्सुगळुळ्ळ श्रीहरिय चरणारविंद गळन्निडुवदक्के पादपीठदंतिरुव, अतिविनीतनागि ई प्रकार माताडुव विदुरनन्नु कंडु; मैत्रेयमुनिगळु परमानंददिंद मैमेले रोमांचगळुब्बि भगत्वकथेयन्नु हेळुवदक्के प्रेरितरागि हेळलारंभिसिदरु ॥ ५ ॥

१. सहस्रशीर्ष्णः श्रीकृष्णस्य चरणावुपधीयते यस्मिन् श्रीकृष्णः प्रीत्या यस्योत्संगे चरणौ प्रसारयतीत्यर्थ इति वा ॥— (या.)

मैत्रेयरु हेळुवरु— विदुरनु संभाषणमाडिद अनंतर एरडने कथाप्रसंगवे मध्यदल्लि इल्लवु एंदु हेळुवरु— यावाग्ये तन्न हेंडतियिंद सहितनागि स्वायंभुवमनुवु उत्पन्ननादनो, आग्ये अवनु कैजोडिसिगोंड ब्रह्मदेवनन्नु नमस्कारिसि ईप्रकार माताडिदनु. ई मनुवु कैजोडिसिदु दांभिकवल्लवेंदु तिळिसुवदक्के प्रणत, एंदु उक्तवायितु ॥ ६ ॥—

त्वमेकः सर्वभूतानां जन्मकृद्वृत्तिदः पिता ॥ अथापि नः प्रजानां ते शुश्रूषा केन वा भवेत् ॥ ७ ॥ तद्विधेहि नमस्तुभ्यं कर्मस्विज्यात्मशक्तिषु ॥ यत्कृत्वेह यशो विष्वगमुत्र च भवेद्गतिः ॥ ८ ॥ ॥ ॥

ननु किमियं भाषा गुह्याद्यन्यतमा सांकेतिकी वा न द्वितीयः अप्रस्तुतत्वादसंभवाच्च प्रथमाच्च समाधिरेवेति भावेनाह त्वमेकइति अथ जन्मकृत्त्वाद्वृत्तिदत्वात्पितृत्वाच्च पोष्यैः शुश्रूषा कर्तव्या सा केन केन कर्मणास्यादित्यर्थः अपिशब्देन कार्याकरणे पातकं सूचयति ॥ ७ ॥ तदिति तत्कर्म इतोपि भगवच्छुश्रूषा कर्तव्येत्याह कर्मस्विति । आत्मशक्तिषु स्वकेषु नित्यनैमित्तिकेषु कर्मस्विज्या पूजा तत्कर्म विशिनष्टि यत्कृत्वेति इह लोके सर्वत्र यशोऽमुत्र परलोके गतिः-सुखप्राप्तिलक्षणा स्यात्तादृशमितिशेषः ॥ ८ ॥

ओळ्ळेदु, ई स्वायंभुवमनुवु ब्रह्मदेवनन्नु कुरितु भाषणमाडिद भाषेयु गुह्यभाषा, समाधिभाषा, अर्थभाषा एंब मूरुभाषेगळल्लि यावदादरोंदादद्दो अथवा सांकेतिकवो सांकेतिकवंतू अल्ल. अदु प्रकृतक्के अनुपयुक्तवादद्दु मोदल्लिंदरोळगे, समाधिभाषेये एंब अभिप्रायदिंद हेळुवरु— स्वायंभुवनु अंददु. हे तंदेय, नीनोब्बने सकलप्राणिगळन्नु हुट्टिसिदवनु मत्तू उदरपोषणक्के वृत्तियन्नु कोट्टवनु पोषणमाडतक्कवनु ई मूरुप्रकारदिंदलू पितृत्ववु निन्नल्लिरुवदु आदरू निन्निंद रक्षितरादं नावु निन्न सेवेयन्नु माडतक्कदु; आदकारण नम्मिंद आ सेवेयु यातरिंद घटनेयादीतु, इल्लिय 'अपि' शब्दवु; यारिंद रक्षितरागुवरो अवर सेवेयन्नु माडदिद्दरे पातकवु बरुवदेंदु सूचिसुवदु ॥ ७ ॥ निंम सेवेयादरू भगवत्सेवेये एंदु हेळुवनु— नम्म शक्त्यनुसारवागि माडतक्क नित्य-नैमित्तिक कर्मगळल्लि यावदु मुख्यवाद भगवत्पूजेयु आ कर्मविशेषवु यावदु? यावप्रकार भगवत्पूजेयन्नु माडुवदरिंद ई लोकदल्लि एल्लकडेयल्लियू यशःसू परलोकदल्लि सुखप्राप्तियागतक्क सद्गतियू दोरेयुवदो; अदन्नु नमगे अप्पणे माडु ॥ ८ ॥

ब्रह्मोवाच ॥ प्रीतस्तुभ्यमहं तातं स्वस्तिस्यादां क्षितीश्वर ॥ यन्निर्व्यलीकेन हृदा शाधि मेत्यात्मनार्पितं ॥ ९ ॥ एतावत्यात्मजैरेवं कार्या ह्यपचितिर्गुरौ ॥ शक्त्याऽप्रमत्तैर्गृह्येत शासनं गतमत्सरैः ॥ १० ॥ ॥ ॥

१. इज्यात्मशक्तिषु इज्यारूपेषु भगवत्पूजारूपेषु स्वशक्तिविषयेषु च कर्मसु मध्ये मे शुश्रूषा केन येन कर्मणा भवेत् तद्विधेहि ॥— (**या.**)

सच्छिष्ये सद्गुरुणा एवमनुग्रहः कर्तव्य इति भावं ध्वनयन् ब्रह्मा वक्ति प्रीतइति तद्यस्माच्छाधि शिक्षस्व आत्मना परप्रेरणामंतरेण ॥ ९ ॥ इयमेका गुरोः क्रियमाणा पूजेत्याह एतावतीति अपचितिः पूजा एतावतीति केयमित्यत्राह शक्त्येति अथ गुरुनियोगानंतरमेव शक्त्या शासनमाज्ञा गृह्येतेति यत्सेयमित्यर्थः ॥ १० ॥

योग्यशिष्यनल्लि सद्गुरुगळु इद्द प्रकार अनुग्रह माडतक्कद्दंब अभिप्रायवन्नु प्रकटमाडुत्त ब्रह्मदेवनु हेळुवनु— 'हेतात' एलो, अप्पा स्वायंभुवराजने, एरडनेदवर प्रेरणेइल्लद निन्निष्टके नीने निर्वचनेय मनस्सिनिंद, नन्नन्नु आज्ञामाडु एंदु बेडिकोंडियो; अदरिंद नानु निन्नमेले प्रीतनागिरुवेनु. निम्मिब्बरिगू (दंपतिगळिगे) क्षेमविरलि. ॥९॥ इदु ओंद, गुरुगळिगे माडतक्क पूजेयु एंदु हेळुवनु— मक्कळादवरु तंदेय पूजेयन्नु इष्टे इदे प्रकारवे माडतक्कदु, यावंदरे— तंदेय अप्पणेयादनंतरवे तम्म शक्तयनुसारवागि मदोन्मत्तगजद मात्सर्यवन्नुबिट्टु आ हिरियर शासनवन्नु शिरसावहिसि नडिस (जरिगिसु) बेकु ॥ १० ॥

सत्वमस्याम्मपत्यानि सद्दशान्यात्मनो गुणैः ॥ उत्पाद्य शाधि धर्मेण गां यज्ञैः पुरुषं यज ॥ ११ ॥ परं शुश्रूषणं मह्यं स्यात्प्रजारक्षया नृप ॥ भगवांस्ते प्रजाभर्तुर्हृषिकेशोऽनुतुष्यति ॥ १२ ॥ येषां न तुष्टो भगवान् यज्ञलिंगो जनार्दनः ॥ तेषां श्रमोप्यपार्थाय यदात्मा नादृतः स्वयं ॥ १३ ॥ ॥ ॥ ॥

आज्ञामाह सत्वमिति अस्यां शतरूपायां ॥ ११ ॥ केनवेत्यस्य प्रश्नं परिहरति परमिति । अनेनाज्ञाग्रहणमेकमितरत्प्रजापालनमितिद्वयं शुश्रूषणमुक्तं भवति पुरुषस्य पुरुषार्थाय श्रीनारायणप्रसाद एव ततः प्रजापालनेन किं तत्राह भगवानिति ॥ १२ ॥ बाधकमाह येषामिति यज्ञो लिंगं ज्ञापको यस्य स तथा श्रमः इदं न श्रेयःसाधनं इत्यनुष्ठानाद्यायासः आत्मा परमात्मा ॥ १३ ॥

प्रकृतक्के ब्रह्मदेवनु तन्न आज्ञेयन्नु हेळुवनु— आ नीनु (याव नीनु नन्नन्नु आज्ञामाडेंदु केळिदियो आ नीनु) ई शतरूपाएंब हेंडतियल्लि, निन्न गुणगळिंगे समानगुणगळुळ्ळ मक्कळन्नु, उत्पादनमाडि धर्मदिंद भूमियन्नु शासनमाडु; मत्तू अनेक अश्वमेधादियागगळिंद यज्ञपुरुषनन्नु पूजिसु. ॥ ११ ॥ भगवत्पूजेयन्नु यावप्रकार माडबेकेंदु मनुविन प्रश्नक्के उत्तरवन्नु हेळुवनु— ई नानु (ब्रह्मनु) हेळिद्दन्नु केळुवदरिंद नन्न आज्ञापालने माडिद्दोंदु, निन्न मक्कळ होर्तु इतर प्रजापालनेयोंदु, एरडू नन्न सेवेये— 'हे नृप' नीनु प्रजापालने माडुवदरिंद एल्ल प्रकारदिंदलू नन्न सेवेमाडिदंतायितु. पुरुषनिगे मोक्षक्के श्रीनारायणन प्रसादवे मुख्यवादद्दु अंदमेले ई प्रजापालनेयिंदेनु प्रयोजनवेंदरे मोक्षक्के याव श्रीहरिय प्रसादवे मुख्यवो प्रजापालने माडतक्क निन्न मेले अदे श्रीहरियु निन्न इंद्रियगळिगे नियामकनागि हृदयदल्लिद्दु परमतुष्टनागुवनु. ॥ १२ ॥ इल्लदिद्दरे (श्रीहरिय प्रीत्यर्थकर्ममाडिद्दरे) बाधकवन्नू हेळुवरु— यावन (श्रीहरिय)

१. यज्ञप्रवर्तकदेहः ॥— (**या.**)

लक्षणवन्तु यज्ञवु तोरिसुवदो, आ यज्ञलिंगनेनिसिगोंड जनार्दननु यारमेले तुष्टनागुवदिल्लवो आ जनरु तमगे श्रेयस्साधनवागलेंदु श्रमपट्टदु 'अपार्थाय' अपगतः अर्थः यस्मिन् सः । मोक्षके साधकवागुवदिल्लवु ओळ्ळिदु आ जनार्दननु एंथवरमेले तुष्टनागुवदिल्लवेंदरे— अंतर्नियामकनाद स्वतः श्रीहरियु यारिंद अनादर माडल्पट्टवनो अवरमेले ह्यागे तुष्टनादानु. ॥ १३ ॥

मनुरुवाच ॥ आदेशेहं भगवतो वर्तयाम्यरिसूदन ॥ स्थानं त्विहानुजानीहि प्रजानां मम च प्रभो ॥ १४ ॥ यदोकः सर्व सत्वानां मही मग्ना महांभसि ॥ अस्या उद्धरणे यत्नो देव देव्या विधीयतां ॥ १५ ॥ ॥ ॥

ब्रह्मणा प्रजापालनायोपदिष्टो मनुस्तदाज्ञामादाय ब्रह्माणं प्रार्थयते आदेशेहमिति कामाद्यरिसूदन अनुजानीहि अनुज्ञापयादिशेत्यर्थः ॥ १४ ॥ भूम्याख्ये स्थाने स्थितिं विधाय प्रजापालनं कर्तव्यमित्याज्ञा तदाशंक्य परिहरति यदोकइति । सर्वसत्वानां पिपीलिकादिसर्वप्राणिनां यदोक आवासस्थानं सा मही महांभसि प्रलयजले मग्नाभूत् हे देव अस्याः देव्याः भूमेरुद्धरणे यत्नः क्रियतामित्यन्वयः ॥ १५ ॥

ब्रह्मदेवनिंद प्रजापालनेगागि हेळिसिगोळ्लट्ट मनुवु, आ आज्ञेयन्नु शिरमावहिसि, ब्रह्मदेवनन्नु प्रार्थिसुवनु— मनुवु अंदद्दु— कामक्रोधमोदलाद शत्रुगळन्नु नाशमाडिद चतुर्मुखने पूज्यस्वरूपराद तम्म अप्पणेमेरेगे नानु नडेयुवेनु आदरे (तम्म अप्पणे पालिसुवदक्कागिये,) ननगू प्रजरगळिगू वासिसुवदक्के स्थळवन्नु अप्पणेमाडबेकु (तोरिसबेकु.) ॥ १४ ॥ भूमियंब स्थळद्दल्लि वासमाडिकोंडु प्रजापालने माडेंदु तम्म आज्ञेयादीतु एंदु ऊहमाडिकोंडु अदक्के मार्गविल्लेंदु हेळुवनु— इरिवेगळे मोदलाद सकलप्राणिगळिगे इरुवदक्के महास्थानवाद याव भूमियु अदेयो अदु प्रलयोदकदल्लि मुळुगिरुवदु आद कारण 'हे देव' आ भूमियन्नु मेलक्के यत्नव प्रयत्नमाडबेकु. ॥ १५ ॥

मैत्रेयउवाच ॥ परमेष्ठी त्वपांमध्ये तथा सन्नामवेक्ष्य गां ॥ कथमेनां समुन्नेष्य इति दध्यौ धिया चिरं ॥ १६ ॥ पीतं मया जलं पूर्वं पृथिवी च निवेशिता ॥ प्रजा देवासुरपितृमनुष्याः पशुपक्षिणः ॥ १७ ॥ सरीसृपा नगा नागा भूतान्युच्चावचानि च ॥ तथापि किमिदं साद्य प्लाव्यते पुनरंबुभिः ॥ १८ ॥ सृजतो मे क्षितिर्वार्भिः प्लाव्यमाना लयं गता ॥ अथात्र किमनुष्ठेयमस्माभिः सर्गयोजितैः ॥ १९ ॥ ॥ ॥ ॥

पूर्वमेव भूमेरभावं जानन्नपि ब्रह्मा प्रार्थनापूर्वकं कृतमेवोपकृतं स्यादिति मन्वानो भूमेरुद्धारमालोचयतीत्याह परमेष्ठीति यथोन्नेतुमशक्या तथा सन्नां मग्नां ॥ १६ ॥ मज्जने निमित्तमाह पीतामिति यावता पीतेन जलस्योद्रेकः शाम्यति तावत्सर्वमित्युच्यते नतु निःशेषत्वेन अन्यथा वार्भिः प्लाव्यमानेत्यसंगतं स्यात् निवेशिता निवेशनीकृता ॥ १७ ॥ १८ ॥ वार्भिर्जलैः प्लाव्यमाना चंचलीक्रियमाणा लयं गता मग्ना प्रजानां भारेणेति शेषः सृजतः सतः अत्रास्यामवस्थायां ॥ १९ ॥

मैत्रेयरु हेळुवरु— मोदल्गिो भूमियिल्लवेंबदन्नु तिळिदाग्यू ब्रह्मदेवनु प्रार्थनेमाडिसिगोंडु माडिद केलसवु उपकारवागुवदु, एंदु भूमियन्नु मेलक्के यत्नुवदक्के आलोचने माडुवनेंदु हेळुवरु— ईप्रकार स्वायंभुवन वाक्यगळन्नु केळि ब्रह्मदेवनु मेलक्के एत्तुवदक्के अशक्यवागुवंते नीरिनल्लि मग्नवाद भूमियन्नुनोडि; ई भूमियन्नु ह्यागे सरियागि मेलक्के एत्तेनु एंदु तन्न बुद्धियिंद बहळवेळे योचनेमाडिदनु. ॥ १६ ॥ नानु हिंदक्के प्रलयोदकद येरेगळ उक्केरुवदु शांतवागुवंते उदकवन्नु प्राशनमाडिद्देनु मत्तू पृथिवियन्नादरू नीरमेले निल्लिसि; देवतिगळन्नू दैत्यरन्नू पितृगळन्नू मनुष्य, पशु, पक्षिगळन्नू हरदाडतक्क हावू चेल्लुमोदलादवुगळन्नू गिडगळन्नू संणदोड्ड एल्लतरद प्राणिगळन्नू सृष्टिमाडिदेनु अष्टरल्लिये भूमियू होयिदाड हत्तितु आग्ये नानु एनिदु भूमियू मत्त नीरिनिंद होयिदाडुवदो एंदु योचिसुत्तिद्देनु. नानु इन्नू प्रजगळन्नु सृष्टिमाडुत्तिरलू आ प्रजाभारदिंद होयिदाडुत्त नीरिनल्लि मुळुगितु. आदरे सृष्टियन्नु माडुवदक्के उद्युक्तराद नावु इन्नुमुंदे ई विषयदल्लि एनु माडतक्कदु? ॥ १७ ॥ १८ ॥ १९ ॥

यस्याहं हृदयादासं स ईशो विदधातु मे ॥ इत्यभिध्यायतो नासाविवरात्सहसानघ ॥ २० ॥ वराहतोको निरगादंगुष्ठपरिमाणतः ॥ तस्याभिपश्यतः खस्थः क्षणेन किल भारत ॥ २१ ॥ गजमात्रः प्रववृधे तदद्भुतमभून्महत् ॥ मरीचिमुख्यैर्विप्रेभ्यकुमारैर्मनुना सह ॥ २२ ॥ दृष्ट्वा तत्सौकरं रूपं तर्कयामास चित्रधा ॥ किमेतत्सौकरव्याजं सत्वं दिव्यमवस्थितं ॥ अहो बताश्चर्यमिदं नासाया मे विनिःसृतं ॥ २३ ॥ दृष्टोंगुष्ठशिरोमात्रः क्षणाद्गंडशिलोपमः ॥ अपिस्विद्भगवानेष यज्ञो मे खेदयन्मनः ॥ २४ ॥ ॥ ॥ ॥ ॥

इदमेवानुष्ठेयमित्याह यस्येति । सत्यसंकल्पस्य हरेर्भक्तत्वात् ब्रह्मापि सत्यसंकल्प इतीममर्थं ध्वनयन् हरेः प्रादुर्भावप्रकारमाह इतीति । नासाविवरान्नासाबिलात्सहसा सद्यो निरूपितत्वेन वराहतोको वराहशिशुः ॥ २० ॥ तस्य ब्रह्मणः खस्थः आकाशे स्थितः ॥ २१ ॥ कुमारैः सनकादिभिः ॥ २२ ॥ सौकरं सूकरस्य विद्यमानं तर्कयामास मीमांसितवान् मीमांसाप्रकारं वक्ति किमेतदिति अहो इत्यनेन निकटवर्तिनो मुनीनुन्मुखीकरोति बत खेदयन् ॥ २३ ॥ किंबहुनेदं महाश्चर्यं अंगुष्ठशिरोमात्रः अंगुष्ठाग्रपरिमाणः । "गलिताःस्थूलपाषाणा गंडशैलाइतिस्मृताः । " एष वराहः मे मनः खेदयन् यज्ञो भगवानपिस्वित् ॥ २४ ॥

एनु माडबेकेंदु योचने माडिद्दक्के ई मुंदे हेळतक्कद्दन्ने माडबेकेंदु हेळुवरु— नानु याव श्रीमन्नारायणन उदरदिंद उत्पन्ननागिरुवेनो आ समर्थनाद नारायणने नन्न ई कार्यवन्नु माडिकोडलि

१. सूक्ष्मवराहः ॥— (**या.**)

(एंदु ब्रह्मदेवनु प्रार्थनेमाडिदनु) सत्यसंकल्पनाद श्रीहरिय भक्तनाद ब्रह्मदेवनादरू सत्यसंकल्पने एंब ई अर्थवन्नु प्रकटमाडुत्त श्रीहरिय अवतारवन्नु हेळुवरु— ' हे अनघ ' एंबे दोषदूरनाद विदुरने ईप्रकार भक्तिपूर्वकवागि श्रीहरियन्नु ध्यानमाडुत्तिद्द ब्रह्मदेवन नासिकाविवर (मूगिनहोळ्ळेयिंद) दिंद अदे क्षणदल्लिये संण (काडुहंदीमरियु) वराहशिशुवु ओंदु अंगुष्ठदष्टु अळते युळ्ळद्दागि होरगे बंदितु हे विदुरने आ ब्रह्मदेवनु अदन्नु नोडुवदरोळगे ओंदु क्षणदोळगे आ वराहवु आकाशदल्लिद्दु आनेयष्टु दोड्डदागि बेळेदितु अदु नोडुववरिगे बहळे अद्भुतवागि तोरितु. आग ब्रह्मदेवनु मरीचिये मोदलाद ऋषिगळिंदलू सनकादिगळिंदलू स्वायंभुवनिंदलू सहितनागि; आ वराहरूपवन्नु नोडुत्त अनेक प्रकारवागि तर्कमाडलारंभिसिदनु. आ विचारमाडिद संगतियले हेळुवरु— अहो एंदु तन्न मकळकडिगे मुखवन्नु माडि येनिदु? नन्न नासिकापुटदिंद होरगे बंदद्दु इदु निमित्तमात्र वराहवु. क्रीडादिगुणसंपन्नवाद महासामर्थ्यवुळ्ळ प्राणियागि तोरुवदु- इदु बहळे आश्चर्यवु इदु मोदलु नन्न मूगिनिंद होरबीळुबाग्ये हब्बादिन तुदेयष्टु तोरितु मुंदे ओंदुक्षणदोळगे ' गंडशिलोपमः ' दोड्डबंडिगल्लिनष्टायितु. सर्वज्ञशिखामणियाद नन्न मनमिगे, इदु याव वस्तुवेंदु विचारमाडुव विषयदल्लि इष्टु दुःख कोडबेकादरे ' अपिस्विद्भगवानेषः ' ई वराहवु अत्याहतषड्गुणैश्वर्यसंपन्ननाद श्रीमन्नारायणने यज्ञमूर्तियागि अवतरिसिरबहुदो? ॥ २० ॥ २१ ॥ ॥ २२ ॥ २३ ॥ २४ ॥

इति मीमांसतस्तस्य ब्रह्मणः सह सूनुभिः ॥ भगवान् यज्ञपुरुषो जगर्जागेंद्रसन्निभः ॥ २५ ॥ ब्रह्माणं हर्षयामास हरिस्तांश्च द्विजोत्तमान् ॥ स्वगर्जितेन ककुभः प्रतिस्वनयता विभुः ॥ २६ ॥ निशम्य तद्घर्घरितं स्वखेदक्षयिष्णु मायामयसूकरस्य ॥ जनस्तपःसत्य निवासिनस्ते त्रिभिः पवित्रैर्मुनयोऽगृणन्स्म ॥ २७ ॥ ॥ ॥ ॥

ब्रह्मणः सहसोत्पन्नाज्ञाननिरासप्रकारमाह इतीति । मीमांसतः मीमांसमानस्य सतः मरीच्यादिसूनुभिः ॥ २५ ॥ गर्जितफलमाह ब्रह्माणमिति प्रतिस्वनयता प्रतिध्वनिमतीः कुर्वता गर्जितेन ॥ २६ ॥ अयं हरिरिति ज्ञात्वा एतैः किमकारीति तत्राह निशम्येति मायामयसूकरस्येच्छामयवराहस्य स्वखेदक्षयिष्णु स्वखेदविनाशकरं घर्घरितं सूकराणां नादविशेषं श्रुत्वा जनादिलोकनिवासिनो मुनयस्त्रिभिः पवित्रैर्निर्दोषवेदैस्तं यज्ञपुरुषमगृणन्नित्यन्वयः स्मेत्यनेन गुणानुपूर्वकस्तुतिं सूचयति जनस्तपइति छंदोभंगभयाद्वेदानुकारित्वाद्वा विसर्गांतं ॥ २७ ॥

ब्रह्मदेवनिगे तत्कालक्केमात्र उत्पन्नवाद अज्ञाननाशवादसंगतियन्नु हेळुवरु— ईप्रकार ब्रह्मदेवनु तन्न मरीचिमोदलाद मक्कळिंद सहितनागि विचारमाडुत्तिरलु आ समयदल्लि महदैश्वर्यसंपन्ननाद यज्ञपुरुषनेनिसिगोंड आ वराहनु दोड्डपर्वतदंते रूपवन्नु धरिसि गर्जने माडिदनु ॥ २५ ॥ आगर्जनेयु ब्रह्मादिगळिगे भयोत्पादकवायितो एंदरे इल्लवु— सर्वत्र व्याप्तनाद श्रीहरियु, यद्यपि तन्न ४२६

१. गिरींद्रतुल्यः ।— (**या.**) २. मायया माहात्म्या मयः पूर्णः सचासौ सूकरश्च ॥— (**या.**)

आ— गर्जनेयिंद याक्तू दिक्कुगळु प्रतिध्वनिमाडुत्तिद्दवु आदरू अंथ गर्जनेयिंद ब्रह्मदेवनन्नू आ मरीचिमोदलाद ऋषिगळन्नू हर्षबडिसिदनु. ॥ २६ ॥ आमेले इवनु श्रीहरिएंदु तिळिदु ई ब्रह्मादिगळु येनुमाडिदरेंदरे हेळुवरु— तम्म खेदवन्नु नाशमाडतक्क, तन्निच्छेयिंदले वराहरूपवन्नु धरिसिद श्रीहरिय वराहगळंते घर्घर एंब ध्वनियन्नु केळि, ब्रह्मादिगळू जनलोक, तपोलोक, सत्यलोक- गळल्लिद्द मुनिगळेल्लरू निर्दुष्टवाद मूरु वेदगळिंद आ वराहनन्नु होगळलारंभिसिदरु. ' स्म ' एंबदरिंद अवरु होगळिदु अवन गुणगळ आनुपूर्वकस्तुतिएंदु सूचितवागुवदु. ' जनस्तपःसत्य ' एंब मूलदल्लि विसर्गवुळ्ळप्रयोगवु छंदोभंगवागबारदेंतलू अथवा वेददल्लि हींगे प्रयोगविरुवदरिंद अदरंते ई प्रयोगवु. ॥ २७ ॥

तेषां सतां वेदवितानमूर्तिर्ब्रह्मावधार्यात्मगुणानुवादं ॥ ननर्द भूयो विबुधोदयाय गजेंद्रलीलो जलमाविवेश ॥ २८ ॥

स्तुतिस्तत्प्रसादजननी समभूदितिभावेनाह तेषामिति । वेदानां वितानेन विस्तारेण प्रतिपादिता मूर्तिर्यस्य स तथा यद्वा वेदएव वितानमुल्लोचमुपरि- पतदवकरनिवारणवत्त्रं यस्याः सा वेदविताना तादृशी मूर्तिर्यस्य स तथा यज्ञवितानमूर्तिरिति पाठे यज्ञविस्तारेषु गृहीतमूर्तिरित्यर्थः । आत्मनो ज्ञानानंदादि- गुणानामनुवादो यस्मिंस्तत्तथा ब्रह्मलक्षणं वेदमवधार्य ननर्द ननाद भूयइत्युभयत्र संबध्यते प्रलयजलं ॥ २८ ॥

इवरु माडिद स्तोत्रवु आ परमात्मन प्रसादवन्नुंटुमाडतक्कद्दायितेंदु हेळुवरु—वेदगळ विस्तारदिंद होगळिमिगोळ्ळुव स्वरूपवुळ्ळ अथवा वेदवु यावातनगे धूळि मत्तु होरगिन कस मोदलादद्दु तगलद्दंते हाकुव वस्त्रदंते इरुवदो आ वराहनु, तन्न आनंदादिगुणगळन्नु अनुवादमाडतक्क वेदवन्नु आ उत्तमराद ऋषिगळ मुखदिंद केळि पुनः गर्जनेमाडिदनु पुनःपुनवागि देवतिगळिगे क्षेमवागुवदक्के श्रेष्ठवाद आनेयंते आडुत्त आ भयंकरवाद नीरिनल्लि प्रवेशमाडिदनु. ॥ २८ ॥

उत्क्षिप्तवालः खचरः कठोरसटा विधुन्वन् खररोमशत्वक् ॥ खुराहताभ्रः सितशृंग ईक्षाज्योतिर्विभासो भगवान्महीध्रः ॥ २९ ॥

तत्तद्योनिजानां तत्तत्क्रियायां तत्तद्भावोऽनिवार्य इति जलप्रवेशे तद्भावं वक्ति उत्क्षिप्तेति स भगवान्महीध्रः नारायणाख्यः पर्वतः कं प्रलयजलमाविशदि- त्यन्वयः । तं विशिनष्टि उत्क्षिप्तवालः उद्धृतपुच्छः अन्यत्रोन्नतकपोलः " वालंतुकपिलंवज्रं व्हीबेरंदीर्घरोमकमि " त्यभिधानात् । व्हीबेरंवा खे आकाशे चरतीति खचरः उभयत्र समानं कठोराः परिदृढाः सटाः बहलकेसरान् धुन्वन् कंपयन् अन्यत्र सटा लताविशेषाः खराः परुषाः रोमशा रोमवती त्वग्यस्य स तथोक्तः अन्यत्र रोमशः पिचुमंदः खरा पिचुमंदस्य त्वग्यस्मिन् स तथा खुरैराहतमभ्रं येनासौ खुराहताभ्रः संताडितमेघः अन्यत्र खुरैः शृंगैः सितशृंगः धवलदंष्ट्रः अन्यत्र स्पष्टं ईक्षायां नेत्रस्य ज्योतिस्तारा कनीनिका तया विभासो विभासनं दीप्तिर्यस्य स तथोक्तः यद्वा दर्शनाख्याग्निज्वालया शोभमानः ॥ २९ ॥

१. वेदैर्वितन्यते विस्तृतयोच्यतइति वेदविताना तथाविधा मूर्तिर्यस्य तत्तथा ॥— (**या.**)

आया योनिगळल्लि उत्पन्नवाद प्राणिगळिगे आयाजातिगेतक्क केलसगळन्नु माडुवाग्गे आ कार्यगळिगे योग्यस्वभावु , यारिंदू बिडिसलोशवल्लवु एंदु वराहरूपियाद हरियु तन्न कार्यक्के तक्कभावतोरिसुवनेंदु हेळुवरु— (आ वराहन प्रलयोदकप्रवेशमाडुव रूपवु ह्यागित्तेंदरे) ' भगवान्महीध्रः ' वराहरूपियाद परमात्मनेंव पर्वतवु, आ वुदकवन्नु प्रवेशमाडितु अदन्नु वर्णिसुवरु— ' उत्क्षिप्तवालः ' ई वराहवु पुच्छवन्नु मेलक्के एत्तित्तु पर्वतदल्लि कोडगल्लुगळु मेलक्के एद्दु निंतिद्दवु अथवा बालद बेरुगळु मेलक्के एद्दुनिंतिद्दवु ' स्वचरः ' आकाशदल्लि संचरिसुतित्तु. ई अर्थवु पर्वतक्कू वराहक्कू समवे. ' कठोरसठाविधुन्वन् ' वराहके बहळ दप्पाद उद्दागिद्द कूदलुगळु गट्टिदिंद कुत्तिगेयवरेगे इद्दवु अवगळन्नु अगळाडिसुववनागि, पर्वतवु घट्टियाद उद्दागिद्द लतागळन्नु अल्लाडिसुवंते तोरुव ' खररोमशत्वक् ' वराहवु तीक्ष्णवाद कूदलुगळिंद युक्तवाद मैमेलिन चर्मवुळ्ळद्दु पर्वतवु तीक्ष्णवाद पिचुमंदवृक्षद त्वगटिवुळ्ळद्दु. 'खुराहताभ्रः' वराहवु तन्न खुरगळिंद मेघगळन्नु ताडनमाडुव, पर्वत— कोडगल्लुगळु मेघगळिगे ताकुतिद्दवु ' मितशृंगः वराहवु शुभ्रवाद कारिदवडिय हल्लुगळुळ्ळद्दु पर्वतवु शुभ्रकोडुगल्लुगळुळ्ळद्दु ' ईक्षाज्योतिर्विभासः ' वराहवु कटाक्षदिंद नोडुवाग्गे कण्णोळगिन करेगुडिय प्रकाशवुळ्ळद्दु, अथवा नोटवेंव अग्निज्वालादिंदले शोभिसुत्तिद्दद्दु पर्वतवु—दावाग्नियप्रकाशवुळ्ळद्दु. ॥ २९ ॥

घ्राणेन पृथ्व्याः पंदवीं विजिघ्रन् क्रोडापदेशः स्वयमध्वरांगः ॥ करालदंष्ट्रोप्यकरालदृग्भ्यामुदीक्ष्य विप्रान् गृणतोविशत्कं ॥ ३० ॥ स वज्रकूटांगनिपातवेगविशीर्णकुक्षिस्तनयन्नुदन्वान् ॥ उत्सृष्टदीर्घोर्मिकरैरिवार्तश्चुक्रोश यज्ञेश्वर पाहि मेति ॥ ३१ ॥

घ्राणेनेंद्रियेण विजिघ्रन् घ्राणो (गंधो)पादानं कुर्वन् क्रोडापदेशः देवकार्यनिमित्तेन वराहः नतु साक्षाद्वराहः किंतु स्वयं स्वतोऽध्वरांगः यज्ञमूर्तिः श्रीनारायणः पूर्वत्र पर्वतोपमत्वेन दंष्ट्रोक्तिरत्राशांतत्वद्योतनायेति न पुनरुक्तिरध्वरस्य यज्ञस्य अंगानि कुशादीनि साधनानि यस्मिन् सोऽध्वरांग इति वा । " अपदेशो लक्षणेस्यान्निमित्तव्याजयोरपी "- तियादवः ॥ ३० ॥ जलप्रवेशसमये समुद्रेण स्तुतिरेवाकारि नत्वाक्रोश इत्याशयेनाह सवज्रेति । स उदन्वान्समुद्रो हे यज्ञेश्वर मां पाहीति भावेन चुक्रोशाजुहावोन्ननादेत्यर्थः । रक्षाप्रार्थनायां कः क्लेशः प्राप्त इत्यत उक्तं वज्रकूटवदयोघनवद्वरिम्णोपेतस्यांगस्य निपातवेगेन विशीर्णोतिनिष्पिष्टः कुक्षिर्यस्य स तथा अतएवोदरखेदनया स्तनयन् शब्दं कुर्वन् आर्तइव उत्सृष्टा ऊर्ध्वगता अतएव दीर्घा ऊर्मयएव करास्तैः उदरादिवेदनार्तः पुरुषो यथा शिरसि करं निधाय आक्रोशति तथेति लौकिकार्थः अध्यात्मस्तु स्तुतिरेव कृतेत्यर्थः ॥ ३१ ॥

आ भयंकर उदकदल्लि पृथ्वियु एल्लि इरुवंदेंदु हुडुकुवद्दक्के नासिकादिंद पृथ्विय गंधवन्नु मूशिनोडुत्त, देवकार्यनिमित्तदिंदले वराहरूपवन्नु धरिसिदवनु साक्षाद्वराहनल्ल मत्तू ' स्वयं ' स्वतः यज्ञमूर्तियाद नारायणनु भयंकरवाद कारि हल्लुगळुळ्ळवनादाग्यू अभयंकर (सौम्य) वाद नेत्रगळिंद (तन्नन्नु) स्तोत्रमाडतक्क मरीचिऋषिय मोदलाद ब्राह्मणरन्नु नोडि उदकवन्नु प्रवेशमाडिदनु. ४२७

१. स्थितिं मार्गंवा विजिघ्रन् विमार्गयन् तज्जात्यनुकरणमेतत् ॥— (**या.**) २. यज्ञोपयुक्तकुशादिजनकांगः ॥— (**या.**) ३. उदरविदारणार्तः पुमान् यथोर्ध्वबाहुःसन् विदारकं प्रति मां याहीति आक्रोशति तथायामिति ज्ञातव्यं ॥= (**या.**)

हिंदिन श्लोकदल्लि पर्वतदृष्टांतदल्लि भयंकर कारिगळ वर्णनेयु इद्दाग्यू इन्नू भयंकरत्ववु शांतवागिल्लवेंदु तोरिसुवदक्क इल्लि हल्लुगळ वर्णनेयं होर्तु पुनरुक्तियल्लवु. ' अध्वरांगः ' यज्ञद साहित्यगळाद दर्भमोदल्लादवु यावन (वराहन) शरीरदिंद उत्पन्नवागिरुवो अवनु. ' क्रोडापदेशः ' अपदेश एंब शब्दवु लक्षणदल्लियू निमित्तदल्लियू व्याजदल्लियु प्रयोगिसल्पडुवदु एंदु यादवकोशवु. ॥ ३० ॥ आ वराहनु समुद्रद नीरिनल्लि प्रवेशमाडुवाग्गे समुद्रनाथनु इवनन्नु स्तोत्रमाडिदने होर्तु आक्रोशमाडिल्लवेंब अभिप्रायदिंद हेळुवरु— आ समयदल्लि समुद्रनाथनु हे यज्ञेश्वर, नन्नन्नु संरक्षणेमाडु एंदु दोड्ड ध्वनियिंद अवनन्नु करेयुत्त गर्जनमाडिदनु. ई समुद्रनु रक्षिसेंदु प्रार्थिसुवेकादरे इवनिगे एनु क्लेशवु बंदोदगित्तु? एंदरे— वज्रसारदंते अथवा कब्बिणवन्नु कडियुवदक्के माडिद ओंदतरद अतिघट्टियागि भारवाद आयुधके अयोघनवे (चमटिगिए) न्नुवरु अदरंते बहुभारवाद इवन (वराहन) शरीरवु बीळुव वेगदिंद, छिन्नभिन्नवाद कुक्षिप्रदेशवुळ्ळवनागि समुद्रनाथनु उदरवेदनादिंद ओदरुत्त मेले बरुव थेरेगळेंब करगळिंद ' आर्तइव ' उदरवेदनवे मोदलाद वेदनागळिंद आर्तनाद पुरुषनु ह्यागे शिरदल्लि करवन्निट्टुगोंडु रोगपरिहारकनन्नु कुरितु नन्नसमीपक्के बा एंदु ओदरुत्तानो हागे श्रीहरियन्नु आव्हानमाडिदनेंदु लौकिकार्थवु वस्तुतः आ समुद्रनिंद श्रीनारायणन स्तोत्रवे माडल्पट्टिदेंदर्थवु. ॥ ३१ ॥

खुरैः क्षुरप्रैर्दरयंस्तदाप उत्पारवारं त्रिवरू रसायां ॥ ददर्श गां तत्रसुषुप्सुरग्रे यां जीवधानीं स्वयमभ्यधत्त ॥ ३२ ॥

खरतरतरणिकिरणपरितप्तलोकवराहवन्नहरेर्जलप्रवेशः किंतु यद्दर्शनार्थं प्रावेशि तद्दर्शनमनेन कृतमित्याह खुरैरिति । उत्पारवारमितिक्रियाविशेषणं पारे तीरांतरे स्थितं वारि जलं यथोद्गतं भवति तथा क्षुरप्रैः क्षुरसाधर्म्यं पूरयंतीति क्षुरवन्निशितैरित्यर्थःयदा स्वर्धचंद्रैः । " अर्धचंद्रः क्षुरप्रः स्यादि "- तियादवः । खुरैस्तस्य समुद्रस्यापो दरयन् भिंदन् त्रिभिर्वेदैर्त्रियत इति त्रिवरुः त्रिषु युगेषु अवतारं वृणोतीति वा गुरुशब्दवत्प्रक्रिया ढूलोपेपूर्वस्य दीर्घोण इतिदीर्घः अग्रे सर्वं विलाप्य सुषुप्सुः निद्रां कर्तुकामः स हरिर्यां जीवधानीं सर्वप्राण्याधारभूतामभ्यधत्त जलस्योपरि निहितवान् तां गां तत्र रसायां पाताले ददर्शेत्यन्वयः । "वरुः सुमल्लेखास्याद्वराहस्यचविस्तृते " त्यभिधानाद्वलित्रयांकितगलोवा पारं वृणोतीति पारवारः कर्मण्यणित्यण्प्रत्ययः पक्ष्यादिप्राणिजातं तद्यथोद्गतं स्यात्तथेति वा ॥ ३२ ॥

लोकदल्लि काडिनोळगिद्द वराहवु (हंदियु) अतिप्रखरवाद सूर्यन किरणगळिंद तप्तवागि ह्यागे नीरिनल्लि बीळुवदो हागे श्रीहरियु जलप्रवेशवल्ल; मत्तू याववस्तुविनसलुवागि नीरिनल्लि प्रवेशमाडिद्दनो अदन्नु कंडनेंदु हेळुवरु— (खुरैः एंब श्लोकदिंद) तीरांतरदल्लि स्थितवाद पक्षिमोदलाद प्राणिसमूहवु अथवा समुद्रोदकवु मेले ह्यागे होदीतो हागे तीक्ष्णवाद खड्गदंते हदनाद अर्धचंद्राकृतियागिद्द खुरगळिंद आ समुद्रद उदकवन्नु शीळुत्त ' त्रिवरुः ' मूरुवेदगळिंद विस्तारमाडल्पट्ट गुणगळू मत्तू कर्मगळुळ्ळ अथवा मूरु युगगळल्लि अवतारमाडुववनाद—ई शब्दवु गुरुशब्दंते नडेयुवदु. ' त्रिवरूरसायां ' एंबल्लि रकारद हिंदे विसर्गवु बंदरे आ विसर्गवु लोपवागि हिंदिन अक्षरक्के दीर्घवरुवदु. सृष्टिसमीपदकालदल्लि (प्रलयकालदल्लि) सृष्टवाद जगत्तन्नु नाशमाडि प्रलयोदकदल्लि मलगबेकेंदु तानु इच्छिसिदाग्गे एल्लप्राणिगळिगे आधारळागिद्द याव भूमियन्नु नीरमेले इट्टिद्दनो आ भूमियन्नु पातालदल्लि श्रीहरियु कंडनु. वराहद उत्कृष्टवागि विशालवाद

कुत्तिगेयमेलिन रेखाक्के ' वरः ' एन्नुवरु आद्दरिंद ई वराहन कुत्तिगेयमेले मूरु रेखागळिद्दवेंदु अर्थवु ' पारवारः ' पारगतियन्नु अपेक्षिसतक्क पक्षिमोदलादवु ह्यागे मेलक्के हारुववो हागे इवनु केळगादरू नीरिन पारु गंडनु एंत एरडने अर्थवु. ॥ ३२ ॥

स्वदंष्ट्रयोद्धृत्य महीं विलग्नां स उत्थितः संरुरुहे रसायाः ॥ तत्रापि दैत्यं गदया पतंतं सुनाभसंदीपिततीव्रमन्युः ॥ ३३ ॥
जघान रुंधानमसह्यविक्रमः सलीलयेभं मृगराडिवांभसि ॥ तद्रक्तपंकांकितगंडतुंडो यथा गजेंद्रो जगतीं विभिंदन् ॥ ३४ ॥

भगवता महीं दृष्ट्वा किमकारीति तत्राह । स्वदंष्ट्रयेति विलग्नां रसातले बंदीगृहवत् स्थितां महीं स्वदंष्ट्रयोद्धृत्य रसाया उत्थितः स आदिवराहः संरुरुहे उपर्यारुरोह रसालयैरसुरैः स्वभूतभूम्युन्नयनसमये निद्रितं किं तत्राह तत्रापीति सहरिस्तत्र भूम्युद्धरणसमयेपि स्वं रुंधानं गदया पतंतं दैत्यमादिहिरण्याक्षं दंष्ट्रया जघानेत्यन्वयः कीदृशः सुनाभवच्चक्रवत् संदीपिततीव्रमन्युः प्रज्वलितात्युग्रकोपः अतएवासह्यविक्रमः मृगराट् सिंहः इभं गजं यथा तथा अंभसीत्यनेन रसातलात् किंचिदूर्ध्वमागत्येति सूचयति तस्य दीप्तिविशेषमाह तद्रक्तेति यथा जगतीं तटभूमिं विभिंदन् तिर्यद्दंतप्रहारेण प्रोल्लिखन् तत्पंकांकितगंडतुंडो भवति तथा दंष्ट्रया हिरण्याक्षं हत्वा तस्य रक्तपंकेनांकितगंडतुंडो उच्चकाश इति शेषः अनेन विशेषणेन हिरण्याक्षौ द्वौ तत्रैको दंष्ट्रया हत इतरस्त्वन्येनायुधेनेति ज्ञायते। " ब्रह्मजस्तुहिरण्याक्षः प्रथमं दंष्ट्रया हतः । सएव पार्षदाविष्टो द्वितीयः कर्णताडनात् । पूर्वं लयोदके मग्नां द्वितीयंतेन मज्जितां । भुवमुद्धरतेवासौ हरिणाक्रोडमूर्तिने" त्यवगंतव्यः । अत्रैवोत्तरग्रंथे विदुरप्रश्नं परिजिहीर्षुणा हरिणा हिरण्याक्ष एकएव व्यत्यस्योच्यते तद्दुष्टमोहनार्थमविविच्य कथनं देवानां प्रियार्थं चेति । तदुक्तं " व्यत्यासेनापिचोच्यंते अविवेकेनकुत्रचित् । दुष्टानामोहनार्थाय तत्रतत्रकथाः क्वचिदि "- ति । अविवेकोनाम अविविच्यकथनं न वक्तुर्हरेरज्ञानं । " सर्वज्ञस्यकुतोज्ञानं व्यासस्योदारकर्मण " इतिवचनात् ॥ ३३ ॥ ३४ ॥

भूमियन्नु कंडु श्रीहरियिंद एनु माडल्पट्टितेंदरे हेळुवरु— रसातलदल्लि शरेमनियल्लिद्दंते इद्द भूमियन्नु ई वराहनु तन्न कारियिंद तक्कोंडु रसातलद्देशेयिंद मेले हत्तिदनु. आ रसातल वासिगळाद असुररु तम्मदागिद्द भूमियन्नु इवनु कैय्युवाग्गे निद्रेमाडतिद्दरेनु? एंदरे हेळुवरु— आ श्रीहरियु तानु आ रसातलदिंद भूमियन्नु मेलक्के एत्तुवाग्गे तनगे प्रतिबंधकमाडुवदक्के कंडु गदेयन्नु कैयल्लि हिडिदुकोंडु तन्नमेले हारुत्तिद्द आदिदैत्यनाद हिरण्याक्षनन्नु तन्न कारियिंद कोंदनु ह्यागे कोंदनु एंदरे चक्रदंते अत्यंतवागि उरियुत्तिरुव उग्रकोपवुळ्ळवनागि, आद्दरिंदले

१. सुनाभस्य सुदर्शनस्य संदीपिनः प्रज्वलितः तीव्रो मन्युः येन भगवता सुदर्शनमुपेक्ष्य स्वदंष्ट्रया दैत्यहनने कृतेसति ममात्र किंकृत्यमिति सुदर्शनस्य तस्मिन् समये कोप उत्पादित इति भावः (**या.**)

एरडनेदवरिंद तडियलशक्यवाद पराक्रमेयुळ्ळवनागि, सिंहवु आनेयन्नु ह्यागे कोल्लुवदो हागे कोंदनु. ' अंभसि ' नीरिनल्लि कोंदनु एंदन्नुवदरिंद आ कोल्लुवाग्गे रसातल बिट्टु स्वल्पु मेलक्के बंदिद्दनेंदु तोरुवदु आ दैत्यनन्नु कोंदाग्गे ई श्रीभूवराहनु ह्यागे प्रकाशमंतनागिद्दनेंदरे— केंपु, हळदि, मोदलाद अनेकतरद मंणुवुळ्ळ दोड्डमरडिय (एत्तरवादभूभागव) न्नु, मदोन्मत्तवाद आनेयु तन्न सोट्टाद दंतगळ होडतदिंद शीळि अदक्के गेरेकोरदु आ भूमिय केंपुवर्णद केसरु तन्न एरडू गल्लगळिगे हत्तिदाग्गे ह्यागे तोरुवदो? अदरंते ई वराहनादरू हिरण्याक्षनन्नु दंष्ट्रादिंद होडेदुकोंदु अवन रक्तवेंब केसरु, एरडू कपोलप्रदेशक्के हत्तिद्दरिंद अत्यंतप्रकाशमंतनादनु, ई विशेषण कोट्टु हेळुवदरिंद हिरण्याक्षरु इब्बरु अवरल्लि ओब्बनु वराहन कारियिंद हतनादनु मत्तोब्बनु एरडनेसारे आयुधदिंद हतनादनेंदु तिळियुवदु. इदक्के प्रमाणवु— ' ब्रह्मदेवनिंद उत्पन्ननाद हिरण्याक्षनु मोदलु दंष्ट्रादिंद हतनादनु अदे हिरण्याक्षने श्रीहरियु द्वारपालकनल्लि प्रविष्टनागि एरडने सारे किविय(कर्ण)-- ताडनदिंद हतनादनु. मोदलनेसारे प्रलयोदकदल्लि भूमियु मुळुगित्तु; एरडनेसारे दैत्यनिंदले मुळुगिसल्पट्टित्तु, इंथ भूमियन्नु मेलक्के एत्तुवाग्गे श्रीहरियु दैत्यनन्नु कोंदनु ' इदे भागवतदल्लिये ई मुंदिन ग्रंथदल्लि विदुरन प्रश्नपरिहारकालक्के ओब्बने हिरण्याक्षनेंदु कथाव्यत्यासदिंद हेळल्पडुवदु. इब्बरु हिरण्याक्षरु बेरे एंदु कथा बेरेबेरे माडदे कूडिसि हेळिरुवदु दुष्टजनर मोहार्थवागियू मूर्खर प्रीतियागुवदक्कागियू हेळल्पट्टिरुवदु. इदक्के प्रमाणवु ' श्रीवेदव्यासरिंद केलवु स्थळदल्लि व्यत्यासदिंदादरू, क्वचित् स्थळदल्लि बेरे बेरे माडदे संकल्पी करणदिंदलू दुष्टजनर मोहक्कागि अल्लल्लि कथेगळु हेळल्पट्टवे ' इल्लि (प्रमाणदल्लि अविवेकवेंदरे बेरे बेरे हेळदे इरोणवेंदर्थवे होर्तु ग्रंथकर्तृगळाद वेदव्यासर अज्ञानदिंदेंदल्लवु निर्दोषकार्यगळन्नु माडतक्क सर्वज्ञशिखामणिगळाद बादरायणदेवरिगे अज्ञानवेल्लि ? ॥ ३३ ॥ ३४ ॥

तमालनीलं सितदंतकोट्या क्ष्मामुत्क्षिपंतं गजलीलयांग ॥ प्रज्ञाय बद्धाजलयोनुवाकैर्विरिंचमुख्या उपतस्थुरीशं ॥ ३५ ॥

अयं हरिरेव न लोकवराह इति ज्ञापनाय विरिंचप्रमुखानां देवानामुपसत्तिविधिं वक्ति तमालेति । उत्क्षिपंतं उद्धरंतं अनुवाकैरियत्संख्याविशिष्टैर्वेदवाक्यैः ३५

ईतनु साक्षात् श्रीहरिये होर्तु लोकदल्लिद्द साधारण वराहवल्लवु, एंदु तिळिसुवदक्के ब्रह्मदेवने मोदलाद देवतिगळु इवनन्नु प्रार्थनेमाडिद संगतियन्नु हेळुवरु— ' हे अंग ' प्रीत्यास्पदनाद विदुरने तमालपुष्पदंते नील्वर्णवुळ्ळ वराहरूपियु मदोन्मत्तवाद आनेय आटदंते तन्न शुभ्रवाद दंतद तुदियिंद भूमियन्नु मेलक्के एत्तिवैय्यतक्कदन्नु, ब्रह्मादिदेवतिगळु तिळिदु; कैजोडिसिगोंडु तम्मगळिगे स्वामियाद ई यज्ञेश्वरनन्नु केलवु वेदवाक्यगळिंद स्तोत्रमाडलारंभिसिदरु- ॥ ३५ ॥

देवाऊचुः ॥ जितं जितं तेऽजित लोक (यज्ञ) भावन त्रयीतनुं स्वां परिधुन्वते नमः ॥ यल्लोमगर्तेषु निलिल्युरध्वयस्तस्मै नमः कारणसूकराय ते ॥ ३६ ॥ ॥ ॥ ॥ ॥ ॥

१. भो अजित ते त्वया जितं जितमिति संभ्रमे द्विरुक्तिः ॥-- (**या.**)

उपस्थाय किंकृतं तत्राह जितंजितमिति । त्रयीतनुं त्रिवेदप्रतिपाद्यां मूर्तिं परिधुन्वते रोमजलत्यागाय कंपमानाय निलिल्युर्निलीनाः ते तुभ्यं॥ ३६ ॥

ब्रह्मादिदेवतिगळु स्तोत्रमाडुवरु— ' हे अजित ' यरडनेदवरिंद जैसलशक्यपराक्रमवुळ्ळ हरिये सकलल्लोक सृष्टिमाडतक्क निनिंद सर्ववू जितवायितु. संभ्रमदल्लि द्विरुक्तियु. मूरूवेदगळिंद मुख्यवागि प्रतिपाद्यवाद ई देहवन्नु दैत्यवधार्थवागि नीरिनल्लि मुळुगिसि ईग्ये आ रोमकूपदल्लि शेरिद नीरुहोगुवदक्के मै नडिगिसुत्तिरुव निनगे नमस्कारवु; यावातन रोमकूपगळल्लि यावन्नू समुद्रगळू मुच्चिहवो आ नीनु ईग्ये निमित्तमात्रदिंदले वराहरूपवन्नु धरिसिदनिनगे नमस्कारविरलि ॥ ३६ ॥

रूपं तवैतन्ननु दुष्कृतात्मनां दुर्दर्शनं देव यदध्वरात्मकं ॥ छंदांसि यस्य त्वचि बर्हिरोमस्वाज्यं दृशि त्वंघ्रिषु चातुर्होत्रं ॥ ३७ ॥

अनेन विष्णुरयं न लोकवराहइत्यस्य किमायातमिति तत्राह रूपमिति दुष्कृतात्मनामिति विशेषणेन सुकृतात्मनां सुदर्शनमिति ध्वनितं अत इदमेवास्य परब्रह्मत्वे मानं सूचितं अध्वरात्मकं यज्ञसाधनप्रसूतिकारणं अनेनापि न केवलभूम्युद्धरणाय किंतु सकलयज्ञसाधनप्रसूतये इदं रूपमिति सूचितं यद्वा यज्ञाख्यपरमात्मरूपं । " यज्ञोविष्णुर्देवते - " तिश्रुतेः । अनेन ब्रह्मत्वं स्पष्टमुक्तं भवति । " अयमात्माब्रह्म - " तिच । अस्य यज्ञात्मकत्वं स्पष्टयति छंदांसीत्यादिना सप्तच्छंदांसीत्यादयो यस्य तव त्वगादिषु वर्तते तुभ्यं नम इत्यन्वयः । बर्हिर्दर्भः । दृशि चक्षुषि चतुर्भिर्होतृभिः क्रियमाणं कर्म चातुर्होत्रं ॥ ३७ ॥

इवर स्तोत्रदिंद इवनु (विष्णुवु) लौकिकवराहनल्लवेंबदक्कनु निदर्शनवायितेंदरे हेळुवरु— ' हे देव ' ई निन्न, यज्ञसाधनगळन्नेल्ल हुट्टिसुवदक्के कारणवाद स्वरूपवु, पापिजनगळिंगे नोडल शक्यवादद्दु पापिजनगळिंगे अशक्यवेंदु हेळुवदरिंद पुण्यवंतरिगे नोडलिक्के सुलभवेंदु भेरीहोडदंतायितु आद कारण इदे चिन्हवे इवनु परब्रह्मनेंबदक्के प्रमाणवु एंदु सुचिसुवदु. मत्तू ' अध्वरात्मकं ' एंब विशेषणदिंद ई अवतारवु केवल भूमियन्नु मेलक्के तरुवदक्के एंदल्लवु सकल यज्ञसाहित्यगळन्नु हुट्टिसुवदक्के एंदु सूचितवागुवदु. ' यज्ञगळिंगे यज्ञनामकनाद विष्णुवे देवतियु ' एंदु श्रुतियिद्दरिंद इदु यज्ञनामक परमात्मस्वरूपवु इदरिंदलू ई स्वरूपवु परब्रह्मात्मकवेंदु हेळल्पडुवदु मत्तू ई वराहस्वरूपवे यज्ञेश्वर रूपवेंबदन्नु स्पष्टवागि हेळुवरु-- याव ई वराहरूपद त्वगिंद्रियदल्लि, सप्त ७ छंदः सुगळु इरुववु. रोमगळल्लि दर्भगळिरुववु. नेत्रदल्लि होमक्के साधनवाद घृतवु इरुवदु. नाल्वरु ऋत्विजरिंद आगतक्क दर्शपौर्णमास्य मोदलाद इष्टिगळु पादगळल्लिरुववु. ॥ ३७ ॥

स्रुक्कुंड आसीत्स्रुव ईश नासयोरिडोदरे चमसः कर्णरंध्रे ॥ प्राशित्रमास्ये रसने ग्रहास्तु ते यच्चर्वणं ते भगवन्नग्निहोत्रं ॥ ३८ ॥

इडा यज्ञपात्रं चमसः चतुष्कोणसन्निवेशो यज्ञपात्रं प्राशित्रं यज्ञपात्रं पुरोडाशादिर्वा द्वादशसोमग्रहाः रसने जिव्हाया क्रियायां च चर्वणं दंतैश्चर्वणं । " चर्वणंचूर्णनंदंतैरि- " ति यादवः ॥ ३८ ॥

' हे ईश ' निन्न (तुंड=) उद्दागिद्द वदनदिंद, होममाडतक्क अश्वत्थकाष्ठद दोड्डु सौंटिनंतिद्दु कोनेगे नालिगेयंतिरुव ' स्रुक् ' एंब हेसुरुळ्ळ पत्रेयु उत्पन्नवायितु. ' स्रुक् एंबदु प्रधानाहुतियन्नु कोडतक्क पात्रेयु) निन्न नासिकादिंद तीर्थद सौटिनिट्टु दुंडगागि सण्णवदनविद्दु उद्दन्न सौटिनंतिरुवदु ' स्रुव ' एंब पात्रेयु उत्पन्नवायितु. (स्रुव् एंबदु प्रायश्चित्ताहुतियपात्रे) निन्न उदरदल्लि इडा एंब पात्रेयु उद्दके डोणिय आकारवागिद्द कट्टिगेय पात्रेयु (अदरल्लि ऋत्विजरु तम्म तम्म भागद पुरोडाशवन्नु अभिमंत्रणेमाडि हंचिगोळ्ळुवरु–) किविय रंध्रदल्लि चमस एंब नाल्कुमूलेयुळ्ळ सण्णपात्रेयु मुखदल्लि प्राशित्रवेंब अवांतर पात्रेयु अथवा पुरोडाश (अग्निगे प्रधानाहुतियन्नु कोडतक्क अक्की कुट्टि हिट्टुमाडि कलिसिद मुद्दियु) मोदलादद्दु उत्पन्नवायितु. हन्नेरडु सोमग्रहगळु रसनेंद्रियदल्लि (नालिगियल्लि) उत्पन्नवादवु. ' हे भगवन् ' निन्न चर्वणवु= (हल्लुगळिंद नवलोणवु) अदरिंद अग्निहोत्रवु उत्पन्नवायितु. ॥ ३८ ॥

आत्मजन्म तव जननं दीक्षा व्रतसंग्रहः उपसदः उपसन्नामानो यज्ञविशेषाः उपसत्तिविशेषा वा यस्त्वं प्रायणीयोदयनीयदंष्ट्रः यस्य तव दंष्ट्रयोरुपक्रमावसानकर्मणी इष्टी प्रायणीयोदनीयसंज्ञे वर्तेते इति शेषः क्रतुः संकल्पः क्रतोरितिपाठे क्रतोः सत्यसंकल्पस्य सर्वक्रत्वाधारस्यवा तव शीर्षकं शिरः सभ्यावसथ्यौ अग्निचितयः सप्तक्रतवस्तदासवः प्राणा जन्मभूमयः चितय इतीष्टकाबंधनविशेषा वा ॥ ३९ ॥

दीक्षात्मजन्मोपसदः शिरोयस्त्वं प्रायणीयोदयनीयदंष्ट्रः ॥ जिह्वा प्रवर्ग्यस्तव शीर्षणं क्रतुः सभ्यावसथ्याचितयोऽसवो हि ते ३९

निन्न अवतारदिंदले दीक्षाव्रतग्रहणवु उत्पन्नवायितु. शिरस्सिनिंद उपसद एंब यज्ञविशेषवु उत्पन्नवायितु, निन्न दंष्ट्रागळिंद प्रायणीय उदयनीयगळेंब यज्ञदल्लि प्रारंभकालक्कू समाप्तिकालक्कू माडतक्क इष्टिगळु उत्पन्नवादवु. प्रवर्ग्य एंबदु, सोमादियागळल्लि माडतक्क अवांतर इष्टियु, निन्न नालिगेयिंद उत्पन्नवायितु. यज्ञद संकल्पवु निन्न शिरस्सिनिंद उत्पन्नवायितु. सभ्य, आवसथ्य, इवु यरडु महायज्ञद कर्मागगळु सोममोदल्गुमाडि पौंड्रिकपर्यंतवाद सप्तक्रतुगळु निन्न प्राणदिंद उत्पन्नवादवु अंदरे इवुगळिगे नीने जन्मभूमियु अथवा ' चितयः '= इष्टिकाबंधन=चैनमोदलाद यागगळल्लि गरुडाकारवागि इट्टिगिगळन्नु कट्टुवरु अदक्के ' चितयः ' अंनुवरु— ॥ ३९ ॥

सोमो लता प्रातरादित्रीणि सवनानि अवस्थितिर्निश्चलत्वेन गतिनिवर्तनं संस्थाविभेदा अग्निष्टोमादयः सप्त । "अग्निष्टोमादयःसंस्थाभेदाः सप्तास्यतंतव " इति यादवश्च । त्वगादिसप्त देहधातवः । अत्र श्लोकद्वये सप्तसु प्रथमेति सूत्रात् प्रथमायाः सप्तमीत्वं युक्तं त्वचीत्यादिसप्तमीप्रयोगाच्च सर्वाणि सत्राणि बहुभिः संभूय कर्तव्यानि दीर्घकालीनानि यज्ञविशेषकर्माणि किंबहुनोक्तेनेत्युपसंहरति त्वंसर्वेति । ऐकाहिकह्याहिकादिसर्वयज्ञस्थापकेच्छावान् इष्टिबंधनः तव देहबंधने संहनने इष्टिः प्रतिपत्तिस्थ्यादिषु क्रियमाणकर्मविशेषो वर्तत इत्यर्थः ॥ ४० ॥

१. क्रतोः यज्ञरूपस्य ज्ञानरूपस्यवा ॥— (**या.**)

सोमस्तु रेतः सवनान्यवस्थितिः संस्थाविभेदास्तव देहधातवः ॥ सत्राणि सर्वाणि शरीरसंधिस्त्वं सर्वयज्ञक्रतुरिष्टिबंधनः ॥४०॥

निन्न रेतस्सिनिंद सोमलता एंबदु उत्पन्नवायितु (सोमलता= अदु ओंदु तरद बळ्ळियु अदन्नु सोमयागदल्लि अभिमंत्रणमाडि कुट्टि रसतेगेदु आ रसवन्नु होममाडि उळिदद्दन्नु, यज्ञमाननिंद सहितवागि ऋत्विजरु प्राशनमाडुवरु ई सोमदबळ्ळियु नम्म प्रांतदल्लि कप्पत्तगुड्डदल्लि शिगुवदु.) निन्नसंचारबिट्टु वत्तट्टिगे निल्लुव अवस्थिति एंबदरिंद प्रातःसवन, माध्यंदिनसवन, सायंसवन एंब ३ सवनगळु यज्ञद अंगगळु उत्पन्नवादवु–निन्न चर्ममांसमेदलाद सप्तधातुगळिंद सोम अतिरात्र अथवा अग्निष्टोममेदलाद सप्तसंस्थागळु=महाक्रतुगळु उत्पन्नवादवु. निन्न शरीरसंधिगळिंद सकलयज्ञगळू उत्पन्नवादवु. ई श्लोकदल्लि प्रथमांतवागिद्द एल्लपदगळन्नू ' एळूविभक्तिय अर्थवन्नु प्रथमाविभक्तियु हेळुवदु एंदु व्याकरणनियमविद्दरिंद सप्तम्यंतवागि इट्टुगोंडु अर्थमाडबेकु–हिंदिन श्लोकगळल्लि सप्तमीप्रयोगविद्दरिंद अदरंते तिळियतक्कदु. ई एल्ल यागगळू बहुजनऋत्विजरु शेरि बहुदिवसनडियतक्कवु. हेच्चु हेळुवदरिंदेनु फलवेंदु मुगिसुवरु–ऐकाहिक, व्याहिकमोदलाद सर्व यज्ञगळन्नु स्थापन माडतक्क इच्छावुळ्ळवनु नीनु निन्न सर्वदेहदल्लिये प्रतिपत्तुमोदलाद तिथिगळल्लि माडतक्क इष्टिविशेषगळु इरुववु. एंदु अर्थवु. ॥ ४० ॥

उक्तानुक्तविशेषणानि समुच्चीय विशिंषंति अखिलेत्यादिना सत्ताप्रदत्वेन मंत्रादिषु सन्निहितत्वादखिलमंत्रदेवताद्रव्याय सर्वे क्रतवः संकल्पा यस्माद्भवंति स सर्वक्रतुः तस्मै क्रियात्मने कर्मकारयितृत्वेन तद्व्याप्ताय आत्मजयात्मना तव प्रसादाज्जातया वैराग्यजृंभितभक्त्यानुभावितं स्वस्वयोग्यतानुसारेण समुत्पादितं स्वविषयं ज्ञानं येन स तथा तस्मै वेदादिपरविद्यागुरवे ॥ ४१ ॥

नमो नमस्तेऽखिलमंत्रदेवताद्रव्याय सर्वक्रतवे क्रियात्मने ॥ वैराग्यभक्त्यात्मजयानुभावितज्ञानाय विद्यागुरवे नमो नमः ॥ ४१ ॥

हिंदे हेळिद विशेषणगळन्नू हेळदिद्द विशेषणगळन्नू शेरिसि उळिदिद्दन्नु मुगिसुवरु– यावत्तू मंत्र तंत्रगळिगे इवने मुख्यनादकारण– अवुगळिंद नडेयुव सत्तावन्नु इवने कोडतक्कवनादकारण आयामंत्रगळ नामवुळ्ळवनु एल्ल यज्ञगळ संकल्पगळु यावन सलुवागि आगुववो अवनु एल्ल कर्मगळन्नु माडिसतक्कवनादकारण आ कर्मगळल्लि व्याप्तनागिरुवनु. मनोजयस्वरूपनाद निन्न (परमात्मन) प्रसाददिंद उत्पन्नवाद वैराग्यदिंद पुष्टवाद अवरवर भक्तियनुसारवागि स्वरूपविषयज्ञानवु यावनिंदागुवदो आ वेदमोदलाद परविद्ये दोरेयुवदक्कू गुरुवाद निनगे नमोनमः ॥ ४१ ॥

पूर्वमनाथत्वेन विलग्नामित्यनेन स्त्रीणां मध्यवत्कृशत्वं ध्वनितमधुना सनाथत्वेन पर्वताद्यवयवपुष्टा भूमिर्विराजत इति स्तुवंतीत्याह दंष्ट्राग्रकोट्येति । दता दंतेन मतंगजेंद्रस्य सपत्रपद्मिनी सपत्रा बिसिनी । " नलिन्यांतुबिसिनीपद्मिनीमुखा " इत्यमरः अनेन हरेर्धरणीधरेति नाम सार्थकमिति सूचितं ॥ ४२ ॥

१. अग्निष्टोमः उक्थः षोडशी वाजिपेयोतिरात्रो आप्तोर्याम इति सप्त संस्थाविभेदाः ॥–– (**या.**) २. असोमाः यज्ञाः ससोमाः क्रतवस्तेसर्वेपि त्वमित्यर्थः ॥–– (**या.**)

दंष्ट्राग्रकोट्या भगवंस्त्वया धृता विराजते भूधर भूः सभूधरा ॥ यथावनान्निःसरतो दता धृता मतंगजेंद्रस्य सपत्रपद्मिनी ॥ ४२ ॥

मोदलु अनाथत्ववु (संरक्षकरु इल्लदे) इरुवदरिंद भूमियु प्रलयजलदोळगे मुळिगिद्दळेंबुवदरिंद इवळिगे सुंदरस्त्रियर मध्यप्रदेश (टोंक) दंते कृशत्ववु (सोरगिद्दळेंदु) हेळल्पट्टित्तु ईगे ' सनाथत्वेन ' संरक्षणे माडुव महास्वामियु बरुवदरिंद पर्वतमोदलाद अवयवगळिंद पुष्टळाद भूदेवियु शोभिसुवळु एंदु स्तुतिसुवरेंदु हेळुत्तारे दंष्ट्राग्र एंब श्लोकदिंद एल्ले परमपूज्यनाद भूधरने ह्यागे ' वनात् जलात् ' सरोवरद्देशेयिंद होरगे बरुत्तिरुव मदोन्मत्त आनेय कारियिंद हिडियल्पट्ट पत्रगळिंदलू पुष्पगळिंदलू युक्तवाद कमलद बळ्ळेयु शोभिसुवदो हागे निन्न (श्रीवराहन) कारिहल्लिन तुदेयिंद धरिसल्पट्ट पर्वतसहितळाद भूदेवियु शोभिसुत्ताळे एंबदरिंद श्रीहरिगे धरणीधर एंब नामवु सार्थकवायितेंदु सूचिसुवदु ॥ ४२ ॥

इतरसंयोगेनेतरेषा विराजनं हरेस्त्वात्मनेवेतिभावेन स्तुवंतीत्याह त्रयीमयमिति । भूमंडलं धृतेन दता चकास्ति विराजते चकासृदीप्ताविति धातुःअदादिः शृंगेणोढेन घनेन विभ्रमः कांतिविशेषः ॥ ४३ ॥

त्रयीमयं रूपमिदं च सौकरं भूमंडलं नाथ दता धृतेन ते ॥ चकास्ति शृंगोढघनेन भूयसा कुलाचलेंद्रस्य यथैव विभ्रमः ॥४३॥

इतरपदार्थसंबंधदिंद (वस्त्रभूषणादिगळिंद) इतररिगे (देवतेमोदलादवरिगे) प्रकाशवागुवदु श्रीहरिगे स्वतःप्रकाशविरुवदेंब भावदिंद स्तुतिसुवरेंदु हेळुवरु एल्ले महास्वामिये ह्यागे दोड्डपर्वतक्के कोडगल्लिनिंद वाहिसिद मेघदिंद विशेषकांति बरुवदो हागे निन्न ई वेदप्रतिपाद्यवाद वराहरूपवु भूमंडलवन्नु धरिसिद दंतदिंद शोभिसुवदु. ॥४३॥

ब्रह्माद्यभीष्टं जानतोप्येनां किंकरोमीति हरेः प्रश्नात्प्रागेनं स्वाभीष्टं विज्ञापयंतीत्याह संस्थापयेति जगतां जंगमानां तस्थुषां स्थावराणां मातरं तव पत्नीमेनां संस्थापय जलस्योपरीतिशेषः कीदृशस्त्वं पितासि सर्वस्येतिशेषः यद्वा त्वं जगतां पितासि तस्थुषां मातरमेनामिति त्वत्कृतोपकारप्रत्युपकारमन्यमपश्यंतो वयमिमं नमस्कारं कुर्म इति विज्ञापयंतीत्याह विधेमेति उभयोर्मातृत्वं पितृत्वं च एतस्मादिति व्यंजयंतो विशिंषंतीत्याह यस्यामिति अनेन भूमेर्माहात्म्यंच सूचितं अरणिः अग्निमथनदारुविशेषः ॥ ४४ ॥

संस्थापयैनां जगतां सतस्थुषां लोकाय पत्नीमसि मातरं पिता ॥ विधेम यस्यै नमसा सह त्वया यस्यां स्वतेजोग्निमिवारणावधाः ४४

१. वनात् जलात् निःसरतो निर्गच्छतः मत्तगजेंद्रस्य दता दंतेन पत्रैः सहिता पद्मिनी सरसी ॥–(**या.**) २. यस्यां भूम्यां स्वतेजः स्ववीर्यं अरणौ अग्निमथनदारुविशेषे याज्ञिकाः मंत्रतो अग्निमिव अधाः निहितवानसि

ब्रह्मादिगळ अभीष्टेयन्नु श्रीहरियु बल्लवनादाग्यू, ई पृथ्वियन्नु एनुमाडलेंदु श्रीहरियु तम्मन्नु प्रश्नगाडदकिंत पूर्वदल्लिये तम्म अभीष्टेयन्नु विज्ञापनमाडिकोळ्ळुवरु—ई स्थावरजंगमात्मकवाद जगत्तिगे तायियाद, निन्न पत्नियाद ई भूदेवियन्नु नीरमेले स्थापनमाडबेकु नीनेंथवनेंदरे यल्लरिगू तंदियागिरुवि. अथवा जगत्तिगे नीनु तंदेयागिरुवि स्थावरप्राणिगळिगे तायियाद ई भूमियन्नु स्थापन माडु एंदर्थवु. याज्ञिकरु मंत्रगळिंद अरणीपात्रेयल्लि अग्नितेजःसन्नु ह्यागे स्थापनेमाडुवरो, अदरंते ई भूदेवियल्लि निन्न तेजःसन्नु स्थापनमाडिरुवि आदरे नीनु माडुव उपकारक्के प्रत्युपकारवन्नु काणदिद्द नावु नमस्कारवन्नु माडुववेंदु विज्ञापनमाडिकोळ्ळुवरु— हे वराहरूपियाद श्रीहरिये निन्निंद महितळाद भूदेविगे नमस्कारमाडुवेवु. ॥ ४४ ॥

त्वदन्येनेदं कर्म निरूपयितुमशक्यं किं पुनःकरणमिति विज्ञापयंतीत्याह क इति उद्बिबर्हणं उद्धरणं इदमस्माकमेवाश्चर्यं न तवेति श्रावयंतीत्याह नेति । इतोप्यधिकविस्मयोस्तीति विज्ञापयंतीत्याह यइति अतिविस्मयोतिशयितविस्मयः ॥ ४५ ॥

कः श्रद्दधीतान्यतमस्तव प्रभो रसांगताया भुव उद्बिबर्हणं ॥ न विस्मयोसौ त्वयि विश्वविस्मये यो मायया इदं ससृजेति विस्मयः॥४५॥

नीनुमाडिद ई कार्यगळु निन्नहोर्तु एरडनेदवरिगे वाणियिंद हेळुवदे अशक्यवागुवदंते कैयिंदमाडोणविन्नेल्लि एंदु विज्ञापनेमाडिकोळ्ळुवरु-'हे प्रभो' रसातलक्के होद ई भूमियन्नु मेलक्के तंद ई निन्न केलसवन्नु एरडनेदवनु यावनादरू, नानादरू ई केलसवन्नु माडेनेनेंदु मनिसिनिंदादरू निश्चयपट्टानेनु? यावनिंदलू आगदु आदरे आ महाकार्यवु नमगे आश्चर्यवे होर्तु निनगेनल्लवु नीनु सर्वाश्चर्य-स्वरूपनु निनाल्लि इन्नू हेच्चु आश्चर्यविरुवदेंदु विज्ञापनमाडुवरु यावनीनु इच्छामात्रदिंदले ई यावत्तु जगत्तन्नु सृष्टिमाडुवि अंदमेले अत्याश्चर्य स्वरूपनु. ॥ ४५ ॥

वाचा तव गुणगणानां संकीर्तनेन मनसा संस्मरणेन अंतःशुद्धा बहिस्तव सटाग्रसमुद्धूतशुद्धजलबिंदुभिः पाविता वयमिति विज्ञापयंतीत्याह विधुन्वतेति तृतीया षष्ठ्यर्थे विधुन्वतस्तव यद्वा विधुन्वता त्वया पाविताः तत्कथमित्यतो विशिंषंति सटेति त्वया पाविता इति यत्सटाग्रशिवांबुबिंदुभिरिति ॥ ४६ ॥

विधुन्वता वेदमयं निजं वपुर्जनस्तपःसत्यनिवासिनो वयं ॥ सटाशिखोद्धूतशिवांबुबिंदुभिर्विमृज्यमाना भृशमीशपाविताः॥ ४६॥

वाणियिंद निन्न गुणसमूहगळ वर्णनेमाडि, मत्तू मनसिनिंद अवुगळन्नु स्मरणेमाडि अंतःशुद्धियन्नु होंदिदेवु. होरगे ई निन्न 'सटा' (कुत्तिगे मेलिन कूदल) गळन्नलाडिसुवदरिंद आकूदलद तुदेयिंद उत्पन्नवाद शुद्ध जलबिंदुगळिंद नावु पवित्ररादेवेंदु विज्ञापनेमाडिकोळ्ळुवरु— 'हे ईश' सकलवेदप्रतिपाद्यवाद ई निन्न शरीरवन्नु, (नीरोळगिंदे मेलक्केबंदु) अगलाडिसुवाग्ये, जनोलोक, तपोलोक सत्यलोकगळल्लि वासमाडिद नावु निन्न (सटाः) कुत्तिगे मेलिन केशगळ अग्र (तुदे) गळिंद उद्भूतवाद पवित्रउदकबिंदुगळिंद प्रोक्षितरागि (सिपडिसिगोळ्ल्पट्टवरागि) अत्यंतपवित्ररादेवु. ॥ ४६ ॥

१. करिष्यामीत्यध्यवस्येत्. २. पवित्रीकृताः सर्वकर्मस्वधिकृताइति यावत् ॥— (**या.**)

वराहस्य गंडशिलाद्युपमत्वेन परिच्छिन्नत्वात्कर्मणोपि तथात्वान्नायं विष्णुरित्याशंक्य तथा मन्वानोभ्रष्टमतिरित्याह सवाइति यः पुरुषोऽपारकर्मणोऽनंतविक्रमस्य तव कर्मणां भूम्युद्धरणादिलक्षणानां पारमंतमेषते सम्यगिच्छति स भ्रष्टमतिर्वा इत्यनेन नरकपातं लक्षयति नोऽस्माकं तादृशज्ञानेन दुःखोदर्को लोको माभूत्किंतु सुखोदर्कएव स्यादिति प्रार्थयंत इत्याह त्वद्योगेति तव बंधकशक्त्या भ्रष्टमनस्कत्वेन विस्रंसतां गलिततत्वज्ञानानां नः शं सुखसाधनज्ञानसाध्यं लोकं विधेहीत्यन्वयः ॥ ४७ ॥

स वै बत भ्रष्टमतिस्तवेषते यः कर्मणां पारमपारकर्मणः ॥ त्वद्योगमायागुणयोगमोहतो विस्रंसतां नो भगवन्विधेहि शं ॥ ४७ ॥

ई वराहनिगे गंडशिलामोदलाद उपमागळन्नु कोट्टद्दरिंद इवन देहवु अळतियुळ्ळद्दायितेंदु अदरंते इवन कृतिगळादरू अळतेयुळ्ळवेंदु हीगे तिळिदवनु भ्रष्टबुद्धियुळ्ळवनेंदु हेळुवरु—यावपुरुषनु अनंतपराक्रमगळुळ्ळ नीनु माडिद भूमिय उद्धारवे मोदलाद कार्यगळन्नु एणिसि पारगाणबेकेंदु इच्छिसुवनो अवनु भ्रष्टबुद्धियुळ्ळवनु 'वा' एंबदरिंद अवनिगे नरकप्राप्तियुंटेंदु हेळुवदु. नमगे अंथ दुष्टज्ञानदिंद दुःखदायक लोकवागबारदु सुखदायकलोकवे आगबेकेंदु प्रार्थिसुवरु—निन्न बंधकशक्तियिंद नावु भ्रष्टमनस्सुळ्ळवराद्दरिंद तत्वज्ञानवेल्ल नम्मल्लि दृढवागिल्लद्दरिंद—आ ज्ञानवु दृढवागुवदक्के सुखक्के साधकवाद ज्ञानदिंद दोरेयतक्क लोकवन्नु 'हे भगवन्' नमगे कोडबेकु. ॥ ४७ ॥

भक्तवत्सलोहमितिभावयंस्तदुक्तं करोतिहरिरित्याह प्रत्युपस्थीयमानइति ॥ ४८ ॥ हरिस्ततः परं किंचकारेति तत्राह सइत्थमिति । प्रजापतिः प्रजापालनशीलः उन्नीतामुत्धृतां ॥ ४९ ॥

मैत्रेयउवाच प्रत्युपस्थीयमानस्तैर्मुनिभिर्ब्रह्मवादिभिः ॥ सलिले स्वखुराक्रांत उपाधत्तावितावनिं ॥ ४८ ॥ स इत्थं भगवानुर्वीं विष्वक्सेनः प्रजापतिः ॥ रसाया लीलयोन्नीतामप्सु न्यस्य ययौ हरिः ॥ ४९ ॥ ॥ ॥

मैत्रेयरु हेळुवरु— आ वेदपठणमाडतक्क मुनिगळिंद ईप्रकार प्रार्थ्यमाननागि, तानु भक्तवत्सलनेंदु अवरु हेळिद्दन्नु सत्यमाडुत्त भूमियन्नु पालनेमाडतक्क आ वराहनु तन्न खुरगळिंद शीळल्पट्ट नीरमेले भूमियन्नु इट्टनु. ॥ ४८ ॥ हरियु आमेले एनु माडिदनु एंदरे—ईप्रकारवागि सर्वत्रदल्लियू ज्ञानसैन्यवुळ्ळ, सकलप्रजरगळिगू मुख्यस्वामियाद आ वराहरूपियाद परमात्मनु रसातलदिंद मेलक्के तरल्पट्ट आ भूमियन्नु नीरमेले स्थापनेमाडि प्रयाणमाडिदनु. ॥ ४९ ॥

अस्य वराहस्य विक्रमस्य पुरुषार्थैकहेतुत्वादयं हरिरेवेति भावेन तच्छ्रवणादृष्ट्याह यइति हरिमेधसः संसारसंहारिबुद्धेः कथनीयमायिनः कथनयोग्यसामर्थ्यस्य

उशतीमभीष्टदोग्ध्रीं॥ ५० ॥ तत्प्रसादफलमाह तस्मिन्निति लवात्मभिः लवकालरूपाभिः पश्चान्नश्वरीभिस्ताभिः स्वर्गाद्याशीर्भिः प्रसादोपि गाथाश्रवणादिना नस्यादिति ध्वनयन्नाह अनन्यभक्त्येति ॥५१॥

य एवमेतांहरिमेधसो हरेः कथां सुभद्रां कथनीयमायिनः ॥ श्रण्वीत भक्त्या श्रवयेत वोशतीं जनार्दनोऽस्याशु हृदि प्रसीदति ॥ ५० ॥ तस्मिन्प्रसन्नेसकलाशिषां प्रभौ किंदुर्लभं ताभिरलं लवात्मभिः ॥ अनन्यभक्त्या भजतां गुहाशयः स्वयं विधत्ते स्वगतिं परः पुमान् ॥ ५१ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ई वराहन पराक्रमश्रवणवु मोक्षक्के मुख्यसाधनवादकारण इवनु श्रीहरिये एंब भावनादिंद इवन श्रवणादिगळ फलवन्नु हेळुवरु— ई प्रकार अग्नियंते प्रकाशवुळ्ळ मेधावियाद होगळलिक्के स्वारस्यवुळ्ळ सामर्थ्यवंतनाद श्रीहरिये महामंगळकरवाद ई वरहावतार (अथवा श्रीहरियल्लिये बुद्धियुळ्ळ ब्रह्मदेवन,) कथेयन्नु यावनु भक्तिपूर्वकवागि हेळुवनो? यावनु भक्तिपूर्वकवागि केळुवनो अवरिगे जनार्दननु तीव्रदिंद हृदयदल्लि (शांतियन्नुकोट्टु) अभीष्टदायकनागि प्रसन्ननागुवनु. ॥ ५० ॥ अवनु प्रसन्ननादद्दर फलवन्नु हेळुवरु— एल्ल अपेक्षितवन्नु कोडतक्क वरल्लि मुख्य प्रभुवाद आ श्रीहरियु प्रसन्ननाद मेले यावदु दुर्लभवु? बेकादद्दु दोरदातु, क्षणमात्र सुखकोट्टु मुंदे नाशहोंदतक्क स्वर्गादिफलगळिंदेनु प्रयोजनवु?— अवन प्रसादवादरू केवल कथा श्रवणादिगळिंद आगुवदिल्लिवेंदु प्रकटिसुत्त हेळुवरु— अवन महात्म्यज्ञानपूर्वक सुदृढस्नेहलक्षणवाद भक्तियिंद भजनमाडतक्कवरिगे अवरवर हृदयगुहादल्लि आवासमाडिद बिंबरूपियाद श्रीहरियु स्वरूपाविर्भावलक्षणवाद मोक्षवन्नु कोडुवनु. ॥ ५१ ॥

ननु कंचित्कालं हरिकथां निषेव्य पश्चान्मुच्यंतो दृश्यंते तत्र सारत्वं कथमित्याशंक्य ते पशुकल्पा इत्याह कोनामेति नामशब्दःकुत्सने कोनाम कः कुत्सितः पुराशब्दः पुराणे निकटातिते अनागते च वर्तते पुराणकथानां निकटातीतकथानां अनागतकथानांच मध्ये सारभूतां तामितिशेषः " प्रबंधे निकटातीते पुराणेनागतेपुरे- " तियादवः । सुपूजिते मोक्षे धत्ते सु सुखं धापयतीति वा सुधा डुधाञ्धारणपोषणयोर्धेट्पानइतिधातुः भवापहां संसारविनाशनीं भद्रावहां पपौ-शशाविति प्राच्याइतिसूत्रात्पकारस्य वकारः । " भवोभद्र " इति यादवः । नरेतरं पशुं ॥ ५२ ॥ इ० श्रीमद्भा०तृ० वि० टीकायां चतुर्दशोऽध्यायः ॥ १४ ॥

१. हरेर्मेधा धारणावती बुद्धिर्यस्मात्स तथोक्तस्तस्य हरेः हर्यवतारास्यवराहस्य ॥– (**या.**) २. सर्वेष्टानां प्रभौ दातरि किं दुर्लभं न किमपि सकलाअप्याशिषः सुलभाइत्यर्थः यद्यपि सुलभाः तथापि न प्रार्थनीया इत्याह । ' ताभिरिति ' आशीर्भिरलं ता न प्रार्थनीया इत्यर्थः ॥– (**या.**)

को नाम लोके पुरुषार्थसारवित्पुराकथानां भगवत्कथासुधां ॥ आपीय कर्णांजलिभिर्भवापहामहो विरज्येत विना नरेतरं ॥ ५२ ॥ इति श्रीमद्भागवते तृतीयस्कंधे चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ ॥ ॥

ओळ्ळेदु हरिकथेयन्नु स्वल्पकालवरेगे श्रवणमाडि आ मेले बिट्टु बिडुव एष्टोजनरु तोरुवरु– अंदमेले अदरल्लि सारत्ववु ह्यागे अंदरे आ हरिकथाकेळि पुनः बिडतक्क जनरु पशुप्रायरु एंदु हेळुवरु— याव मनुष्यनु एल्ल पुरुषार्थगळल्लि मोक्षवे श्रेष्ठवेंदु बल्लनो, एल्ल पुराणकथेगळल्लि श्रेष्ठवाद श्रीहरिकथा एंब अमृतवन्नु तम्म किविगळेंब बो (भो) गसिगळिंद आनंदवागुव वरेगू प्राशनेमाडि आ मेले संसारदुःखवन्नु नाशमाडतक्क आ हरिकथेयु सार्केंदु ई जगदोळगे यावनु बिट्टानु? अहहा! मनुष्यर होर्तु पशुगळु बिट्टरू बिट्टावु यारु बिडुवरो अवरु द्विपादपशुगळे सरि; ' कोनाम ' एंबल्लिय नामशब्दवु कुत्सितार्थवन्नु हेळुवदु. ' पुराकथानां ' एंबल्लिय पुराशब्दवु पुराणदल्लियू स्वल्पदिवसहिंदे आद कथेयल्लियू मुंदे आगुव कथेयल्लियू प्रयोगिसल्पडुवदु एंबदक्के कोशोक्तियुंटु– ' भगवत्कथासुधां ' सुधा= सु अंदरे अत्यंतपूजितवाद मोक्षदल्लि सुखवन्नु धा= धत्ते तंदुकोडुवदादकारण सुधा एन्नुवरु— भवापहां एंदरे संसारनाशमाडतक्कदेंदु ओंदर्थवु मत्तू भव एंब शब्दवु भद्रवाचकवेंदु यादव कोशोक्तियिंद भवशब्दक्के बदलु भद्रशब्दवु अपहां एंबदक्के बदलागि व्याकरण सूत्रानुसारवागि आवहा एंबदु वट्टिगे ' भद्रावहां ' एंदरे मोक्षवन्नु कोडतक्कदेंदर्थवु. ॥ ५२ ॥ ' सुखार्थबोधिनी ' एंब प्राकृतटिप्पणेय तृ. १४ ने अध्यायवु कू. श्री. र. समाप्तवु. ॥ श्रीकृष्णार्पण ॥

रुद्रादीनां हयोज्ञाकारित्वेन तद्वशान्निरुपमचरितस्वातंत्र्यगुणाकरे हरौ मनोरतिः कर्तव्या पुरुषेणेति विधीयतेऽस्मिन्नध्याये ॥ तत्रादौ विदुरः पुनर्मुनिना वर्णितं वराहचरितमाकर्ण्य हरिकथायामलंबुद्धिरहितो विशेषतः श्रोतुकामो मैत्रेयं पृच्छतीति शुकः परीक्षितं कथयति निशम्येति समुद्यतांजलिर्हरिमुद्दिश्येतिशेषः कुतएवमवगतमित्यत उक्तं नचेति । अनेन हरिकथाश्रवणतृष्णातिशयं ध्वनयति ततो हरिप्रसादेन हरिकथाश्रवणं स्यादिति शिरसि मुकुलितकरकमल इत्यर्थः कथाश्रवणविघ्नपरिहाराय धृतव्रतइति ॥ १ ॥

श्रीशुकउवाच ॥ निशम्य कौषारविणोपवर्णितां हरेः कथां कारणसूकरात्मनः ॥ पुनः स पप्रच्छ समुद्यतांजलिर्नचातितृप्तो विदुरो धृतव्रतः ॥ १ ॥ ॥ ॥ ॥ ॥ ॥ ॥

सं० १९-२ १४५

१. स्वस्यादरप्रदर्शनाय ॥– (**या.**)

रुद्रने मोदलाद देवतिगळु श्रीहरिय अप्पणेयंमेरेगे नडेयतक्कवरादकारण अवरु अस्वतंत्ररु. एनू उपचारविल्लदे मुख्यवागि स्वातंत्र्यमोदलाद सद्गुणगळिगे मूलस्थानापन्ननाद श्रीहरियल्लिये पुरुषनु मनःसिद्धनेंदु ई अभ्यायदल्लि शासनमाडल्पट्टवदु. आ मोदलु विदुरनु मत्ते मैत्रेयमुनिगळिंद वर्णनमाडल्पट्ट श्रीवराहचरित्रेयन्नु केळि, श्रीहरिकथेयल्लि अलंबुद्धिइल्लदे इन्नू विशेषवागि केळबेकेंब कुतूहलदिंद मैत्रेयरन्नु प्रश्नेमाडुवनेंदु श्रीशुकाचार्यरु परीक्षितराजनिगे हेळुवरु— मैत्रेयमुनिगळिंद वर्णनमाडल्पट्ट, भूउद्धरणार्थवागि वराहरूपवन्नु धरिसिद श्रीहरिय कथेयन्नु विदुरनु श्रवणमाडि; अदरिंद विशेषतृप्तनागदे आ श्रीहरिय उद्दिश्यवागि, अवन कृपाकटाक्षदिंदले विशेषवागि अवन कथाश्रवणवादीतेंब बुद्धियिंद तन्न एरडू कैयत्ति तलेयमेले कमलद अरळमोग्गेय आकारवारागि हिडिदुकोंडु श्रीहरिकथाश्रवणक्के विघ्नवरवारदेंदु ब्रह्मचर्यमोदलाद व्रतगळन्नु धरिसि, आ मैत्रेयरन्नु पुनः प्रश्नमाडिदनु. इदरिंद विदुरनिगे हरिकथा श्रवणविषयदल्लि आशा बहळे इर्त्तेंदु प्रकटवागुवदु. ॥ १ ॥

पूर्वं लयोदके स्वयमेव मग्नां पृथिवीमुद्धरतः आदिदैत्यं हिरण्याक्षं च मारयतः श्रीवराहचरितं श्रुत्वा पुनः कश्यपाददित्यामुत्पन्नस्य पार्षदाविष्टस्य हिरण्याक्षदैत्यस्य हंतुस्तस्यैव श्रीवराहकथां श्रोतुकामो विदुरो मैत्रेयं पृच्छति उक्तकथांश वक्तव्यं नास्तीतिद्योतयितुं श्रुतं सामान्यतो अनुवदति विदुर इत्याह तेनेति। येन लयोदके मग्ना भूरुदहारि तेनैव रूपांतरेण ॥ २ ॥ तत्र श्रोतव्यांशं पृच्छति तस्येति रणोत्पत्तौ महतापराधेन भवितव्यं तादृशोपराधः क इति प्रश्नार्थः ॥ ३ ॥

विदुरउवाच ॥ तेनैव च मुनिश्रेष्ठ हरिणा यज्ञमूर्तिना ॥ आदिदैत्यो हिरण्याक्षो हत इत्यनुश्रुश्रुम ॥ २ ॥ तस्य चोद्धरतः क्षोणीं स्वदंष्ट्राग्रेण लीलया ॥ दैत्यराजस्य च ब्रह्मन् कस्माद्धेतोरभून्मृधः ॥ ३ ॥ ॥ ॥ ॥

(प्रळयोदकदल्लि मुळुगिद भूमियन्नु मेलक्के एत्तिद यज्ञद साहित्यगळन्नेल्ल हुट्टिसिद मूर्तियन्नु धरिसिद याव वराहरूपियाद श्रीहरियिंद ब्रह्मदेवनिंद उत्पन्ननाद हिरण्याक्षनु हतनादनो अदे वराहदेवरिंदले, वैकुंठद्वारपालकनाद विजयनेंबवनल्लि अदे हिरण्याक्षनु प्रविष्टनागि पुनः हतनादनेंदु ग्रंथांतरदल्लि ज्ञानिगळ मुखदिंद केळुवेवु अदन्नु तावु विस्तरवागि हेळबेकेंदु विदुरनु प्रश्नमाडुवनेंदु हेळुवरु— या.) पूर्वदल्लि प्रळयोदकदल्लि तानागि मुळुगिद भूमियन्नु एत्तुवाग्गे आदिदैत्यनाद हिरण्याक्षनन्नु कोंद श्रीवराहचरित्रेयन्नु केळि; पुनः कश्यपरिंद अदितियल्लि उत्पन्ननाद परमात्मन द्वारपालकनल्लि प्रविष्टनाद हिरण्याक्षदैत्यनन्नु कोंद अदे श्रीवराहदेवन कथेयन्नु केळबेकेंदु विदुरनु मैत्रेयरन्नु प्रश्नमाडुवनु— मत्तू हिंदेहेळिद कथांशदल्लि हेळतक्कदेनू उळिदिल्लवेंदु तिळिसुवदक्के हिंदेकोळिद संगति साधारणवागि अनुवाद माडुवनु— हे मुनिश्रेष्ठराद मैत्रेयरे—यज्ञसाहित्यगळन्नु तन्न देहदिंद हुट्टिसिद पूर्वदल्लि प्रलयोदकदल्लि मग्नळाद भूमियन्नु मेलक्के एत्तिद याव वराहरूपियाद हरियिंद ब्रह्मदेवनिंद उत्पन्ननाद आदिहिरण्याक्षनु हतनादनो; ' तेनैव हरिणा ' अदे वराहनिंदले कश्यपर पुत्रनाद हिरण्याक्षनु हतनादनेंदु अन्यऋषिगळ मुखदिंद

१. येन लयोदके मग्नां भुवमुद्धरता यज्ञांगजनकमूर्तिना हरिणा वराहरूपेण ब्रह्मणो हिरण्याक्षो हतः। तेनैव हरिणा आदिदैत्यो हिरण्याक्षः सएव कश्यपजपार्षदविजयदेहाविष्टःपुनर्हत इत्यनुशुश्रुमः ग्रंथांतरे ज्ञानिमुखात्। तद्विस्तरतो वर्णयेत्याशयेन पृछति ॥– (**या.**)

केळुवेवु, आदरे ईग्ये केळतक्क भागवनेंदरे— आ वराहनु तन्न दंष्ट्राद तुदियिंद क्रिडेयिंद भूमियन्नु यत्तुत्तिरलु. कश्यपर पुत्रनाद पार्षदाविष्टनाद हिरण्याक्षनेंब दैत्यश्रेष्ठनिगू ई वराहनिगू एनु कारण रणरंगप्रसंगवोदिगितु हे ब्रह्मज्ञानिगळाद मैत्रेयरे ई विषयवन्नु हेळबेकु. ॥ २ ॥ ३ ॥

मैत्रेयो विदुरप्रश्नं स्तौतीत्याह साध्विति। साधु सत्सभासूचितं वेर्हरेरिच्छायां रमतइति वीरः पुरुषार्थोपयोगित्वात्साधुत्वमस्येत्याह यत्त्वमिति ॥ ४ ॥ न केवलं संसारलक्षणमृत्युपाशविशातनी विच्छेदनी हरिकथात्वैहिकामुष्मिकसिद्धिकरीति निदर्शयति ययेति मुनिना नारदेनार्भकः पंचवर्षः अस्याः प्रपंचश्चतुर्थे वक्ष्यते ॥ ५ ॥

मैत्रेयउवाच ॥ साधु वीर त्वया पृष्टमवतारकथां हरेः ॥ यत्त्वं पृच्छसि मर्त्यानां मृत्युपाशविशातनीं ॥ ४ ॥ ययोत्तानपदः पुत्रो मुनिना गीतयार्भकः ॥ मृत्योः कृत्वेह मूर्ध्न्यंघ्रिमारुरोह हरेः पदं ॥५॥ ॥ ॥ ॥

मैत्रेयरु विदुरन प्रश्नेयन्नु श्लाघनेमाडुवरेंदु हेळुवरु— ' हे वीर ' (विदुरनु यावरणरंगक्कू होगि युद्धमाडिल्लवाद्दरिंद इवनिगे वीरनेंब संबोधनवु ह्यागे संभविसुवदेंदरे हेळुवरु) विःपक्षिपरम त्मनो एंब कोश विस्तवदरिंद 'वेः' श्रीहरिय इ-इच्छेयिंदले सर्ववू नडेयुवदेंदु तिळिदुर-रमणमाडतक्क विदुरने श्रीहरिकथेयविषयवागि नीनु प्रश्नमाडिदु सज्जनरसभेयाल्लि श्लाघनीयवाद संगतियु मोक्षवेंब पुरुषार्थक्के उपयुक्तवाद्दरिंद इदे बहळ साधु एनिसुवदु. मत्तू नीनु यावविषयक्के प्रश्नेमाडिदियो इदु (अंदरे ई विषयश्रवणदिंद) मनुष्यरिगे मृत्युपाशवन्ने कडियतक्कदु. ॥ ४ ॥ ई, हरिकथेयु केवल संसारवेंब मृत्युपाशवन्नु मात्र छेदनमाडतक्कदेंदल्लवु इहलोकपरलोकगळ मिद्धियन्नुमह कोडतक्कदेंबदक्के दृष्टांतवन्नु हेळुवरु— हिंदक्के उत्तानपादराजन पुत्रनाद ध्रुवराजनु ऐदुवरुषद बालकनिद्दाग्ये याव श्रीहरिय कथेयन्नु नारदमुनिगळ मुखदिंद श्रवणमाडुवदरिंद मृत्युविन तलेय्यमेले कालिट्टु श्रीहरिमंदिरवन्नारोहणमाडिदनु ई कथेयन्नु चतुर्थस्कंदाल्लि विस्तरिसुवरु. ॥५॥

श्रोतॄणां श्रद्धातिशयजननार्थं विदुरप्रश्नपरिहारत्वेन पुरावृत्तं कथयति अथेति अथशब्देन पूर्वत्र ब्रह्मपुत्रो हिरण्याक्षो वराहहरिणा हतो नतु दितिपुत्रः सएव पार्षदाविष्टो निहन्यत इति कथाविशेष आरभ्यत इति सूचयति वधस्यैककर्तृत्वादुष्टजनमोहनार्थत्वाच्च एवं कथनं संभावितमित्यपिपदेन वक्ति श्रुतो वक्ष्यत इतिशेषः ॥ ६ ॥ कोयमितितत्राह दितिरिति दाक्षायणी दक्षस्य पुत्री नाम्ना दितिः मारीचं मरीचेः पुत्रं रामवैरिमारीचव्यावृत्यर्थं कश्यपामिति हृच्छयः कामः ॥ ७ ॥ मारीचं विशिनष्टि इष्ट्वेति अग्निरेव जिव्हा यस्य स तथा तं यजुषां पतिं यजुर्वेदगतमंत्राणां विषयत्वेन स्वामिनं निम्लोचति अस्तं गच्छति अग्न्यागारे अग्निगृहे ॥ ८ ॥

१. मृत्युं जित्वेति यावत् ॥– (**या.**)

अथात्रापीतिहासोयं श्रुतो मे वर्णितः पुरा ॥ ब्रह्मणा देवदेवेन देवानामनुपृच्छतां ॥ ६ ॥ दितिर्दाक्षायणी क्षत्तर्मारीचं कश्यपं पतिं ॥ अपत्यकामा चकमे संध्यायां हृच्छयार्दिता ॥ ७ ॥ इष्ट्वाग्निजिह्वं पयसा पुरुषं यजुषां पतिं ॥ निम्लोचत्यर्क आसीनमग्न्यागारे समाहितं ॥ ८ ॥ ॥ ॥ ॥ ॥ ॥

केळतक्क जनगळिगे अतिशय विश्वास हुट्टुवदक्कागि विदुरन प्रश्नेगे उत्तरवन्नु हेळुत्त हिंदे नडेद संगतियन्नु हेळुवरु– इल्लिय ' अथ ' शब्ददिंद पूर्वदल्लि ब्रह्मपुत्रनाद हिरण्याक्षनु वराहहरियिंद हतनादनु अवनु दितिपुत्रनाद हिरण्याक्षनल्लवु अदे हिरण्याक्षने परमात्मन द्वारपालकनल्लि प्रविष्टनागि दितिय पुत्रनागि उत्पन्ननागि अदे वराहनिंद हतनाद कथेयु इन्नुमुंदे आरंभवागुवदेंदु सूचितवागुवदु. हेविदुरने निन्न प्रश्नपरिहारविषयदल्लि ओंदु इतिहास उंटु देवश्रेष्ठनाद ब्रह्मदेवनु हिंदक्के देवतिगळु प्रश्नेमाडिदाग्गे अवरिगे हेळिद्दन्नु नानु केळिस्लेनु अदन्ने निनग हेळुवेनु केळु. (ओळ्ळेदु ई हिरण्याक्षन विषयवागि याके संशय बरुवदेंदरे) इव्वरू दैत्यरू हिरण्याक्ष एंब ओंद हेमरुळ्ळवरु इव्वर वधेयन्नू ओव्वने माडिस्लवनु आदकारण दुष्टजनरिगे हिरण्याक्षनोव्वने एंदु मोहपडुवदक्के संभवविद्देंदु ई श्लोकदल्लिय ' अपि ' एंब पदवु हेळुवदु. ॥ ६ ॥ आ इतिहासवु यावदेंदरे हेळुवरु— ' हे क्षत्तः ' एले विदुरने, ओंदानोंदु दिवसदल्लि दक्षप्रजेश्वरन पुत्रियाद दिति एंबवळु तन्न पतियाद मरीचिऋषिय पुत्रनाद कश्यपऋषियन्नु पुत्रापेक्षेयिंद कामबाणपीडितळागि संध्याकालदल्लि अपेक्षिसिदळु इल्लि ' मारीचं ' एंब पददिंद प्रसिद्धनाद रामवैरियाद मारीचराक्षसनेंदु भासवागुवदु अदक्के कश्यप एंब पदप्रयोगवु. ॥ ७ ॥ आ दितिदेवियु कश्यपरन्नु अपेक्षिसिदाग्गे अवरु एनुमाडुत्तिद्दरेंबदन्नु हेळुवरु– अग्निये जिह्वेयागियुळ्ळ सकलयजुर्वेदमंत्रगळिगे मुख्यविषयनाद यज्ञपुरुषनन्नु गोक्षीरदिंद होममाडि (तृप्तिपडिसि) सूर्यनु अस्तंगतनागुत्तिरलु अग्निहोत्रशालेयल्लि कुळितिद्द पतियन्नु कुरितु दितियु बंदळु. ॥ ८ ॥

मनसैव चकमे नतु वाक्पूर्वकमिति तत्राह एषइति त्वत्कृते त्वामुद्दिश्य रंभां कदलीं ॥ ९ ॥ न केवलं विषयभोगेच्छुरहं त्वां याचे किंतु प्रयोजनांतरेच्छयापीत्याह तद्भवानिति प्रजावतीनां पुत्रवतीनां मयि अयुंक्तामिति पदच्छेदः संभ्रमादिकारशिरा अकारो न लुप्तः ॥ १० ॥ अस्मदनुग्रहात्किं तव प्रयोजनमिति तत्राह भर्तरीति सप्तमी पंचम्यर्थे भर्तुरग्नेरुमानानामित्यर्थः मानमपि पुत्रावाप्तिलक्षणमित्याशयेनाह पतिरिति ॥ ११ ॥

दितिरुवाच ॥ एष मां त्वत्कृते विद्वन् काम आत्तशरासनः ॥ दुनोति दीनां विक्रम्य रंभामिव मतंगजः ॥ ९ ॥ तद्भवान्दह्यमानायां सपत्नीनां समृद्धिभिः ॥ प्रजावतीनां भद्रं ते मय्यायुंक्तामनुग्रहं ॥ १० ॥ भर्तर्याग्नेरुमानानां लोकानाविशते यशः ॥ पतिर्भवद्विधो यासां प्रजया ननु जायते ॥ ११ ॥ ॥ ॥ ॥ ॥

१. पूर्णषड्गुणं विष्णुं ॥– (**या.**) २. यजुर्वेदप्रतिपाद्ययज्ञाराध्यं ॥– (**या.**) ३. स्त्रीणामितिशेषः ॥– (**या.**) ४. पुत्ररूपेण यज्ञाया जायाभवति यदस्यां जायते पुनरितिश्रुतेरितिभावः ॥– (**या.**)

आ दितिदेवियु पतियन्नु मनस्सिनिंदे अपेक्षिसिदळेहोर्तु आ संबंधवागि बायिंयिंदेनुमाताडलिल्लवो एंदरे हेळुवरु–दितियु अंदद्दु ' भो विद्वन् ' स्त्रीयर मुखलक्षणदिंद मनोगत अभिप्रायवन्नु बहुवराद ऋषिश्रेष्ठरे मदोन्मत्तवाद आनेयु बाळियगिडवन्नु किर्त्तिईडाडुवंते ई मन्मथनु धनुष्यदल्लि बाणसंधानमाडिकोंडु–नन्नमेले ईडाडुत्त तम्ममलुवागि ई दीनळाद नन्नन्नु पीडिसुवनु. ॥९॥ केवल विषयभोगेच्छेयिंदले तम्मन्नु याचिसुवेनेंदल्लवु मत्तोंदु मुख्यप्रयोजनेच्छेयिंदलू एंदु हेळिकोळ्ळुवळु– स्वामी तमगे क्षेमविरलि नन्न सपत्नियरु (सवतेयरु) एल्लरू सकल संपन्नरागिरुवरु एल्लरु मक्कळोंदेगरागिरुवरु. ननगे मक्कळिल्लदरिंद अवर समृद्धियन्नुनोडि संतप्तळाद नन्नल्लि परमानुग्रह माडबेकु. 'मय्यायुंक्तां' एंबल्लि मयि=अयुंक्तां=मय्ययुंक्तां हींगे पदच्छेद आगतक्कदु; आदरे आदितिय संभ्रमदिंद इकारशिर अकारवु लोपवागिल्लवु. ॥१०॥ नम्म (कश्यपर) अनुग्रहदिंद निनगेनु प्रयोजनवेंदरे हेळुवळु—याव स्त्रीयरु तम्म पतियिंद (पुत्रोत्पत्तिएंब) बहुमानवन्नु पडेदिरुवरो अवर कीर्तियु लोकदल्लि तुंबुवदु. पतियिंद संपादिसतक्क बहुमानवादरू यावदेंदरे पुत्रोत्पतिएंबदे बहुमानवेंब अभिप्रायदिंद हेळुवळु— याव स्त्रीयरिंगे तम्मंथ महनीयरु पतिगळागिद्द मेले आ पुत्रोत्पत्तिएंबदु आगे आगुवदु. इदक्के संदेहवे इल्लवु. ॥ ११ ॥

श्रुतगुणत्वेन स्नेहोदर्कया मया भवान्वृत इत्यतोपि मदनुग्रहः कार्यइत्याशयेनाह पुरेति ॥ १२ ॥ भावं हृद्गताभिप्रायं अददाददात् ॥ १३ ॥ उपसंहरति अथेति अथ तस्मात् भवतो महत्तमत्वान्ममभवच्छरणगमनं सफलं स्यात् तथादृष्टत्वादितिभावेनाह आप्तेति महीयसि पुरुषे आप्तत्वेनोपसर्पणं शरणगमनं ॥ १४ ॥

पुरा पिता नो भगवान् दक्षो दुहितृवत्सलः ॥ कं वृणीत वरं वत्सा इत्यपृच्छत नः पृथक् ॥१२॥ सविदित्वात्मजानां नो भावं संतानभावनः ॥ त्रयोदशाददात्तासां यास्ते शीलमनुव्रताः ॥ १३ ॥ अथ मे कुरु कल्याण कामं कंजविलोचन ॥ आप्तोपसर्पणं भूमन्नमोघं हि महीयसि ॥ १४ ॥ ॥ ॥ ॥ ॥

तम्म गुणगळन्नु केळि तम्मल्लि केवल स्नेहविशेषदिंद नानु तम्मन्नु लग्नमाडिकोंडिरुवेनु. ई कारणदिंदादरू नन्नमेले अनुग्रहमाडबेकेंदु होळिकोळ्ळुवळु— हिंदक्के नावेल्लरू अक्कतंगेंदिरु कन्यावस्थेयल्लिद्दाग्गे हेण्णुमक्कळमेले बहुममतेयुळ्ळ नम्म तंदेयाद दक्षप्रजेश्वरनु, हे मक्कळुगळिरा नीवु याव वरवन्नु लग्नमाडिकोळ्ळुवदक्के अपेक्षिसुविरि एंदु नम्येल्लरन्नू प्रत्येकवागि ओव्वब्बरन्ने केळिदनु. ॥ १२ ॥ तन्न एल्लहेण्णुमक्कळिंदले संतानवु अभिवृद्धियागबेकेंब इच्छेयुळ्ळ नम्म तंदेयु आगे– नम्मेल्लर मनोभाववन्नु तिळिदु ईगेय यारु तम्म (कश्यपर) मनोभिप्रायानुसारवागि सेवेयन्नु माडुत्तिरुवरो आ हदिमूरुजनस्त्रीयरन्नु तमगे अर्पणेमाडिदनु ॥ १३ ॥ आ कारण हे मंगळस्वरूपराद कमलदंते विशालनेत्रवुळ्ळ ऋषिश्रेष्ठरे नन्न मनोरथवन्नु पूर्णमाडबेकु– तावु केवल श्रेष्ठरादकारण नानु तमगे शरणागतळादद्दु सफलवागबेकु हींगे लोकदल्लि कंडदे एंदु हेळुवळु— महनीयराद पुरुषरल्लि ई दोड्डवरिंद ईकार्यवादीतेंदु तुंबा नंबिकोंडु शरणागतरादद्दु एंदिगू व्यर्थवागुवदिल्ल. अदु निश्चयवे. ॥ १४ ॥

एवं प्रार्थयमानामेनामगणय्यमारीचः किं तूष्णीमभूद्यत्किंचिदुत्तरमवददुतेति संशयो माभूदिति भावेनाह इतीति ॥ १५ ॥ यतः यस्याः भार्यायाः त्रैवर्गिकी त्रयाणां धर्मार्थकामानां संबंधिनी सिद्धिः ॥ १६ ॥

इति तां वीर मारीचः कृपणा बहुभाषिणीं ॥ प्रत्याहानुनयन्वाचा प्रवृद्धानंगकश्मलां ॥ १५ ॥ एषतेऽहं विधास्यामि प्रियं भीरु यदिच्छसि ॥ तस्याः कामं न कः कुर्यात्सिद्धिस्त्रैवर्गिकी यतः ॥ १६ ॥ ॥ ॥

ई प्रकार प्रार्थने माडतक्क आ दितिदेवियन्नु गणनेमाडदे कश्यपरु सुम्मनिद्दरो अथवा एनादरू उत्तरवन्नु हेळिद्दरो; एंदु संशयवेडेंब अभिप्रायदिंद हेळुवरु— एलै वीरनाद विदुरने ईप्रकार कार्पण्यदिंद बहुभाषणमाडतक्क, मन्मथबाणाभिवृद्धियिंद कश्मलवाद मनःसुळ्ळ आ, दितियन्नु मातुगळिद अनुसरिसुत्त कश्यपरु उत्तरकोडलारंभिसिदरु. ॥ १५ ॥ ' हे भीरु ' मर्यादिगे अंजिकोंडु मेल्ने माताडतक्क दितिये नीनु याव प्रीतिविषयवादद्दन्नु अपेक्षिसुवियो अदन्नेल्ल ई नानु (कश्यपनु) पूरयिसि कोडुवेनु. याव हेंडतियिंद धर्मार्थकामगळ संबंधवाद सिद्धियु दोरेयुवदो, अंथ हेंडतिय मनोरथवन्नु याव सत्पुरुषनु पूरयिसलिक्किल्ल ॥१६॥

एतदेव विशदयति सर्वाश्रमानिति कलत्रवान् प्रशस्तभार्यायुक्तः स्वाश्रमेण गार्हस्थ्याश्रमेणान्नदानादिना ब्रह्मचर्यादिसर्वाश्रमानुपादाय संभाव्य संसाराख्यव्यसनसमुद्रमत्येतीत्यन्वयः ॥ १७ ॥ " अर्धो वा एष आत्मनोयत्पत्नी " इतिहि श्रुतिः एतस्या व्याख्यानरूपोयं श्लोकः । यामाहुरिति । श्रुतौ आत्मशब्दविशेषणं श्रेयस्कामपदं तथा पत्नी भर्तृकृतपुण्यस्यार्धभागिनी इति श्रुत्यर्थो अनेन श्लोकेन स्पष्टीकृतः स्वधुरं स्वव्यापारभारमध्यस्य निक्षिप्य ॥ १८ ॥ इतोपि त्वं संभाव्येत्याह यामिति । इंद्रियाण्येवारातयः शत्रवः इंद्रियारातयस्तान् इंद्रियाणामरातयो विषयास्तानितिवा एवंचेद्दृष्टांतोपि संगच्छते उभयेषामपि बाह्यत्वात् पूर्वत्र संभावनामात्रतयोक्तं ॥ १९ ॥

सर्वाश्रमानुपादाय स्वाश्रमेण कलत्रवान् ॥ व्यसनार्णवमत्येति जलयानैर्यथार्णवं ॥ १७ ॥ यामाहुरात्मनोह्यर्धं श्रेयस्कामस्यभामिनि ॥ यस्यां स्वधुरमध्यस्य पुमांश्चरति विज्वरः ॥ १८ ॥ यामाश्रित्येंद्रियारातीन्दुर्जयानितराश्रमैः ॥ वयं जयेम हेलाभिर्दस्यून् दुर्गपतिर्यथा ॥ १९ ॥ ॥ ॥ ॥ ॥ ॥ ॥

हिंदे हेळिद्दन्ने विस्तरिसुवरु— योग्यळाद हेंडतियिंद युक्तनाद गृहस्थाश्रमियु, ब्रह्मचर्यमोदलाद मिक्कादयावत्तू आश्रम धर्मगळन्नु तन्न गृहस्थाश्रमदल्लिये अतिथिगळिगे अन्नदानमोदलादवु

१. सुंदरीरमणीरामा कोपना सैवभामिनीत्यभिधानात् कोपयुक्ता सुंदरीत्यर्थः ॥– (**या.**) २. हेलाभिः लीलाभिः जयेम सभार्यस्येंद्रियाणि प्रायेण इतस्ततो न गच्छंतीतिभावः ॥–(**या.**)

गळिंद नडिसुत्त, नीरिनल्लि तीव्रवेगदिंद् होगतक्क हडगमोदलादवुगळिद समुद्रवन्नु ह्यागे लक्ष्यविल्लदले दाटुवरो अदरंते (योग्यळाद हेंडतियिंद) व्यसनगळ समुद्रवाद ई संसारवन्नु दाटुवनु. ॥१७॥ ' पुरुषनिगे ई हेंडतियु अर्धभागवेनिसुवळु ' एंब श्रुतिय व्याख्यानरूपवागि ई श्लोकविरुवदु– एंदु हेळुवरु--- श्रुतियल्लि हेळिद ' आत्म ' पदक्के ई श्लोकदल्लिद्द ' श्रेयस्कामस्य ' एंब पदवु विशेषणवागिरुवदु वट्टु ' श्रेयस्कामस्यात्मनः ' संसारदिंद श्रेयःसु अपेक्षेमाडतक्क पुरुषनु यावनो आ गृहस्थ– वानप्रस्थ-- आश्रमदल्लिद्द पुरुषनिगे पत्नियु अर्धभागवेनिसुवळु, ब्रह्मचारि सन्यासिगळिगे ईमातल्ल एंदु हेळिदंतायितु. मत्तू ' पतियु माडिद पुण्यदल्लि अर्धभागपुण्यक्के पत्नियु पात्रळु ' एंब ई श्रुत्यर्थवु ई श्लोकदल्लि हेळल्पट्टितु. ' हे मानिनि ' सन्मानक्के अर्हळादवळे, अथवा ' भामिनी ' एंतलू पाठवुंटु. ' सुंदरी रमणीरामा कोपना सैव भामिनी ' हे कोपयुक्तळाद सुंदरि, श्रेयोपेक्षियाद गृहस्थाश्रमियाद पुरुषनिगे हेंडतीएंबवळु तन्न शरीरद अर्धभागवेनिसुवळु, ई संगतियु मेलेहेळिद श्रुतिप्रसिद्धवादद्देंदु ' हि ' एंबदु हेळुवदु. यार्केंदरे याव योग्यळाद हेंडतियल्लि प्रपंचव्यापारद भारवन्नल्ल इद्दु ई पुरुषनु यावदू योचनेइल्लदे संचरिसुवनु. ॥ १८ ॥ नीनु सन्मानक्के अर्हळेंदु इन्नादरू हेळुवरु— याव हेंडतियन्नु आश्रय माडुवदरिंद ब्रह्मचर्यमोदलाद एरडने आश्रमगळिंद जयिसलिक्के अशक्यवाद इंद्रियगळेंब शत्रुगळन्नु अथवा इंद्रियगळिगे शत्रुवाद विषयगळन्नु; भद्रवाद कोटि (किल्ले) यल्लि आश्रयमाडिकोंडिद्दवनु कळ्ळरन्नु ह्यागे अनायासवागि जयिसुवनो, अदरंते नावु अनायासदिंद जयिसुवेवु. (स्वभार्या भोगदिंदले इंद्रियगळु तृप्तियागुत्तिरलु अन्यस्त्रीयल्लि प्रायः इंद्रियगळ प्रवृत्तिये आगुवदिल्लवु आदरिंद इंद्रियजयक्के, चोरजयक्क कोटियंते भार्यळेंब दृष्टांतवु.. चोररु कोटियन्नु दाटिदनंतर, राजनन्नु बाधिसबेकष्टे, आ प्रकार इंद्रियगळु स्वभार्याभोगवन्नु तीरिसिगोंडु नंतर इवनन्नु बाधिसबेकष्टे अदे असंभववु एंदु अभिप्रायवु–) ॥ १९ ॥

वक्ष्यमाणस्ववाक्यार्थं कारयितुं मुनिः स्तुतिं करोति न वयमिति । भवंतो न प्रभवश्चेदन्यो भवादृशो नेति तत्राह येचेति येन्येच गुणगृध्नवः गुणलुब्धाः पुरुषास्तेपि भार्यामनुकर्तुं न प्रभव इत्यर्थः ॥ २० ॥ किमिति स्तोत्रेण निःप्रयोजनेनेति माभूच्छंकेत्याह अथापीति यद्यप्येवमथापि तर्हि किमिति कालः क्षिप्यते इति तत्राह यथेति । अतिवाचंति निंदंति तर्हीदं वचनं गुडजिव्हिकाकल्पमित्यतउक्तं मुहूर्तमिति प्रतिपालय प्रतीक्षस्व ॥ २१ ॥ प्रतीक्षायां किंकारणमत्राह एषेति घोराणां वेलेत्युक्तं स्पष्टयति चरंतीति ॥ २२ ॥

न वयं प्रभवस्तां त्वामनुकर्तुं गृहेश्वरि ॥ अप्यायुषा वा कात्स्न्येन ये चान्ये गुणगृध्नवः ॥ २० ॥ अथापि काममेनं ते प्रजायै करवाण्यलं ॥ यथा मां नाति वाचंति मुहूर्तं प्रतिपालय ॥२१॥ एषा घोरतमा वेला घोराणां घोरदर्शना ॥ चरंति यस्यां भूतानि भूतेशानुचराणि ह ॥ २२ ॥ ॥ ॥ ॥ ॥ ॥

अ० १९—३

१. अनेकोपकारकर्त्रीं त्वां कात्स्न्येन अनुकर्तुं प्रत्युपकारैरनृणा भवितुं न प्रभवः न समर्थाः । गुणगृध्नवः गुणलुब्धाः पुरुषास्तेपि न समर्थाः आयुषापि संपूर्णेनाप्यायुषा वा-शब्दात् जन्मांतरैरपि न प्रभवइति सूचयति ॥– (**या.**)

मुंदे हेळतक्क तम्म मातिन विषयवन्नु नडिसुवदक्के अवळन्नु (दिंतिगन्नु) स्वल्पु कश्यपरु होगळुवरु– 'हे गृहेश्वरि' गृहस्थाश्रमक्के मुख्यळाद दितिय, इंथ उत्तमगुणवुळ्ळ निन्नन्नु 'अनुकर्तुं' अनुसरिसुवदक्के (अंदरे निन्न मनोबयिकेगळन्नेल्ल पूरयिसुवदक्के) 'नवयंप्रभवः' नावु समर्थरल्ल; अथवा— 'कात्स्न्येंन अनुकर्तुं' नीनु माडिद उपकारक्के प्रत्युपकारमाडि निन्न ऋणवन्नु तीरिसुवदक्के नावु समर्थरल्लवु ई केलसवु केवल नम्मंथवरिंद मात्र आगदेंदल्लवु, हेंडतिय गुणगळिंद तुष्टराद गुणलोभिजनरादरू ई विषयक्के समर्थरल्लवु; ई विषयक्के ई नूरु वरुष आयुष्य कळेयुवदल्लदे जन्मांतरदिंदमह निनगे प्रत्युपकारमाडि ऋणमुक्तरागुवदु शक्यवल्लवु. ई अर्थवु 'वा' इदरिंद हेळल्पट्टितु. ॥ २० ॥ निष्प्रयोजनस्तोत्रादिंदेनु प्रयोजनवेंदु योचिसबेड एंदु हेळुवरु––हीगिद्दाग्यादरू ई निन्न मनोरथवन्नु पुत्रोत्पत्यर्थवागि अवश्य पूरसुवेनु. हागादरे याके आलस्यवु एंदरे हेळुवरु– मज्जनरिंद निंद्यनागदंते कार्यमाडतक्कदु. हागादरे इवरेगे हेळिद मातेल्ल 'गुडजिव्हिका' तुदिनालिगेयमेले बेल्लहाचिदंतेयो, अंदरे हागल्लवु–ई संध्याकाल होगुववरेगे (२वळिगेयवरेगे) मात्र धैर्यमाडु. ॥२१॥ स्वल्पुकालनडेयुवदक्के एनु कारणवेंदरे हेळुवरु–ई संध्याकालवु अत्यंतभयंकरवादद्दु इदु भयंकरस्वरूपराद राक्षसरु संचारमाडतक्क वेळेयु मत्तू नोडुवदक्कू कत्तलेयिद भयस्वरूपवादद्दु यांकेंदरे ई कालदल्लि भूतप्रेतादिगळु संचरिसुत्तिरुवदु, हागू भूतेशनाद रुद्रदेवन भृत्यरूसह संचरिसुवकालवु. ॥ २२ ॥

भवत्सामर्थ्येन भूतानि किं कुर्वंतीति तत्राह एतस्यामिति ॥ २३ ॥ अस्मात्पशुपतेरपि किं भयमित्याशंक्य तस्मादस्मदवद्यदर्शने भयमित्याशयवानाह श्मशानेति श्मशाने विद्यमानश्चक्रानिलो वात्यावायुः श्मशानमंडलवर्ती वातस्तस्मादुत्पन्नया धूल्या धूम्रो धूमवर्णः विशीर्णश्च विद्योतश्च जटाकलापो यस्य स तथा विशिष्टः द्योतः प्रकाशो यस्य स तथा भस्मनावकुंठोऽवरूषणं यस्य स तथोक्तः अमलरुक्मं रजतं भस्मावकुंठश्च रजतवद्धवलो देहो यस्य स तथा त्रिभिर्नेत्रैरितिशेषः ते तव देवरः सहोदर्याः सत्याः पतिः ॥ २४ ॥

एतस्यां साध्वि संध्यायां भगवान्भूतभावनः ॥ परीतो भूतपैर्षद्भिर्वृषेणाटति भूतराट् ॥ २३ ॥ श्मशानचक्रानिलधूलिधूम्रविकीर्णविद्योतजटाकलापः ॥ भस्मावकुंठामलरुक्मदेहो देवस्त्रिभिः पश्यति देवरस्ते ॥ २४ ॥ ॥ ॥

तम्म तपःसामर्थ्यविरलु आ भूतगळु एनु माडुववु एंदरे कश्यपरु हेळुवरु–'हे साध्वि' साधुगुणसंपन्नळाद दितिये केळु ई संध्याकालदल्लि आ भूतगळु मात्र तिरुगुवंदल्लवु. यावत्तू भूतगणगळिगू नियामकाराद परमपूज्यराद भूतराजरेनिसिद रुद्रदेवरु तम्म भृत्यराद भूतगळिंद सुत्तुगट्टिगोंडु वृषभारूढरागि स्वतः संचरिसुत्तिरुवरु- ॥२३॥ ई पशुपतियिंदादरू नमगेनु भयवेंदरे–नावु अपराधमाडि- ४३६

---

१. भूतान्येव पार्षदाः भृत्याः तैः पार्षदशब्दपर्यायः पर्षच्छब्दः वृषेण वृषमारुह्य तथाच भूतराट् रुद्रोऽघकारिणोऽस्मान् दंडयिष्यतीति भावः ॥– (**या.**)

२. अस्मिन् मुहूर्तेऽघकारिणो निलीनानपि तृतीयेन नेत्रेण पश्यंतीति भावः ॥– (**या.**)

दन्नु आ रुद्रदेवरु कंडरे भयवे सरि एंदु हेळुवरु––हे सखिये=श्मशानदल्लिद्द चक्राकारवाद गाळि (सोंटरगाळि) यिंद बंद धूळियु मैगे तगलि धूम्रवर्ण (बूदिबण्ण) नाद बेरेबेरेयागि होळेयुत्तिरुव जटामंडलवुळ्ळवनागि भस्मदिंद स्वल्पु (शुभ्रोत्तरीयवस्त्रदपटल्लदंते) मुचिदंते तोरुव, निर्मलवाद बेळ्ळियंते चक्चकितवागि होळेयुव देहवुळ्ळ, निम्म तंगियाद सतीदेविय पतियाद आ रुद्रदेवरु नम्म अपराधवन्नु मूरुनेत्रगळिंद नोडुवरु. ॥ २४ ॥

गर्भिणीवधनोदार्थपिशाचचर्यायाः हर्याज्ञाकारित्वेन हरेः प्रियत्वादतस्तदप्रियं तस्याप्यप्रियमितीदानीमिदं न कार्यमित्यभिप्रेत्य तस्य हरेरतिशयितमाहात्म्यमाह न यस्येति । व्रतैर्हरिप्रीतिकरैर्यस्य चरणापविद्धां पदा तिर्यक्प्रहतां भुक्तभोगामप्यजां गृहभार्यां पुत्रादिरूपां प्रकृतिशब्दवाच्यां श्रियमाशास्महे इच्छामः बतेत्यनेन हरिमाहात्म्यमचिंत्यमित्यास्वादयति ॥ २५ ॥

न यस्य लोके स्वजनः परोवा नात्यादृतो नोत कश्चिद्विगर्ह्यः ॥ वयं व्रतैर्यच्चरणापविद्धामाशास्महेऽजा बत भुक्तभोगां ॥२५॥

रुद्रदेवनु गर्भिणीस्त्रीयळन्नु वधमाडिद पापवन्नु कळ्कोळ्ळुवदक्के श्रीहर्याज्ञाप्रकारवागि ई पिशाचचर्ययन्नु धरिसिरुवनु. ई प्रकार इवन पिशाचचर्ययु श्रीहर्याज्ञानुसारवादकारण इवनू श्रीहरिय प्रीत्यास्पदने, आदकारण यावदु रुद्रदेवनिगे बेडादद्दो अदु श्रीहरिगादरू बेडादद्दे, आद्दरिंद ईग्ये ई-- संगरूपकार्यवु माडतक्कदल्लवेंदु आ विषयक्के श्रीहरिय अतिशय माहात्म्येयन्नु हेळुवरु— याव श्रीहरिगे, लोकदल्लि इवनु स्वकीयनु, इवनु परनु, इवनिंद नानु आदरमाडिसिगोळ्लट्टेनु, इवनु यावनो ओब्बनु, निंद्यनु एंब मत्वादिगुणमूलकवाद भेदविल्लवु. अवरवर कर्मानुसारवागि अवरवरतक्कष्टु सुखदुःखादिगळन्नुं कोडतक्कवनु. आदरे नावु (कश्यपरु) एंथवरेंदरे— श्रीहरिप्रीतिकरवाद व्रतगळन्नुमाडि अवुगळिंद, याव श्रीहरिय पाददिंद वक्रवागि होडिसिगोंडु बहुदूर वगेयल्पट्ट मने हेंडतिमक्कळु ऐश्वर्यमुंताद संसारवन्नु अपेक्षिसुववल्ल, अहा! श्रीहरिय बंधकशक्तिय माहात्म्येयु एष्टंत हेळलक्कदु. श्रीहरिय महात्म्येयंतू अचिंत्यवेंदु 'बत' एंबदु आस्वादन माडुवदु-- ॥ २५ ॥

अविद्यालक्षणं पटलं दर्शनप्रतिबंधकं नेत्रदोषं विभित्सवो भेत्तुकामा मनीषिणो यस्यानवद्याचरितं जगत्सृष्ट्यादिकर्म गृण्हंति श्रवणादिनेतिशेषः यश्चहरिर्निरस्तसाम्यातिशयस्तस्य हरेराज्ञया देवेंद्रादिसतामाश्रयो हरः पिशाचचर्यामचरदित्यन्वयः । " पिशाचचर्यामचरद्रुद्रो विष्ण्वाज्ञयैवतु गर्भिणीवधनोदार्थमहो-विष्णुर्विडंबकृदि " ति वचनबलान्मध्ये हर्याज्ञयेति पदमध्याहीयते पशुपतावुक्तगुणानामसंभवाच्च । " अहं रुद्राय धनुरातनोमी- " तिपराधीनताप्रतीतेश्च ॥ २६ ॥

यस्यानवद्याचरितं मनीषिणो गृण्हंत्यविद्यापटलं विभित्सवः ॥ निरस्तसाम्यातिशयो हरः स्वयं पिशाचचर्यामचरत्सतां गतिः ॥२६॥

अज्ञानवेंब परदेयु ज्ञानक्के प्रतिबंधकवु अदुनेत्र दोषविद्दंते अदन्नु कळ्कोळ्ळुवंतेंब अपेक्षेयुळ्ळ ज्ञानिगळु याव श्रीहरियु माडिद निर्दुष्टवाद जगत्सृष्टिमोदलाद कार्यगळन्नु श्रवणमननादिगळिंद

स्वीकरिसुवरु अंदर तिळकोळ्ळुववरु— याव श्रीहरिगे समानरू अधिकरादवरू यारू इल्लवु— याव श्रीहरिय आज्ञेयिद इंद्रने मोदलाद सज्जनरिगे आश्रयवन्नु कोट्ट रुद्रदेवनु पिशाचचर्येयन्नु आचरिसिदनु. ' ओव्व यावळो गर्भिणीस्त्रीयळन्नु रुद्रदेवनु वधमाडिद्दनंते आ पापवन्नु कळकोळ्ळुवदक्के अवनु विष्णुविनन्नु केळलु, आ विष्णुवु नीनु पिशाचचर्येयन्नु वहिसिदरे आ पापवु होगुवदेंदु हेळिदनु आ विष्णुविन आज्ञाप्रकार रुद्रदेवनु: पिशाचचर्येयन्नु वहिसिदनु. ' ई मध्यदल्लि विष्णुविन आज्ञेयिंद एंब पदवु, मेले हेळिद प्रमाणबलदिंद अध्याहार• माडल्पडुवदु-- यार्केंदरे मूल श्लोकदल्लि हेळल्पट्ट एल्ल गुणगळू रुद्रदेवनल्लि संभविसुवदिल्लवाद कारणदिंदलू ' नानु रुद्रनिगे धनुष्पवन्नु तंदु कोडुवेनेंदु ' अंभृणीसूक्तदल्लि रमादेविय वचनदिंद इवनिगे पराधीनत्ववु हेळल्पट्ट दरिंद ई श्लोकद अर्थवु रुद्रदेवन परवागि माडुवदक्के मार्गविल्लवादरिंद विष्णुपरवागि अर्थ माडल्पट्टदे. ॥ २६ ॥

ननु केचिद्धरेश्चरितमपि निंदंति तत्कथमित्याशंक्य ते तमःप्राप्तियोग्याः असुरजना इतिभावेनाह हसंतीति यैः शुनोभोजनमन्नमिदं शरीरं वस्त्रादिभिः स्वात्मतया निजस्वरूपतया उपलालितं ते पुरुषाः समीहितं विडंबनरूपचेष्टाविशेषमविदुषोऽविद्वांसोऽज्ञानवंतोऽतएव दुर्भगाः दुःखरूपतमः आप्तुं योग्याः स्वात्मनि स्वरूपएव रतस्याचरितमुपनयात् ज्येष्ठविवाहाच्च पूर्वं पुत्रोत्पत्त्यादिरूपं हसंति " नदेवचरितं चरे " दिति द्योतको हिशब्दः ॥ २७ ॥

हसंति यस्याचरितं हि दुर्भगाः स्वात्मन्रतस्याविदुषः समीहितं ॥ यैर्वस्त्रमाल्याभरणानुलेपनैः श्वभोजनं स्वात्मतयोपलालितं॥२७॥

ओळ्ळेदु केलवरु श्रीहरिय चरित्रेयन्नादरू निंदिसुवरल्ल? अदु ह्यागे एंदरे- आ जनरु तमोयोग्यराद असुररु एंब अभिप्रायदिंद हेळुवरु यावजनरु नायि, नरिगळु तिन्नुवदक्के अवुगळ अन्नस्वरूपवाद ई देहवन्नु उत्तमवाद वस्त्रगळू, मालागळू, अनेक आभरणगळू सुगंधद्रव्यलेपनगळू इवुगळिंद ई शरीरवे तन्न निजस्वरूपवेंदु तिळिदु पोषणमाडुवरो आ दुरात्मरु आ श्रीहरिय विडंबनरूपवाद जगद्व्यापारगळन्नु तिळियदे इद्दवरु आद्दरिंदले तमःसिगे होगुवदक्के योग्यरु. तन्न स्वरूपमहिमेयल्लिये आनंदबडतक्क श्रीहरिय कृष्णावतारकालदल्लि गोकुलदल्लिद्दागये उपनयनविवाहगळेंब शरीरसंस्कारगळागुवदक्किंत पूर्वदल्लिये श्रीकृष्णनु नीला मोदलादवरल्लि पुत्रोत्पादनमाडिद इवे मोदलाद चरित्रेगळन्नु अपहासमाडुवरु; (कृष्णनु माडिद आ कार्यगळु श्लाघनीयवादपक्षदल्लि ईग्यादरू सर्वरू अदरंतेये आचरिसबहुदल्लवेंदरे) महासमर्थराद देवतिगळु माडिदंते अल्पराद मनुष्यरु माडगूडदु एंदु ई श्लोकदल्लिय ' हि ' शब्दवु हेळुवदु. ॥२७॥

इतोपि ब्रह्मरुद्राद्यचिंत्यमहिमा परमात्मेत्याह ब्रह्मादयइति । ब्रह्मादयो देवा येन हरिणा कृतं धर्मसेतुं तदाज्ञया पालयंति इति तत्कृतसेतुपालाः इदं विश्वं यो हरिः कारणं निमित्तं यस्य तद्यत्कारणं तत्कारणत्वंच मायया स्वेच्छया न पराधीनतया हिशब्देन सहि कर्मफलोद्भिज्जतइति मानं सूचयति तस्य हरेराज्ञां करोतीति आज्ञाकरी केयं शिवस्य पिशाचचर्या हरेराज्ञया शिवः पिशाचचर्यामकरोदित्युक्तं भवति ततःकिं तत्राह अहोइति। विभूम्नः परिपूर्णस्य हरेः विडंबनं लोकानुकारिरूपं चरितमहो जगत्पूज्यान् रुद्रादीनपि स्वाज्ञाकर्मणि प्रवर्तयतीति अत्र रुद्रविषयत्वेन यथास्थितव्याख्यानस्यानुपपत्तिरुक्तेति नेह प्रपंच्यते ॥ २८ ॥

ब्रह्मादयो यत्कृतसेतुपाला यत्कारणं विश्वमिदं च मायया ॥ आज्ञाकरी तस्य पिशाचचर्या अहो विभूम्नश्चरितं विडंबनं ॥ २८ ॥

केचिज्ज्ञानसाधनयोग्यां मनुष्ययोनिं प्राप्यापि तत्साधनं न कुर्वंति तत्र किंकारणमित्याशंक्यासुरत्वमितिभावेनाह येभ्यर्थितामिति ये पुरुषा नोऽस्माकमभ्यर्थिता ज्ञानादिप्राप्तियोग्यत्वादाकांक्षितां नृगतिं मनुष्ययोनिं प्राप्य यत्र यस्या नृगतौ सहधर्मं धर्मेणसहवर्तमानं तत्त्वविषयं ज्ञानं च प्रपन्नास्ते अमुष्य हरेर्जगति विततया मायया बंधकशक्त्या धर्मज्ञानप्राप्तावयोग्यत्वेन संमोहिताः न भगवत आरानं कुर्वंति न वितरंत्यर्थिभ्यो नोपदिशंत्यतो धर्मज्ञानादिवर्जिता असुरत्वात्ते[1] मनुष्या इतीममर्थं ध्वनयति नन्वित्यनेन ॥ २४ ॥

१. आत्तं स्वीकृतं श्रोत्रृणां वीर्यं पुण्यं याभिरितिवा ॥– (या.) २. तेषां मानुषं जन्म व्यर्थं भवतीतिभावः ॥– (या.)

येभ्यर्थितामपि च नो नृगतिं प्रपन्ना ज्ञानं च तत्त्वविषयं सहधर्म यत्र ॥ नाराधनं भगवतो वितरंत्यमुष्य संमोहिता वितनया ननु मायया ते ॥ २४ ॥ ॥ ॥ ॥ ॥

केलवरु ज्ञानसाधनमाडुवदक्के योग्यवाद मनुष्यजन्मवन्नु होंदिदाग्यादरू आ मोक्षक्के कारणवाद ज्ञानवन्नु दोरकिसिगोळ्ळुवदिल्ल. अदु एनु कारणवेंदरे अवरु असुररेंब अभिप्रायदिंद हेळुवरु— यावपुरुषरु नम्मंथवरिगू (ब्रह्मादिगळिगू) सह ज्ञानमोदलादद्दु दोरेयुवदक्के योग्यवादकारण अपेक्षितवाद मनुष्यजन्मवन्नु होंदि याव मनुष्यजन्मदल्लि धर्मदिंदसहितवागिरतक्क भगवत्तत्वविषयकज्ञानवन्नु होंदुवदिल्लवो (होंदिल्लवो) आ पुरुषरु, ईश्रीहरिय जगत्तिनल्लि हरवल्लट्ट माया एंब बंधकशक्तियिद बद्धरागि धर्मज्ञानगळु दोरेयुवदक्के अयोग्यराद्दरिंद अत्यंत मोहितरागि श्रीहरिय आराधनेयन्नु माडुवदिल्ल. योग्यराद याचकरिगे तम्म शक्तयनुसार द्रव्यदानवन्नू माडुवदिल्लवु मत्तू एरडनेजनरिगे द्रव्यदानविषयक्के बोधवन्नू माडुवदिल्लवु. ई प्रकार धर्मज्ञानमोदलादवुगळिंद हीनरादकारण अवरु असुररे होर्तु मनुष्यरल्ल. एंब ई अर्थवु ' ननु ' एंबदरिंद प्रकट माडल्पडुवदु. ॥ २४ ॥

संतो देवप्रकृतएव भगवत आराधनं कृत्वा तज्ज्ञानेन यत्र स्थितं हरिं प्राप्नुवंतीत्याह यत्रेति ते यत्र नोऽस्माकं उपरि स्थितं वैकुंठस्थितं हरिं प्रयांतीत्यन्वयः । ये अनिमिषां देवानामृषभस्य स्वामिनो हरेरनुवृत्त्या निरंतरसेवया दूरेयमाः दूरीकृतयमलोका अतएव सर्वैः स्पृहयणीयशीलाः सुयशसो भर्तुहरेर्गुणगणानां मिथः कथने योनुरागः तस्मादुत्पन्नं यद्वैक्लव्यं पारवश्यं तन्निमित्तेन जाता या बाष्पकलानंदाश्रुधारा तया पुलकीकृतान्यंगानि शरीरतदवयवा येषां ते तथोक्ताः सुयशस इति भागवतानां विशेषणंवा वैकुंठादप्युपरि शिवलोक इति केचिदाचक्षते तस्याप्रस्तुतत्वादनुपपन्नत्वादिति हेतुद्वयं हीत्यनेन सूचयति ॥ २५ ॥

यत्र व्रजंत्यनिमिषामृषभानुवृत्त्या दूरे यमाद्युपरि नः स्पृहणीयशीलाः ॥ भर्तुर्यशः सुयशसः कथनानुरागवैक्लव्यबाष्पकलया पुलकीकृतांगाः ॥ २५ ॥ ॥ ॥ ॥ ॥ ॥

सज्जनरु देवप्रकृतियुळ्ळवरे, अवरु श्रीहरिय आराधनेयन्नु माडि आ परमात्मन अपरोक्षज्ञानदिंद याव वैकुंठलोकदल्लिद्द श्रीहरियन्नु होंदुवरेंदु हेळुवरु— आ जनरु नम्म सत्यलोकद तेलेयमेले इद्द वैकुंठवासियाद श्रीहरियन्नु होंदुवरु— अवरु यारेंदरे— यावजनरु देवतिगळिगे स्वामियाद श्रीहरिय निरंतर सेवेयिंद यमलोकवन्नु दूरमाडिरुवरु. आद्दरिंदले मर्वरिंदलू स्पर्धे माडिशिगोळ्ळुवदक्के तक्क गुणवुळ्ळवरागिरुवरु. मत्तू उत्तमयशस्वियाद श्रीहरिय गुणगळन्नु परस्पर ओब्बरिगोब्बरु हेळुवंकु, केळुवंकु, एंबविषयक्के अपेक्षेयुळ्ळवरागि आ हेळ्केळुवदरिंद शरीरवु परवशवागि अदरिंद उत्पन्नवाद आनंदबाष्प (संतोषदकर्ण्णारु) धारागळिंद मैमेले रोमांचगळु उब्बुववो आ जनरे वैकुंठक्के बरतक्क देवप्रकृतियुळ्ळवरु ' सुयशसः ' एंब पदवु भगवद्भक्तरिगादरू विशेषणवागुवदु. वैकुंठलोकदमेले शिवलोकवुंटेंदु केलवरु हेळुवरु. आ मातु याव प्रसंगदल्लियू संबंधिसुवदिल्लवु. मत्तू योग्यवागियू तोरुवदिल्लवु. ई एरडू कारणगळू ' हि ' एंबदरिंद सूचिसल्पडुववु. ॥ २५ ॥

प्रकृतमनुसरति तद्विश्वगुर्वधिकृतमिति । अथ मुनयः परां मुदमापुरित्यन्वयः भगवत्समाधिना नित्यतृप्तानां मुनीनां कादाचित्कमोदप्राप्तौ किंकारणमुच्यते तत् विकुंठस्थानमुपेत्य कीदृशं । " उतामृतत्वस्येशानोयदन्नेनातिरोहति " इत्यादिना यो मुक्तामुक्तप्रपंचाधारत्वेन श्रुतः सचासौ विश्वगुरुस्तेन मुक्तामुक्तप्रपंचगुरुणा हरिणाधिकृतं विशेषतः स्वामित्वेनाभिमतं भुवनशब्देन तत्स्थाः पुरुषाः लक्ष्यंते तैः शिवलोकोत्तमतया वंद्यं दिव्यमप्राकृतं विचित्राणि नानावर्णानि विबुधाग्र्याणां विमानानि शोचयति दीपयति इति विचित्रविबुधाग्र्यविमानशोचिः शुचिदीप्ताविति धातुः अपूर्वं पूर्वमदृष्टं योगमायाबलेन भगवदुपासनालब्धज्ञानबलेन प्राप्येत्यर्थः ॥ २६ ॥

तद्विश्वगुर्वधिकृतं भुवनैकवंद्यं दिव्यं विचित्रविबुधाग्र्यविमानशोचिः ॥ आपुः परां मुदमपूर्वमुपेत्य योगमायाबलेन मुनयस्तदथो विकुंठं ॥ २६ ॥ ॥ ॥ ॥ ॥ ॥

चतुर्मुखनु ईप्रकार वैकुंठलोकवन्नु वर्णिसि प्रारंभवाद कथासंगतियन्नु हेळुवनु— इष्टागुत्तिरलु हे देवतिगळिरा आ सनकादिगळु अत्यंत संतोषहोंदिदरु. श्रीहरियन्नु एकाग्रचित्तदिंद ध्यानमाडि निरंतर तृप्तियन्नु होंदतक्क आ मुनिगळिगे एंदादरोंदिन संतोषदोरेयुवदक्कनुकारणवेंदरे अवरु आ वैकुंठलोकक्के बंदद्दकारणवु आ वैकुंठवु उतामृतत्वस्येशानो यदन्नेनातिरोहति अन्नदिंद उपजीवितरागिरतक्क अमुक्तजीवसमूहवन्नु यावकारण श्रीहरियु मीरिदु आ अमुक्तजीवरिगे मोक्षवन्नु कोट्टाग्यू अवरु तन्न अधीनरागिये इरुवंरेंदु (अवर उपासनानुगुणवागि) मोक्षवन्नु कोट्टु आ मुक्तरिगू अधीश्वरनागि वैकुंठलोकदल्लिरुवनु; एंब इवे मोदलाद श्रुतिगळिंद मुक्तामुक्तप्रपंचक्के मुख्याश्रयनेंदु हेगळिसिगोळ्ळुवदरिंद विश्वगुरुवेनिसिगोंड श्रीहरियिंद परिपालितवागि आ वैकुंठलोकवु श्रीहरियराजधानियनिसिगोळ्ळुवदु. मत्तू शिवलोकमोदलाद सकललोकगळल्लिद्द जनरिंद मुख्यवागि नमस्कृतवादद्दु. प्राकृतवाद सत्वादिगुणगळ संपर्कविल्लद्दु, विचित्रवर्णगळिंद शोभिसतक्क सकलदेवतिगळ विमानगळन्नु प्रकाशमंतमाडुव (मत्तू याव लोकवु एष्टोसारे होगि नोडिबंदु पुनः होदरे मत्ते एंदू नोडदे इद्द लोकदंते विचित्रवागिये तोरुवदु.) ई सनकादिगळु एंदू नोडदे इद्दद्दु. इंथ वैकुंठलोकवन्नु कुरितु श्रीहरियन्नु बहुदिवस उपासनामाडि संपादिसिद ज्ञानबलदिंद, बंदु आ सनकादिमुनिगळु अत्यंतआनंदपट्टरु ॥ २६ ॥

मुदमुपेत्य बहिरेवावतिष्ठंत उतांतराविशन् आविश्य च किं चक्रुरिति तत्राह तस्मिन्निति । तस्मिन्वैकुंठे षट्कक्ष्याः गोपुरद्वाराण्यतीत्य तत्रासज्जमानाः अनिवार्यमाणाः सप्तमायां कक्ष्यायां स्थितौ देवावचक्षतापश्यन्नित्यन्वयः केयूरादिभिर्विटंकोऽलंकृतो वेषो ययोस्तौ तथोक्तौ ॥ २७॥ ४४८

---

१. पालितं ॥– (**या.**) २. पुनः पुनर्दर्शनेपि पूर्वादृष्ट मिवस्थितं ॥– (**या.**)

तस्मिन्नतीत्य मुनयः षडसज्जमानाः कक्ष्याः समानवयसस्त्वथ सप्तमायां ॥ देवावचक्षत गृहीतगदौ परार्ध्यकेयूरकुंडलकिरीटविटंकवेषौ ॥ २७ ॥ ॥ ॥ ॥ ॥

आ सनकादिगळु वैकुंठवन्नुनोडि संतोषवट्टु होरगे निंतरो अथवा ओळगेबंदरो. ओळगे बंदु एनु माडिदरेंबदन्नु हेळुवरु— आ सनकादिगळु नाल्वरु (ऐदुवर्षद हुडुगरंते) समानवादवयः सुळ्ळवरागि आ वैकुंठलोकवन्नु प्रवेशमाडि यारदू प्रतिबंधकविल्लदंते आरु गोपुरद्वारगळन्नुदाटि; आ मेले एळने गोपुरद्वारदल्लि. निंतिद्द, अमौल्यवाद केयूर (भुजगळ मेले इरतक्क भूषणगळु) गळिंदलू कर्णकुंडलकिरीटगळिंदलू अलंकृतवाद वेषवुळ्ळवरागि कैयल्लि गदेयन्नु धरिसिद इव्वरु देवतिगळन्नु कंडरु. ॥ २७ ॥

तयोर्भावं वर्णयति मत्तेति असितानां श्यामानां बाहूना चतुष्टयस्य मध्ये वक्षसि विन्यस्तया मत्ता द्विरेफा भृंगा यस्यां सा मत्तद्विरेफा वनमालिका वनमाला तया निवीतौ परिवृतौ कुटिलया वक्रया वक्रस्थितया भ्रुवा सह स्फुटं निर्गतेन रक्तेक्षणेन रक्तांतकटाक्षनिरीक्षणेन मनाक् किंचिद्रभसं कोपं दधानौ। अनुसंधानं कुर्वंतौ अंतःप्रविशतोनिर्गच्छतश्च जनान् ज्ञात्वा तिष्ठत इत्यर्थः ॥ २८ ॥

मत्तद्विरेफवनमालिकया निवीतौ विन्यस्तयाऽसितचतुष्टयबाहुमध्ये ॥ वक्रभ्रुवा कुटिलया स्फुटनिर्गतेन रक्तेक्षणेन च मनाग्रभसं दधानौ ॥ २८ ॥ ॥ ॥ ॥ ॥ ॥

आ एळने द्वारदल्लिद्द आ देवतिगळ मुग्वलक्षणवु ह्यागित्तेंदरे हेळुवरु— आ बागिलल्लि निंतिद्द जय–विजयरेंब द्वारपालकरु इंद्रनीलमणियंते श्यामवर्णयुक्तवाद नाल्कु भुजगळ मध्यभागवाद वक्षस्थलदल्लि धारणमाडल्पट्ट, झंकारमाडुतक्क भ्रमरगळु मकरंद रसवन्नास्वादनमाडुतक्क कमलगळ वनमालेयिंद भूषितरागि, मोट्टादहुब्बुगळिंद सहितवाद रक्तवर्णवे कोनेभागदल्लिवुळ्ळ मिट्टुगाण्णिनिंद नोडुत्त स्वल्प कोपानुसंधानवन्नुमाडुत्त, ओळगे प्रवेशमाडुतक्क जनरन्नु विचारिसुत्त निंतिद्दरु. ॥ २८ ॥

ये मुनयः सर्ववस्तुषु स्वस्य स्वतंत्रस्य हरेर्दृष्ट्यांतर्यामित्वदर्शनेन अविषया निस्पृहा अतएव विगताभिशंकाः अविहताः अप्रतिहतगतयः सर्वत्र संचरंति हि यस्मात्तस्मात्ते मुनयः तावपृष्ट्वा मिषतोः पश्यतोस्तयोर्द्वारि तथाप्रविविशुरित्यन्वयः यथा पूर्वाः षट्द्वारः प्रविविशुः निशंकतया कीदृशीर्द्वारः या आरपुटवज्रकपाटिका आरेण पित्तलेनालंकृतं पुटं यस्याः सा आरपुटवज्रशिलया कृतकपाटिका आरपुटवज्रकपाटिका यासां तास्तथा । " लोहमय्यारकूटंस्यात्पित्तलंचारमस्त्रियामि - " ति यादवः ॥ २९ ॥

---

१. प्राकारद्वाराणि –॥ (**या.**) (**या.**) २. सुवर्णेनवा ॥– (**या.**)

द्वार्येतयोर्निविविशुर्मिषतोरपृष्ट्वा पूर्वा यथारपुटवज्रकपाटिका याः ॥ सर्वत्र तेह्यविषया मुनयः स्वदृष्ट्या ये संचरंत्यविहता विगताभिशंकाः ॥ २९ ॥ ॥ ॥ ॥ ॥ ॥

आ सनकादिमुनिगळु सकलवस्तुगळल्लि स्वतंत्रनाद श्रीहरियें अंतर्नियामकनागिरुवनेंदु नोडुत्त, निस्पृहरागि (विषयापेक्षे इल्लद) आद्दरिंदले याव विषयदल्लियू संदेहविल्लदे, एल्लि तिरुगाडिदरू यारदू प्रतिबंधकविल्लदे सर्वत्रदल्लियू संचरिसुत्तिद्दरु. आद कारण एळने गोपुरदल्लिद्द आ इव्वरू द्वारपालकरु ई मुनिगळु प्रवेशमाडुवदन्नु नोडुत्तिरलागि, अवरन्नु केळदे आरपुटवज्रकपाटिका याः ' ऑंदु विलक्षणजातिय हित्तालिय (अथवा बंगारद) कट्टुगळुळ्ळ वज्रशिलागळिंद निर्मितवाद कपाटिका (फड्डकु–जोडवागिलु) गळुळ्ळ (अप्रतिमवाद) हिंदिन आरु बागिलुगळन्नु ह्यागे संदेहविल्लदे दाटि बंदिद्दरो, अदे प्रकारवे प्रवेशमाडिदरु. लोहमयवाददक्के आरकूटवेंतलू हित्तालिगे आरवेंतलू अन्नुवरु. आरं एंब शब्दवु स्त्रीलिंगद होर्तु २ लिंगवू आगुवदु एंदु यादवकोशवुंटु ॥ २९ ॥

ततः किमभूदिति तत्राह तानिति । वातो वायुरेव रशना वस्त्रं येषां ते तथा तान् कुमारानित्युक्तं विवृणोति दशार्धवयसइति । दृष्ट्वा पंचवर्षान् विदितात्मतत्त्वान् ज्ञातपरमात्मस्वरूपान् वेत्रेण यष्ट्या स्खलयतां प्रवेशप्रतिरोधं चक्रतुः अतदर्हणान् स्खलनायोग्यान् तेजस्तेषां प्रभावं विहस्याऽगणय्य तत्र निमित्तमाह भगवदिति भगवतो हरेः प्रतिकूलं विरुद्धं शीलं ययोस्तौ तथा तौ " जयस्य विजयस्यापि कदाचिद्ब्रह्मशापतः । कृष्णावतारपर्यंतं प्रातिकूल्यंचजायत " इतिवचनेन शापनिमित्तं प्रातिकूल्यं सावधिकं चेति ज्ञायते अन्यथा तयोस्तत्रावस्थानमेव न युज्यते रजआद्यभावस्योक्तत्वात् ॥ ३० ॥

तान्वीक्ष्य वातरशनांश्चतुरः कुमारान्वृद्धान्दशार्धवयसो विदितात्मतत्वान् ॥ वेत्रेण चास्खलयतामतदर्हणांस्तौ तेजो विहस्य भगवत्प्रतिकूलशीलौ ॥ ३० ॥ ॥ ॥ ॥ ॥ ॥ ४४९

मुंदेनायितेंदरे हेळुवरु— गाळिये वस्त्रवागियुळ्ळ अंदरे दिगंबरराद वयोवृद्धरादाग्यू हुडुगरागि सर्वदा ऐदुवरुषदवरंते तोरुत्तिहु श्रीहरिय स्वरूपज्ञानवुळ्ळवरागिद्द आ सनकादिनाल्वरु ऋषिगळन्नु आ जयविजयरु नोडि श्रीहरिगे विरुद्धस्वभाववुळ्ळवरादकारण, प्रतिबंधके योग्यरागिद्द आ ऋषिगळन्नु अवर तपोबलवन्नु लक्ष्यिसि तरदे तम्म कैंयलिद्द बेत्तदिंद नीवु ओळगे

---

१. सप्तमार्थां द्वारि ॥– (**या.**) २. अनादृत्येतियावत् ॥– ३. नग्नानिति यावत् ॥– (**या.**) ४. वस्तुतो ॥– (**या.**) ५. तथा प्रतीयमानान् ॥– (**या.**) ६. चशब्दात् द्वारेत्यपिग्राह्यं ॥– (**या.**) ७. अहो अत्राप्येतेषां धार्ष्ट्यमित्युपहासः कृतइतिवा ॥– (**या.**)

होगकूडदेंदु प्रतिबंधकमाडिदरु. ओळ्ळेदु रजस्तमोगुणगळ संपर्कविल्लद वैकुंठदल्लि श्रीहरिय द्वारपालकरागि अवनिगे विरुद्धस्वभाववुळ्ळवरागि ह्यागिद्दरवरु[1] एंदरे सर्वदा अवर स्वभाववे भगवद्विरुद्ध वादद्दंदल्लवु. ' कदाचित् कालदल्लि ब्रह्मदेवन शापदिंद– श्रीकृष्णावतारदवरेगे आ जयविजयरिगे भगवद्विरुद्धस्वभाव बुंटागुवदु ' एंदु नारदपुराणवचनविद्ददरिंद आ जयविजयरिगे शापनिमित्तदिंद श्रीहरिय विरुद्धवाद बुद्धियु इंतिष्टु कालदवरेगे इरतक्कदेंदु तिळियुत्तदे, इल्लदिद्दरे रजस्तमोगुणगळ संपर्कविल्लद आ लोकदल्लि इंथ जनरु इरुवदे असंगतवार्दातु. ॥ ३० ॥

न्यस्तदंडत्वात्प्रतिषिद्धास्ते तूष्णीं ययागतं ययुः किमत्राह ताभ्यामिति सुष्ठु अर्हत्तमाः पूज्यतमाः सुहृत्तमस्य हरेर्दिदृक्षितस्य दर्शनेच्छाया भग्ने विघ्ने सति ईषत्कामानुजेनाल्पकोपेन उपप्लुतानि अतिकलुषीकृतान्यक्षाणि येषां ते तथोक्ताः प्रतिहारपाभ्यामनिमिषेषु देवेषु मिषत्सु निषिध्यमाना ऊचुरित्यन्वयः ॥ ३१ ॥

ताभ्यां मिषत्स्वनिमिषेषु निषिध्यमानाः स्वर्हत्तमाह्यपि हरेः प्रतिहारपाभ्यां ॥ ऊचुः सुहृत्तमदिदृक्षितभंग ईषत्कामानुजेन सहसा त उपप्लुताक्षाः ॥ ३१ ॥ ॥ ॥ ॥ ॥ ॥

दंडिसुवदन्नु परित्यागमाडिद चतुर्थाश्रमिगळादकारण आ सनकादिगळु जयविजयरिंद ओळगे होगगोडदिद्दवरागि मुम्मने बंदहादियन्नु हिडिदु होदरेनु[2] अंदरे हेळुवरु— अत्यंतपूज्यरादाग्यादरू आ सनकादिगळु तमगे अत्यंत अंतःकरणियाद श्रीहरियन्नु नोडबेकेंब अपेक्षेयिंद विघ्नवु बरुत्तिरलु, कामद नंतर हुट्टिद स्वल्प क्रोधदिंद तत्क्षणवे कण्णुकेंपगे माडिकोंडु देवतिगळु नोडुत्तिरलु आ द्वारपालकरिंद निषेधमाडिसगोळ्ळुत्तिद्दु ई प्रकार मातादिदरु.— ॥ ३१ ॥

क्रोधाकुलितनेत्रत्वाद्धितं न किंत्वहितमेव तत्कीदृशमूचुरिति तत्राह कोवेति । भगवत उच्चैः परिचर्यया समुन्नतपूजादिसेवया इह वैकुंठे स्वयोग्यं स्थानमेत्य तद्धर्मिणां तस्य हरेर्ध्यानादिधर्मवतां सतां भागवतानामपि मध्ये कः पुमान् विषमस्वभावः शत्रुरयं इदं मित्रमिति तामसशीलंवा इत्यनेनानुपपत्तिं सूचयति भगवद्विषये शंकनीयोस्तीति भवन्निषेधः क्रियत इति तत्राह तस्मिन्निति कुहकयोर्मिथ्यादृष्टिमतोर्युवयोरात्मवत् यथात्मा परिशंकनीयस्तथेह तस्मिन् भगवति विषये परिशंकनीयो विरुद्धस्वभावः कोवास्ति न कोपीत्यन्वयः कुतोनास्तीत्यत आह प्रशांतेति लोके अप्रशांतस्य परेण सहोत्पादितवैरस्य च शंकनीयो दृष्टस्तथा नायं पुरुषेषु प्रशांतत्वात् अनुत्पादितवैरत्वाच्च किंच प्रकृष्टानंदस्वरूपत्वादनुपहतैश्वर्यादिषड्गुणपूर्णत्वात्सर्वशरीरेषु गतत्वादप्रतिद्वंद्वत्वादप्राकृतशरीरत्वाच्चातोस्मिन्निषेधो व्यर्थ इत्यर्थः ॥ ३२ ॥

१. निषेधानर्हा अर्पीतियावत् ॥– (**या.**) २. अकस्मादेव ॥– (**या.**) ३. युष्मासु भगवद्विषये विषमस्वभावशंकया अयं प्रतिषेधो द्वारपालकयोरावयोर्गुणएवेति शंकायामाह तस्मिन्निति ॥ ॥– (**या.**)

कोवा इहैत्य भगवत्परिचर्ययोच्चैस्तद्धर्मिणामपि सतां विषमस्वभावः ॥ तस्मिन्प्रशांतपुरुषे गतविग्रहे वां कोवात्मवत्कुहकयोः परिशंकनीयः ॥ ३२ ॥ ॥ ॥ ॥ ॥ ॥ ॥

आ सनकादिगळु शिष्टिगेद्दु कण्णुकेंपगेमाडिकोंडद्दरिंद हितकरवादमातेनाडिरलिकिल्ल, अहितवन्ने आडिरबहुदु, अदु एनुमाताडिदरेंदरे हेळुवरु— अत्युत्तमप्रकारवागि पूजामोदलाद श्रीहरिय सेवेयिंद ई वैकुंठलोकदल्लि तमगे योग्यवाद स्थानवन्नु होंदि आ श्रीहरिय ध्यानमोदलाद धर्मवुळ्ळ सज्जनर मध्यदल्लि याव पुरुषनु इवनु शत्रुवु, इवनु मित्रनु, एंदु तामसस्वभाववुळ्ळवनादानु, यावनू आगलिकिल्ल. ई श्लोकदल्लिय 'वा' एंबदु इंथ विषमस्वभाववुळ्ळवरु आ लोकदल्लिरुवदक्के अनुकूलते इल्लवेंदु सूचिसुवदु. यद्यपि शत्रुमित्रमोदलाद विषमबुद्धियुळ्ळवनु ई लोकदल्लि यावनू इल्लदिद्दरू, श्रीहरियविषयकसंशयज्ञानवुळ्ळवरु यारादरू बंदारु, एंदु निम्मल्लि भगवद्विषयक विषमस्वभावविरबहुदेंब संदेहदिंद निम्मन्नु ओळगे होगुवदक्के प्रतिबंधकमाडिरुत्तवेवु. इदु द्वारपालकर सहज धर्मवे एंदरे हेळुवरु— मिथ्याज्ञानवुळ्ळ निम्म (जयविजयर) मनःसु ह्यागे श्रीहरिय विषयदल्लि संदेहवुळ्ळद्दागिरुवदो, आप्रकार श्रीहरियविषयदल्लि संदेहबुद्धियुळ्ळवनु ई लोकदल्लि निम्महोर्तु यावनिद्दाने? यावनू इल्लवु. याके इल्लवेंदरे—लोकदल्लि एल्ल जनरसंगड द्वेषकट्टिगोंडिद्द दुष्ट पुरुषनिगे यारु ग्रंथवरो यारु ओळगे बंदु एनु माडुवरो, एंदु संशयास्पदराद जनरु उंटागुवरु ई श्रीहरियु अंथवनल्लवु, एल्ल जनरल्लियू शांतस्वभावदिंद इद्दकारण यारमंगडवू द्वेषकट्टिल्लवु, मत्तू ई श्रीहरियु उत्तमवाद आनंदस्वरूपवुळ्ळवनाद्दरिंदलू एनू कडिमेयागद षड्गुणैश्वर्यपूर्णनाद्दरिंदलू इवनिगे समरादवरू अधिकरादवरू यारू इल्लद्दरिंदलू प्राकृतशरीर हीननाद्दरिंदलू इंथ श्रीहरियन्नु नोडबेकेंबवरु दुष्टरु यारू इल्लि बरुवदिल्लवादकारण नम्मन्नु नीवु निषेधमाडिद्दु व्यर्थवादद्दु. ॥३२॥

आपादितदोषएव पुरुषो दंडयोग्य इति तयोर्दोषित्वमुपपादयंति नहीति। इहास्मिँल्लोके स्थिता धीरा ज्ञानिनः समस्तस्य मुक्तामुक्तप्रपंचस्य कुक्षय शरीरकुहराणि यस्यावासभूतानि स समस्तकुक्षिस्तस्मिन् यद्वा समस्तकुक्षौ स्थिते भगवति अंतरं छिद्रं भेदं न पश्यंति किंतु यत्र यस्मिन् लोके नभसि महाकाशे नभो घटाकाशमिवात्मानं स्वात्मस्थं भगवद्रूपमात्मनि व्याप्ते भगवद्रूपे पश्यंति तयोरैक्येनेत्यर्थः ततः किमत्राह युवयोरिति। एवं ज्ञानिप्रत्यक्षे जाग्रति सुरलिंगिनोर्देवलक्षणवतोर्युवयोर्मनसा यतो भेददर्शनादस्य भेदस्य द्रष्टुः पुंसः सर्वत्र दुःखप्राप्तिरूपं भयं भवति तादृशमुदरभेदि उद्गता अरा दोषा यस्मात्तदुदरं ब्रह्म तस्य भेददर्शननिमित्तं भयं व्युत्पादितं किं प्रतिशरीरमंतर्यामित्वेन स्थितस्याभयस्य हरेरन्यस्माद्भयमस्तीति बुद्धिः कृता अन्यथास्मन्निवारणं किमिति कृतं हिशब्देन तत्स्वानुभवसिद्धं दर्शयंति यद्वा "सर्वोदरगतं ब्रह्म ये भेदेन विचक्षते। सर्वत्रापिभयंतेषां मृतानांतमएवचे-" तिवाक्यं प्रमाणयंति युवयोरिति तृतीयार्थे षष्ठी। तया तद्द्वारपालत्वेन स्वस्वामिसंबंधस्य स्वानुभवसिद्धत्वेन तदपलापेन सर्वापलापप्रसंगात् भगवदपराधएव कृतइति द्योतयंति ॥ ३३ ॥

न ह्यंतरं भगवतीह समस्तकुक्षावात्मानमात्मनि नभो नभसीव धीराः ॥ पश्यंति यत्र युवयोः सुरलिंगिनोः किं व्युत्पादितं ह्युदरभेदि भयं यतोस्य ॥ ३३ ॥ ॥ ॥ ॥ ॥

दोषारोपियाद पुरुषने दंडनक्के योग्यनु एंदु तिळिसुवदक्के आ जयविजयरु अपराधिगळेंबदन्नु स्पष्टवागि (सनकादिगळु) हेळुवरु— ई वैकुंठलोकदल्लिद्द ज्ञानिगळु मुक्तरू अमुक्तरू एंब सकलप्राणिगळ शरीरदल्लिरुव अवकाशवे यावन निवासस्थानवागिरुव, अथवा सकलप्राणिगळ कुक्षिप्रदेशदल्लिद्द श्रीहरियल्लि भेदवन्नु तिळियुवदिल्ल (नोडुवदिल्ल) हागादरे एनेंदु तिळियुवरेंदरे— याव वैकुंठलोकदल्लिद्दवरु— महाकाशदल्लि घटाकाशवु ह्यागे ऐक्यहोंदुवदो, घटाकाशक्कू महाकाशक्कू भेदतोरिदाग्यू ह्यागे ऐक्यविरुवदो? आ प्रकारवे तम्म तम्म हृदयदल्लिद्द श्रीहरिगू सर्वत्रव्याप्तनाद श्रीहरिगू ऐक्यवे इरुवदेंदु तिळियुवरु— आदरे प्रकृतक्केनु संबंधवेंदरे हेळुवरु— ई प्रकार ज्ञानिगळु प्रत्यक्षवागि तिळियुवदु सिद्धविरलु, देवरंते वेष (लक्षण) वुळ्ळ निम्मिब्बरिंद आ श्रीहरियल्लि मनसा भेदवु तोरिसल्पट्टद्दरिंद आ भेदवन्नु तिळियतक्क पुरुषनिगे सर्वत्र दुःखप्राप्तियागुवभयवु उंटागुवदु— अंथ 'उदरभेदिभयं' अराःएंदरे दोषगळु आ दोषगळु यावनिगे बहुदूरदल्लिरुवदो अवनु उदरनेन्निसुवनु उदर—एंदरे दोषदूरनाद श्रीहरियु अवनल्लि भेदवुंटेंदु तिळियुवदरिंद बरुव भयवु निम्मिद हुट्टिसल्पट्टितो? प्रतियोंदु शरीरदल्लि अंतर्यामियागिद्दरिंद लेशमात्रवू भयविल्लदे अभयनेंदेनिसिगोंड श्रीहरिगे एरडनेयवरिंद भयवुंटेंदु बुद्धियु निम्मिद माडल्पट्टितो इल्लदिद्दरे नमगे ओळगे होगुवदक्के याके बेडंदीरि, ई मातु तम्म अनुभवसिद्धवादद्देंदु 'हि' शब्ददिंद तोरिसुवरु— अथवा— 'एल्लर हृद्गतवाद ब्रह्मवस्तुविनन्नु यारु भेदरूपवागि तिळियुवरो अवरिगे एल्लियादरू भयवे, सत्तमेले अंधंतमःसे' एंब तत्वविवेकवेंब ग्रंथद प्रमाणवु तावु हेळिद्द मातिगे उंटेंदु 'हि' शब्ददिंद हेळुवरु— इल्लि 'युवयोः' एंब षष्ठिगे निम्मिदा एंदु तृतीयार्थवन्नु हेळतक्कदु, अदरिंद इवरिब्बरू श्रीहरिय द्वारपालकरादकारण तम्म स्वामियाद श्रीहरिगू तमगू स्वामिभृत्यभाववेंब संबंधविद्दकारण आ तम्म स्वामिय (मेले हेळिद) महात्म्येयु तमगे गोत्तिद्दाग्यू (सर्वत्रएकप्रकारनागिद्द श्रीहरिगे यारद्दू भयविल्लवेंबदु गोत्तिद्दाग्यू, परशत्रुगळ भयवुळ्ळ राजन द्वारपालकरु ह्यागे पररन्नु प्रतिबंधकमाडुवरो आ प्रकार नम्मन्नु ओळगे होगुवदक्के प्रतिबंधकमाडिद्दरिंद आ श्रीहरिगे पररिंद भयवुंटेंदु नीवु तिळिदंतायितु) तिळियदवरंते माडिद्दरिंद इदेप्रकार एल्ल विषयक्कू गोत्तिदु अरियदवरंते माडुववरादकारण नीवु श्रीहरिय अपराधवन्ने माडिदिरि एंदु तोरिसुवरु. ॥ ३३ ॥

एवं दोषानुपपाद्य तद्योग्यं दंडं कर्तुमुपक्रमंते तद्वाइति मंदधीभ्यां कपटबुद्धिभ्यां युवाभ्याममुष्य विकुंठभर्तुर्मूलरूपस्य परमस्यावतारांतर्यामिरूपस्य च यद्भेददर्शनं तत्कर्तुं न युक्तमिति धीमहि चिंतयामः तद्युवाभ्यां कृतमतोंतरभावदृष्ट्या भेददर्शनेनेतो वैकुंठलोकाद्यत्र येषु त्रिष्विमे त्रयोस्य हरे रिपवःस्युः तान्पापीयसोऽतिपापाज्जन्मयोग्यान् लोकान् देहान् व्रजतमित्यन्वयः। त्रीनासुरान्देहान्यातमित्यर्थः वा इत्यनेन "यथोदकं दुर्गे वृष्टं पर्वतेषु विधावती" त्यादिश्रुतिं प्रमाणयति ॥ ३४ ॥

तद्वा अमुष्य परमस्य विकुंठभर्तुः कर्तुं न युक्तमिति धीमहि मंदधीभ्यां ॥ लोकानितो व्रजतमंतरभावदृष्ट्या पापीयसस्त्रय इमे रिपवोस्य यत्र ॥ ३४ ॥ ॥ ॥ ॥ ॥

१. अत्र जयविजययोरैक्यविवक्षया तदाविष्टयोरसुरयोर्द्वित्वविवक्षया त्रय इत्युक्तमिति ज्ञातव्यं ॥— (या.) २. यत्र देहत्रये इमे प्रसिद्धाः अस्य हरेः त्रयोपि रिपवः द्वेषिणो भविष्यंति तान् लोकान् ॥— (या.) 'त्रयो रिपवो देहत्रये' तेन यत्र देहत्रये तान् लोकान् देहानित्यन्वयोपपत्तिरिति भावः ॥— (ता. दीपि.)

ई प्रकारवागि सनकादिगळु आ जयविजयरल्लिद्द दोषगळन्नु होळि आ दोषगळिगे तक्कादशिक्षेयन्नु माडुवदक्के प्रारंभिसुवरु– एलै कपटबुद्धियुळ्ळ निर्भिमन्यरिंद ई वैकुंठलोकदल्लिद्द मूलरूपियाद श्रीहरिगू अवन रामकृष्णमोदलाद अवतारगळिगू सर्वत्रव्याप्तवाद अंतर्यामिरूपगळिगू भेद उंटेंदु एनु तिळियल्पट्टितो, अदु हागे तिळियतक्कद्दल्लवेंदु नावु चिंतिसुवेवु. याव माडबारदाद श्रीहरियल्लिय भेदद्दृष्टियन्नु नीवु माडिदरिंद, इन्नुमेले ई वैकुंठलोकदिंद केळगिरतक्क याव भूलोकदल्लि मूलमारे उत्पन्नरागतक्क ई श्रीहरिय शत्रुगळाद [हिरण्याक्ष हिरण्यकशिपु— रावण कुंभकर्ण— दंतवक्र शिशुपालरेंब] दैत्यर पापिदेहगळन्नु प्रवेशमाडरि, एंदु अर्थवु– ई श्लोकदल्लिय– वा– एंबदरिंद, ' पर्वतद मेल्भाग कोटियल्लि मेळ्गोरद मेळयनीरु ह्यागे अनेक बेरेबेरे सरळागुवदो अदरंते श्रीहरिय गुणगळिगू श्रीहरिगू मत्तू अवन मूलरूपक्कू अवतार अंतर्यामिमोदलाद रूपगळिगू बेरेबेरे भेदवेंदु यारु तिळियुवरो अवरिगादरू आ पर्वतदमेलिन कोटियल्लि मेळ्गोरद नीरु ह्यागे अधोगतियन्नु (केळगे बीळोणवन्नु (होंदुवदो– अदरंते अधोगतियु अंदरे अंधंतमःसु प्राप्ति यागुवदु ' एंदु काटकोपनिषत्तिनल्लिद्द श्रुतियु ई मेलेहेळिद श्लोकार्थक्के प्रमाणरूपवागिरुवंदु हेळल्पडुवदु. ॥ ३४ ॥

स्वतो जयविजयौ सचेतनाविति ध्वनयति तेषामिति तावुभौ हरेरनुचरौ जयविजयौ उरु बहु बिभ्यतइत्यन्वयः । ब्रह्मास्त्राद्यस्त्रपूगैरनिवारणं प्रतिषेद्धुमशक्यं घोरं तेषामितीरितं ब्रह्मदंडं ब्रह्मशापमवधार्य हृदि कृत्वा किंच तेषां पादौ गृह्णीत इति तत्पादग्रहावपततां भूमाविति शेषः । अतिकातरेणेति भयातिरेकं दर्शयति ॥ ३५ ॥

तेषामितीरितमुभाववधार्य घोरं तं ब्रह्मदंडमनिवारणमस्त्रपूगैः ॥ संद्यो हरेरनुचरावुरुबिभ्यतस्तत्पादग्रहावपततामतिकातरेण ॥ ३५ ॥

आ जयविजयरु स्वरूपतः सचेतन (योग्यचेतन) रेंदु प्रकटिसुवरु. ई हिंदिन-श्लोकदल्लि हेळिद, सनकादिगळ मातुगळन्नु इव्वरू जयविजयरु केळि इदु ब्रह्मास्त्रमोदलादसकल अस्त्रसमूहगळिंदलू तिरिगिसुवदक्के (नाशमाडुवदक्के) अशक्यवाद भयंकरवाद ब्रह्मदंडवु अंदरे ब्राह्मणरशापवु (नमगे बंदोदगितु) एंदु तिळिदु आ क्षणदले आ हरिभृत्यरु बहळे मनासिनालि अंजिकोंडु मेलादरू अंजिकोंडंते रूपवन्नु तोरिसुत्त अंदरे नडुगुत्त आ सनकादिगळ पादगळन्नु घट्टियागि हिडिदुकोंडु उद्दक्के दंडदंते साष्टांगनमस्कार माडिदरु– ॥ ३५ ॥

पादयोः पतित्वा ताभ्यां पुनःकिं कृतमत्राह भूयानिति हेचतुर्थाश्रमशिखामणयः भगवद्भिः भवद्भिरस्मत्कृतादघादपराधाद्धिहेतोः भूयान्महान् दंडोऽकारि युक्तएवायमिति ब्रुवाते यइति यो दंडो नावावयोः न केवलं युष्मदपराधमेवहरति । किंत्वशेषं यथातथा सुरहेलनं श्रीब्रह्मादिदेवावज्ञानमपि हरेत हर्तुं समर्थो भवति तत्रेदं भगवतः प्रार्थयावहे नावावयोरिह वैकुंठे स्थितयोरंशिनोर्वा युष्माकमनुतापकलया पश्चात्तापलेशेन पुनः पूर्ववत् भगवत्स्मृतिघ्नो भगवतो यथास्वरूपज्ञाननाशको मोहो मा भवेत् माभूत् कीदृशयोः युष्मच्छापेनाधोधोलोकादप्यधरलोकमासुरं व्रजतोर्गच्छतोरंशेनेति शेषः ॥ ३६ ॥

१. तदुत्तरक्षणएव ॥– (**या.**)

भूयानघाद्धि भगवद्भिरकारि दंडो यो नौ हरेत सुरहेलनमप्यशेषं ॥ मा वोनुतापकलया भगवत्स्मृतिघ्नो मोहोभवेदिह तु नौ व्रजतोरधोधः ॥ ३६ ॥ ॥ ॥ ॥ ॥ ॥ ॥

आ जयविजयरु सनकादिगळ पादगळमेलेविद्दु मुंदेनु माडिदरु एंदरे हेळुवरु– (जयविजयरु अंदद्दु) भो सन्यासिगळल्लि श्रेष्ठराद सनकादिगळे नावु तमगे अपराधमाडिदकारण अतिशयवाद दंडनवु तम्मिंद माडल्पट्टितु, आदरे अदु युक्तवेसरि, एंदु हेळुवरु यार्केंदरे– ई निम्म शापरूपवाद दंडनवु ईग्गे नाविब्बरू निम्मल्लिमाडिद अपराधवन्नुमात्र परिहरिसुवदेंदल्लवु, नावु हिंदक्के रमाब्रह्मादिदेवतिगळ अपमानमाडिद अपराधवन्नादरू यावत्तू परिहरिसुवदु. आदरे ईग्गे परमपूज्यराद तम्मन्नु ओंदुविषयवागि प्रार्थिसुवेवु– नावु तम्म अपराधमाडिदाग्गू पुनः स्वल्पु पश्चात्तापयुक्तराद्दरिंद तम्म शापानुसारवागि ई वैकुंठदिंद बहळे केळगिन लोकवाद भूलोकदल्लि नम्म अंशकलागळिंद असुरजन्मगळल्लि प्रवेशमाडुवेवु. आदरे ई वैकुंठलोकदल्लि मूलरूपदिंदिरतक्क नम्मगळिंग ब्रह्मदेवर शापदिंद ई स्वल्पुकालदिंद श्रीहरिविषयकस्मृतियन्नु नाशमाडतक्क मोहवु ह्यागे प्रवेशमाडुत्तित्तो, आप्रकार इन्नुमेले आ व्यामोहवु प्रवेशमाडदंते तावु परमानुग्रह माडबेकु. ॥ ३६ ॥

जयविजययोः सनकादीनां सल्लापो हरेः कर्णताडितः किं नाभूदत्राह एवमिति । द्वयोरप्यंशांशिविवक्षया बहुत्वात्स्वानामिति बहुवचनं एवं स्वानां स्वपार्षदानां सत्सु सनकादिषु अतिक्रमं प्रतिघातलक्षणमपराधं निशम्य निलयात् मुक्तस्थानात् तदैव तस्मिन् सप्तमकक्ष्यास्थाने स्थितांस्तान् ययावित्यन्वयः । स्वानां स्वभक्तानां सदतिक्रमं विद्यमानमपराधमितिवा आर्याणां ज्ञानिनां हृद्यो हृदयंगमः भगवदागमनं सनकादीनां पुण्याधिक्यंध्वनयति परमेति ॥ ३७ ॥

एवं तदैव भगवानरविंदनाभः स्वाना[१] विबुध्य सदतिक्रममार्यहृद्यः ॥ तस्मिन्ययौ परमहंसमहामुनीनामन्वेषणीयचरणो चलयन्सहश्रीः[२] ॥ ३७ ॥ ॥ ॥ ॥ ॥ ॥ ॥

जयविजयरिगू सनकादिगळिगू नडेद परस्पर संभाषणवु श्रीहरिय किविगे बीळल्लिल्लवेनंदरे हेळुवरु— ई श्लोकदल्लि स्वकीयराद जयविजयरु इव्वरे इद्दाग्गू ' स्वानां ' एंब बहुवचनवु आ जयविजयर अंशगळू अंशिगळू शेरि बहळाद्दरिंद बहुवचनवु युक्तवु— ईप्रकार सनकादिगळू जयविजयरू परस्पर संभाषणमाडुत्तिरुव समयदल्लि पद्मनाभनाद श्रीहरियु तन्न भृत्यराद

१. अस्माभिरल्पएवापराधः कृतः भवद्भिस्त्वसुराविष्टदेहत्रयप्राप्तिरूपो दंडः भूयान् कृतः अतः स पूर्वतनदेवावज्ञाजनितपापस्यापि प्रायश्चित्तरूपो भवत्वित्यनुग्रहः कर्तव्य इत्याशयः ॥– (**या.**)
२. स्वकीययोरित्यर्थः (**या.**) ३. सकलत्रेणैव गृहस्थेनातिथ्यभ्यागमनादिकं कार्यमितिदर्शयितुं श्रीरीक्षणेनापि ते धन्या भवंत्वित्याशयेन वा तथोक्तं (**या.**)

जयविजयरु सज्जनराद सनकादिगळिगे मार्गनिरोधमाडिद अपराधवन्नु केळि अथवा तन्न भक्तर विद्यमान [निजवागिद्द] अपराधवन्नु केळि, ज्ञानिगळ हृदयदल्लिद्द श्रीहरियें तन्न मूलस्थानवाद वैकुंठद मुक्तस्थानवेंब मंदिरदिंद परमहंसरे मोदलाद महामुनिगळु याव पादगळन्नु (बहुदिवस तपःसुमाडि) हुडुकुवरो; आ पादगळिंद नडेयुत्त, लक्ष्मीदेवियिंद सहितनागि अमुक्तस्थानद एळने गोपुरद्वारप्रदेशदल्लि निंतिद्द आ सनकादिगळन्नु कुरितु बंदनु. श्रीहरियु लक्ष्मीसहितनागि नडेयुत्त अल्लिगे बंदद्दु आ सनकादिगळ अतिशयपुण्योदयवेंदु प्रकटिसुवदु. ॥ ३७ ॥

रोषकलुषितशेमुषित्वात् भृत्यापराधं तत्स्वामिन्यारोप्य तस्मिन्नागते ते मुनयस्तिर्यक्दृष्टयोभूवन्किमत्राह तंत्विति । तुशब्दो रोषस्तात्कालिको मध्यंदिनचलनार्कवन्नतुचिरकालभावीति निरूपयति स्वपुंभिः स्वभृत्यैः प्रतिहृतं प्रत्यर्पितमौपयिकमुपायनादिसत्कारद्रव्यं यस्मै स तथोक्तः तं सहसोत्थायागमनात्संक्षिप्तवाहनादिगमनयोग्यसाधनं वा चक्षुर्विषयमित्यनेन प्राप्तां मायारूपभ्रांतिमुन्मूलयति स्वसमाधिगम्यमिति सच्चिदानंदलक्षणमपश्यन्नित्यर्थः तदानींतनवैभववैशिष्टयं वर्णयति हंसश्रियोरिति हंसवद्धवलश्रियोर्व्यजनयोः शिववायुना सुखस्पर्शवायुना लोलं चंचलं शुभ्रं धवलंवातपत्रं उष्णनिवारणछत्रं तदेव शशी चंद्रमास्तस्य केसरेभ्यो रश्मिभ्यः निसृतानि शीकराणिवा तास्त एव चांबूनि वारीणि यस्मिन्सशिववायुलोलशुभ्रातपत्रशशिकेसरशीकरांबुस्तं ॥ ३८ ॥

तं त्वागतं प्रतिहृतोपयिकं स्वपुंभिस्तेचक्षताक्षविषयं स्वसमाधिगम्यं ॥ हंसश्रियोर्व्यजनयोः शिववायुलोलशुभ्रातपत्रशशिकेसरशीकरांबुं ॥ ३८ ॥ ॥ ॥ ॥ ॥ ॥

आ सनकादिगळु आ कालदल्लि शिष्टिनिंद व्याकुलबुद्धियुळ्ळवरादकारण भृत्यरुमाडिद अपराधवु यजमाननिगे संबंधपट्टद्देंदु यजमाननल्लि आ अपराधद आरोपमाडि आ श्रीहरियु बरुत्तिरलु अवनन्नु आ मुनिगळु केट्टगण्णिले नोडिदरेनु एंदरे हेळुवरु— ई श्लोकदल्लिय 'तु' शब्दवु आ सनकादिगळ कोपवु मध्यान्हद सूर्यनु ह्यागे बहुतीव्रवागि चलिसुवनो आ प्रकार बहुवेळेइरदे तीव्र होगतक्कद्देंदु सूचिसुवदु. आ श्रीहरियु बंद वैभववन्नु वर्णिसुवरु— हंसपक्षिगळंते शुभ्रवर्णद कांतियुळ्ळ बीसणिकिगळ तंगाळियिंद अल्लाडु (अगळाडु) त्तिद्द उष्णनिवारकवाद श्वेतछत्रवेंब चंद्रन किरणगळिंद होरडुव संण संण अमृतबिंदुगळु तन्न मैमेले बीळुत्तिद्दु, मार्गदल्लि तन्न भक्तरिंद कोडल्पडुव पूजामाहित्यगळिंद पूजितनागुत्तिद्द तावु (सनकादिगळु) दिनालू यावनन्नु समाधियिंद नोडुत्तिद्दरो समाधियल्लि तोरुत्तिद्द आ श्रीहरियन्ने तम्म कण्णेदुरिगे कंडरु. ॥ ३८ ॥

कृत्स्नः पूर्णः प्रसादः प्रसन्नता यस्य स तत्तथा सुप्रशस्तमेवंविधं मुखं यस्य स तथा तं स्पृहणीयधाम कमनीयतेजःपुंजं इच्छाविषयस्थानं वा स्नेहोद्भूतयावलोककलया कटाक्षकलया भक्तानां हृदि संस्पृशंतं त्वगिंद्रियसुखं कुर्वंतं श्यामे इंद्रनीलरत्नकांतिनिभे पृथौ विस्तीर्णे उरसि शोभितया श्रिया श्रीवत्सरूपयात्मनश्चतुर्मुखस्य

१. केसरेभ्यो गलंति शीकरांबूनि कणभूतामृतानि यस्मिन् तथोक्तम्तं (**या.**)

धिष्ण्यं गृहस्थानीवरूपं । "कौस्तुभोब्रह्मणोरूपं प्राणश्चूडामणिस्तथे-" ति वचनात् । स्वग्रीवायां स्थितं मणिं कौस्तुभं नाम सुभगयंतमिव विकासयंतमिव स्थितं ३९

कृत्स्नप्रसादसुमुखं स्पृहणीयधाम त्स्नेहावलोककलया हृदि संस्पृशंतं ॥ श्यामे पृथावुरसि शोभितया श्रिया स्वग्रीवामणिं सुभगयंतमिवात्मधिष्ण्यं ॥ ३९ ॥ ॥ ॥ ॥ ॥ ॥

आ सनकादिगळु कंड श्रीहरियन्ने वर्णिसुवरु— संपूर्ण प्रसन्नतेयिंद मनोहरवाद मुखवुळ्ळ, अतिमनोहरतेजःपुंजनाद, अथवा–एल्लरू अपेक्षेमाडुवदक्के मूलविषयनाद, अंतःकरणद कटाक्षद लेशदिंद भक्तर हृदयदल्लि त्वगिंद्रियद परमानंदवन्नु कोडतक्क, इंद्रनीलमणियंते कांतियुळ्ळ विस्तीर्णवाद वक्षस्थलदल्लिद्द लक्ष्मीस्वरूपवाद श्रीवत्सचिन्हदिंद ब्रह्मदेवनिरुवदक्के मूलस्थानवाद कौस्तुभमणियन्नु प्रकाशमाडुवंते इद्द (श्रीहरियन्नु सनकादिगळु कंडरु,) कौस्तुभरत्नवु ब्रह्मदेवन रूपवेंतलू वायुदेवनु चूडामणियंतलू प्रमाणविरुवदु–॥ ३९ ॥

पीतांशुकं पृथुनितंबमधिपीताबरावीतविस्तीर्णकटितटोपरि स्फुरंत्या सहस्रगुणया कांच्या अलिभिर्विरुतया शब्दितया वनमालया च शोभमानं वल्गुनि सुंदरे प्रकोष्ठे मणिबंधस्थाने वलयः कंकणो यस्य स तथा तं इतरेण दक्षिणेन करेणाब्जं कमलं धुनानं कंपयंतं ॥ ४० ॥

पीतांशुकं पृथुनितंबमधिस्फुरंत्या कांच्यालिभिर्विरुतया वनमालया च ॥ वल्गुप्रकोष्ठवलयंविनतासुतांसेविन्यस्तहस्तमितरेण धुनानमब्जं ॥ ४० ॥ ॥ ॥ ॥ ॥ ॥ ॥

रश्मियपीतांबरवन्नु धरिसिद, विशालवाद कटिपश्चाद्भागदमेले अत्यंत प्रकाशमाडुव सहस्रएळिगळुळ्ळ नडिवड्याणदिंदलू, भ्रमरगळिंद झंकारयुक्तवाद कमलगळ वनमालेयिंदलू शोभिसुव, सुंदरवाद मुंगैगळल्लि कंकणगळिंद शोभिसुत्तिरुव तन्न एडगैय्यन्नु गरुडन हेगलमेले इट्टुगोंडु बलगैयिंद कमलवन्नु तिरुवुत्तिद्द (श्रीहरियन्नु सनकादिगळु कंडरु.) ॥ ४० ॥

कांत्यादिगुणैर्विद्युतं क्षिपती निरस्यती मकराकारकुंडले विद्युत्क्षिपन्मकरकुंडले तयोर्मंडनार्हे अलंकारयोग्ये गंडस्थले यस्मिंस्तत्तथा तच्चोन्नसं उन्नतनासिकं मुखं च यस्य स तथा तं प्रशस्ता मणयोस्यसंतीति मणिमत्तादृशं किरीटं यस्य स तथा तं दोर्दंडानां खंडस्य समूहस्य विवरे मध्ये चरता वर्तमानेन परार्ध्यहारेण अनर्घ्यमुक्तामालया कंधरगतेन कंठालंबिना कौस्तुभेन मणिना च युक्तं एवंविशिष्टभगवंतमचक्षतेति पूर्वेणान्वयः ॥ ४१ ॥

१. विनतासुतो गरुडः तदंसे विन्यस्तबामहस्तं (**या.**)

विद्युत्क्षिपन्मकरकुंडलमंडनार्हगंडस्थलोन्नसमुखं मणिमत्किरीटं ॥ दोर्दंडखंडविवरे चरता परार्घ्यहारेण कंधरगतेन च कौस्तुभेन ॥ ४१ ॥ ॥ ॥ ॥ ॥ ॥ ॥

कांतिये मोदलाद गुणगळिंद मिंचन्नु तिरस्करिसुव मकराकारवाद कुंडलगळिंगे अलंकारयोग्यवाद कपोलप्रदेशगळुब्बळ मत्तू स्वल्प एत्तरवाद नासिकायुक्त मुखवुळ्ळ, मनोहर मणिगळुब्बळ किरीटवन्नु धरिसिद. मुजगळसमूहमध्यदल्लि चलिसुत्तिरुव अमौल्यवाद मुत्तिन मालेयिदलू कंटदल्लि शोभिसुव कौस्तुभरत्नदिंदलू युक्तनाद, इंथ अलंकारगळुब्बळ श्रीहरियन्नु आ सनकादिगळु कंडरेंदु पूर्वश्लोकदिंद अन्वयवु. ॥ ४१ ॥

योंतर्गर्भितभक्त्युद्रेको भगवद्दर्शनानंतरं बहिरपि निर्गतइति भावेनाह अत्रेति ते मुनयो हरेरंगं वीक्ष्य मुदा न वितृप्तदृशः अलंबुत्थ्यप्राप्तनेत्राः कैः शिरोभिर्नेमुरनाधारदंडवत् भुवि पेतुरित्यर्थः अंगांगिनोरणुरपिभेदो नास्तीति तस्येतिविशेष्यावचनमित्यतस्तदंगं विशिनष्टि अत्रेति चशब्दोप्यर्थः यथा ब्रह्मादिभिराराध्येंदिरायाः लक्ष्म्या अपि अत्रास्मिन्काले उपसृष्टमुद्भूतमित्युत्स्मृतं यद्वात्र केशादिपादावयवविशिष्टे वपुषि इदं मयोपसृष्टमवसितं निश्चितं नातःपरमिति तथापि स्वानां स्वभक्तानां धिया विरचितं स्मृतं केचित्स्वदेहांतर्हृदयावकाशे "प्रादेशमात्रं पुरुषं वसंत-" मित्यादिना । "अविद्यमानकरणं विद्यमानस्मृतिस्तथा । उभयंरचनंप्रोक्तं पूर्वसिद्धेषु तु स्मृति-" रित्यभिधानाच्च । तस्माद्रचनाशब्दस्य स्मरणार्थं च सिद्धं इतोपि भक्तधिया स्मृतं न कृतं कृतस्य न्यूनातिरेकसंभवादिति भावेनाह बव्हिति । "विपुलानेकयोर्बहु-"रितिवचनादनंतसौंदर्यादिगुणपूर्णं इतोपि मायारचितं नेत्याह मह्यमिति मह्यं मम प्रदर्शितमितिवा ॥ ४२ ॥

अत्रोपसृष्टमिति चोत्स्मृतमिंदिरायाः स्वानां धिया विरचितं बहुसौष्टवाढ्यं ॥ मह्यं भवस्य भवतां च भजंतमंगं नेमुर्निरीक्ष्य नवितृप्तदृशो मुदा कैः ॥ ४२ ॥ ॥ ॥ ॥ ॥

आ सनकादिगळ हृदयदल्लि अदूवरेगे मुच्चिगोंडिद्द श्रीहरिय भक्त्युद्रेकवु आ परमात्मन दर्शनानंतरदल्लि होरगादरू तोरिसेंब अभिप्रायदिंद हेळुवरु— आ सनकादिगळु श्रीहरिय देहवन्नु नोडि संतोषदिंद एष्टु नोडिदाग्यू कण्णुगळिंगे तृप्तियागदे, एनु आश्रयविल्लद दंडवु (कोलु) ह्यागे तत्कालके केळगे बीळबेको अदरंतेये शिरःसुगळिंद आ श्रीहरिय पादगळल्लि बिदरु. अंदरे साष्टांगनमस्कारमाडिदरेंदर्थवु— आ श्रीहरिय देहक्कू अवनिगू भेदविल्लवेंदु तोरिसुवदक्के ई श्लोकदल्लि— 'तस्य' आ श्रीहरिय— एंबशब्दप्रयोगमाडदे अवन देहवन्नु वर्णिसुवरु— इल्लिय 'च' शब्दवु — 'अपि' आदरू— एंब अर्थवन्नु हेळुवदु— ब्रह्मादिगळिंद पूज्यळाद रमादेविगादरू आ समयक्के सनकादिगळ समीपदल्लि प्रकटवाद भगवद्रूपवन्नु ४५३

१. इंदिराया अपि उत्कृष्टस्मयोज्ञातइति (या.)

कंडु आश्चर्यवायितु (अत्यंतचित्तोद्रेकवायितु) अथवा— आ एदुरिगे तोरतक्क केशगळारंभिसि पादपर्यंतवाद स्वरूपवन्नु नोडि इदे स्वरूपवे नन्निंद निश्चतवादद्दु, इदक्कू हेच्चिन रूपवु ननगे सहतोरिल्लवेंदु चित्तोद्रेकवायितु. आदाग्यू ई स्वरूपवु तन्न भक्तर बुद्धियिंद 'विरचितं' हिंद द्वितीयस्कंधद द्वितीयाध्यायदल्लि 'केलवरु तम्म हृदयावकाशदल्लि ओंदु प्रादेश परिमितवाद भगवद्रूपवन्नु चिंतिसुवरु—' एंदु हेळिदंते, चिंतिसल्पडुवदु, ओळ्ळेदु इल्लि 'विरचितं' एंब शब्दक्के माडिदु एंदु अर्थमाडुवदु बिट्टु चिंतितवेंदर्थवु ह्यागे आयितेंदरे 'पूर्वदल्लि इल्लद वस्तु विषयक्के 'विरचितं' एंब शब्दप्रयोगविद्दरे अल्लि—माडिदु एंदर्थवु— पूर्वदल्लि इद्द वस्तुविषयक्के विरचितशब्दप्रयोगविद्दरे आ वस्तुविन स्मृति यंदर्थवु. ई एरडू रचने एंदेनिसुववु. पूर्वदल्लि सिद्धवाद वस्तुविषयदल्लि विरचितं एंब प्रयोगक्के, स्मृतिः एंदु अर्थमाडबेकु' एंदु शब्दनिर्णयग्रंथद प्रमाणानुसार विरचितं—एंब शब्दक्के— स्मरण=चिंतिसु एंब अर्थवु (श्रीहरिय देहवु अनादिकालदिंद सिद्धवाद्दु भक्तर हृदयदल्लि अवर चिंतनदल्लि रचितवाद्देंदु) सिद्धवायितु— भक्तर बुद्धियिंद स्मरणेमाडल्पडुवदे होर्तु रचनेमाडल्पडुवदिल्ल रचितवाद्दु हेच्चुकडिमे यागुवदु एंब अभिप्रायदिंद इन्नादरू हेळुवरु— आ परमात्मन स्वरूपवु अपरिमितसौंदर्यमोदलाद गुणगळिंद पूर्णवाद्दु आदरू ई स्वरूपवु मायारचितवाद्दल्लवेंदु हेळुवरु— (ब्रह्मदेवनु देवतिगळिंगे हेळुवनु) ननगे श्रीहरियु याव रूपवन्नु तोरिसिद्दनो नानु याव रूपवन्नु भजिसुवनो रुद्रदेवनु यावश्रीहरिय रूपवन्नु भजिसुवनो, नोडिरुवनो, निम्मेल्लरिंदलू भजिसुवदक्के योग्यवाद, नोडतक्क भगवद्रूपवन्ने सनकादिगळु नोडि नमस्कारमाडिदरु—॥ ४२ ॥

अर्थक्रियाकारित्वान्नेदं मायारचितमित्याह तस्येति स्वविवरेण स्वनासिकारंध्रेणांतर्गतःप्रविष्टस्तस्य हरेः पदारविंदयोः किंजल्कैः केसरैरिवस्थितैः रजोभिर्मिश्रा संपृक्ता या तुलसी तस्याः मकरंदेन मधुना युक्तो मंदो वायुस्तेषां सनकादीनां चित्ततन्वोः संक्षोभं कंचन विकारं चकारेत्यन्वयः विकारानुत्पत्तौ कानुपपत्तिरिति-तत्राह अक्षरजुषामिति वैराग्यादिगुणैरक्षरजुषां ब्रह्म सेवतां न्यासिनामपि अनेन यद्यप्यपूर्वविकारसंभावनाप्राप्तिर्नास्ति तथापि हरिचरणार्पिततुलसीमहिमातिशयद्योतनाय मनोविकासलक्षणविकारादानंदाश्रुधारासंपातस्तदनुसंक्षोभाद्रोमांच इति सूचितं क्षुभसंचलन इति धातोः ॥ ४३ ॥

तस्यारविंदनयनस्य पदारविंदकिंजल्कमिश्रतुलसीमकरंदवायुः॥अंतर्गतः स्वविवरेण चकार तेषां संक्षोभमक्षरजुषामपि चित्ततन्वोः ४३

सनकादिगळिंगे तोरिद ई भगवद्रूपवु अर्थक्रियाकारि (केलसक्क उपयोग) आद्दरिंद मायारचितवेंदल्लवेंब अभिप्रायदिंद हेळुवरु— आ कमलदंते विशालवाद नेत्रगळुळ्ळ श्रीहरिय पादकमलदल्लिद्द कमलदकेसर (कुसुरु) गळंते शोभिसुव धूळिगळिंद मिश्रवाद तुलसिय, मकरंदयुक्तवाद मंदवायुवु, आ सनकादिगळ नासिकारंध्रदिंद ओळगे प्रवेशमाडि, अवर चित्तवन्नू शरीरवन्नु ओंदुतरद विकारहेंदिसितु. आ सनकादिगळ मनोविकारवागदे इरुवदक्के एनु अननुकूलतेयु! अवर मनःसादरू याके विकारियागबारदु' एंदरे हेळुवरु— 'अक्षरजुषां ई सनकादिगळु वैराग्यादिगुणगळिंद नाशरहितवाद परब्रह्मवस्तुविनन्नु उपासने माडतक्क सन्यासिगळु, इंथ विरक्तरिगूसह मनोविकारवुंटायितु एंदु हेळुवदरिंद, यद्यपि अल्लि एंदूइल्लद विकारसंभविसतक्क विषयवु बरुवंतेइल्ल आदाग्यादरू श्रीहरिचरणगळल्लि अर्पितवाद तुलसिय आतिशयमहिमेयन्नु तोरिसुवदक्के (अहा! इंथ अतिशय विषयविरक्तराद सनकादिगळिगूसह श्रीहरियि पादद्दल्लिद्द

तुलसीमकरंदवायुवु मनोविकारहोंदिसितल्ल एंदु तिळिसुवदक्के) हेळल्पट्टित्तु. इदरिंद अवर मनोविकारहोंदिदु ह्यागे तोरितेंदरे--आकूडले अवर मनःसु पक्कवागि विलक्षणानंदहोंदि कण्णुतुंबा नीरुबंदु आनंदबाष्पगळु उदरहत्तिदवु. अदर मंगडले मैनडगुत्त रोमांचगळु उब्बिदवु इदे आ मनोविकारद विलक्षणानंदद, सूचनेयु. ' क्षुभ ' एंब धातुवु अगळिसु (अल्लाडिसु) एंब अर्थहेळुवदु.-॥ ४३ ॥

मनश्चलनेनेंद्रियचलनं तस्मात्तनोः संचलनमिति नियमादतोऽयमपि कश्चन संक्षोभ इति ध्वनयन्नाह तेवाइति। यो नित्यं स्वहृदि अंतरेऽपरोक्षीक्रियते स एवायमित्यतोमुष्येति षिञ्बंधन इतिधातोः सितं बद्धं मुकुलितं असितं नवोत्फुल्लं वदनमेवासितपद्मकोशमन्यथा सितं शुक्लं असितं कृष्णमिति शापप्रदानस्यानभीष्टत्वेन मुखस्य काष्ण्यं जातं तदयुक्तमुत्तरत्र शापानुमतिप्रतीतेः। यद्वा नेत्रयोर्नीलिमवर्णत्वेन तद्युक्तत्वात् वदनाख्यनीलपद्मकोशमुद्वीक्ष्य स्वयं वामनत्वाद्धरेः प्रांशुत्वादूर्ध्वमुखाः दृष्ट्वा लब्धाशिषः भगवदवयवेषु मुख्यमुखदर्शनात् प्राप्तपुण्योच्चयाः सुंदरतराधरश्च कुंदवद्वल्गुहासश्च यस्मिन्स तथा तं पुनर्मुखदर्शनानंतरं नखाएवारुणा रक्तामण्यस्तेषा श्रयणं आश्रयणं आश्रयं तदीयमंघ्रिद्वंद्वमवेक्ष्यावाङ्मुखादृष्ट्वा मुखमारभ्य पादाद्यंतं सर्वांगमवलोक्य नितरांदध्युरित्यन्वयः हृदि चनिदध्युः आलोकयन्निति वा बहिष्टस्य हृद्गतस्य चैकत्वमपश्यन्नित्यर्थः ॥४४॥

ते वा अमुष्य वदनासितपद्मकोशमुदीक्ष्य सुंदरतराधरकुंदहासं ॥ लब्धाशिषः पुनरवेक्ष्य तदीयमंघ्रिद्वंद्वं नखारुणमणिश्रयणं निदध्युः ॥ ४४ ॥ ॥ ॥ ॥ ॥ ॥ ॥

मनःसु चलनवागुवदरिंद इंद्रियगळु चलितवागुवु, अदरिंद शरीरवु चलितवागुवदु, एंदु नियमविद्दकारण (ई मनकादिगळ मनोल्हादवादुदु) इदू ओंदुतरद विलक्षण मनोविकारवे एंदु प्रकटिसुत्तहेळुवरु— षिञ्- एंबधातुवु बंधनार्थवन्नु हेळुवदरिंद. ' अमुष्य '= मनकादिगळु निरंतरदल्लि याव श्रीहरियन्नु तम्म हृदयकमलदल्लि अपरोक्षदिंद नोडुत्त भक्तिशृंखलागळिंद बंधनमाडिद्दरो अदे होरगे तोरुत्तिद्द श्रीहरिय ' सुंदरतराधरकुंदहासं ' अत्यंतसुंदरवाद केळदुटियू कुंदपुष्पदंते मनोहरवाद मंदहास्यवू इवुगळुळ्ळ ' वदनासितपद्मकोशं ' सितं= मुदडिकोंडिद्द असितं= होसदागि अरळिद एंदर्थवु- अरळिद कमलदंतिद्द मुखमंडलवन्नु नोडि एंदु हीगे अर्थमाडतक्कद्दे होर्तु असितं= कृष्णवर्णवुळ्ळ मुखवेंदु अर्थमाडिदरे- (सनकादिगळु) इवरु (जयविजयरिगे) तन्न भृत्यरिगे शापकोट्टद्दरिंद अदु तनगे विरुद्धवादकारण इवरमेले शिट्टाद्दरिंद मुखवु कप्पगागित्तेंदु तोरितु; अदु प्रकृतक्के अनुपयुक्तवु यार्केंदरे आ जयविजयरिगे इवरु शापकोट्टद्दक्के श्रीहरियु सम्मतिव्रट्टसंगतियु मुंदे हेळल्पडुवदु अथवा नीलवर्णद नेत्रगळुळ्ळद्दरिंद करेकमलदंते तोरुव मुखमंडलवन्नु तावु गिड्डागिद्दरिंदलू श्रीहरियु यत्तरवागिद्दरिंदलू तम्म मोरेयन्नु मेलक्के माडिकोंडु नोडि, श्रीहरिय अवयवगळल्लि मुख्यवाद मुखवन्नु नोडिद्दरिंद, तावु संपादिसिद पुण्यफलवन्नु होंदि; मुखवन्नु नोडिदमेले पुनः उगुरुगळेंब केंपुमणिगळिगे आश्रयवाद एरडु पादगळन्नु

केळगे मोरेमाडिकोंडु नोडि. आ श्रीहरिय मुखमोदलुमाडि पादपर्यंतवाद सर्वांगवन्नू चन्नागि नोडि अत्यंतवागि ध्यानमाडिदरु मत्तू अवनन्नु हृदयदल्लिट्टुगोडरु अथवा हृदयदल्लियू नोडिदरु. होरगे निंतिद्द आ श्रीहरिगू तम्म हृद्गतनाद श्रीहरिगू ऐक्यदिंद नोडिदरेंदर्थवु. ॥ ४४ ॥

मनःसंकल्पेन वागिंद्रियप्रवृत्तिदर्शनादयमपि कश्चन संक्षोभः संजात इत्यभिनयंतस्तुवंतीत्याह पुंसामिति । ध्यानास्पदं उपासनाविषयं बहुपूर्णतायामितिधातोः बहुत्वेन पूर्णत्वेन मतं ज्ञातं नयनान्यभिरमयति सुखयति इति नयनाभिरामं एवंविधं तद्वपुः दर्शयानं दर्शयंतं अनन्यसिद्धैरन्यैरननुभूतैरौत्पत्तिकैः सहजैरष्टभोगैरणिमाद्यष्टैश्वर्यैर्युतं मिश्रितमभिन्नं हरिं समगृणन्नित्यन्वयः गृणस्तुताविति धातुः ॥ ४५ ॥

पुंसां गतिं मृगयतामिह योगमार्गैर्ध्यानास्पदं बहुमतं नयनाभिरामं ॥ ते तद्वपुर्दर्शयानमनन्यसिद्धैरौत्पत्तिकैः समगृणन्युतमष्टभोगैः ॥ ४५ ॥ ॥ ॥ ॥ ॥ ॥

मनःसिनल्लि संकल्पहुट्टुवदरिंद बायिंद माताडुवदक्के उद्योगवु कंडद्दरिंद मनकादिगळिगे भगवद्दर्शनदिंद इदू वंदुतरद मनोल्हादवुंटायितेंदु तोरिसुत्त श्रीहरियन्नु स्तोत्रमाडुवरेंदु हेळुवरु— ' इह- ' ई ब्रह्मसृष्टियल्लि उत्पन्नरादवरल्लि, योगमार्गगळिंद मोक्षवन्नु हुडुकुतक्क जनरिगे उपासनाविषयनाद (ध्यानमाडिसिगोळ्ळुवदक्के योग्यनाद) बहुएंब धातुवु पूर्णार्थवन्नु हेळुवदरिंद- बहुमतं- गुणपूर्णनेंदु तिळियल्पट्ट, तन्नन्नु नोडतक्कवर नेत्रगळिगे आनंददायकवाद तन्न शरीरवन्नु तोरिसितक्क, तन्न होर्तु एरडनेदवरिंद अनुभोगमाडल्पडदिद्द सहजवाद अणिमामोदलाद अष्टैश्वर्यगळिंद पूर्णनाद आ ऐश्वर्यस्वरूपनाद श्रीहरियन्नु आ सनकादिगळु स्तोत्रमाडलारंभिसिदरु- गृण एंब धातुवु स्तोत्रमाडु एंबअर्थ हेळुवदु. ॥ ४५ ॥

गुरूपदिष्टगुणानुसंकीर्तनरूपत्वादियं स्तुतिः पारमार्थिकी न लौकिकीत्याशयेनाह योंतर्हितइति । त्वं दुरात्मनामशुभमनस्कानां हृदि गतोपि अंतर्हितोसि अत्यंतसमीपवर्तिनोऽदर्शनवचनं स्तुतित्वाद्युज्यतां नाम न परमार्थतइत्यतउक्तमनंतराद्धइति अनवसितमाहात्म्यादिदमपि किंचनमाहात्म्यमित्यर्थः स त्वमद्य नो नयनमूलमेषि चक्षुर्विषयं गतोसि किं गुणविशिष्टत्वेनेत्यत आह यर्हीति । भवत उद्भवो जननं यस्य स तथा तेन नः पित्रा नाम्ना ब्रह्मणा यर्हि येन लक्षणेनानुवर्णितरहः यथावदुपदिष्टरहस्यः हरिरस्मत्कर्णविवरेण हृदयगुहां गतो भूत्वा तल्लक्षणाविशिष्टत्वेनेति शेषः अनेन सच्चिदानंदलक्षणं भगवंतमद्राक्षन्नतु मायामयमित्युक्तं भवति एवकारेणोपदिष्टदृष्टयोरूपयोरेकत्वं द्रढयति ॥ ४६ ॥

कुमाराऊचुः ॥ योंतर्हितो हृदिगतोऽपि दुरात्मनां त्वमद्यैषि नो नयनमूलमनंतराद्धः ॥ यर्ह्येव कर्णविवरेण गुहां गतो नः पित्रानु वर्णितरहो भवदुद्भवेन ॥ ४६ ॥ ॥ ॥ ॥ ॥ ॥

सनकादिगळु श्रीहरियन्नु स्तोत्रमाडुव ई स्तुतियु तम्म गुरुगळु तमगे उपदेशमाडिद श्रीहरिय गुणगळ संकीर्तनस्वरूपवादकारण लौकिकरीतियिद औपचारिकवल्लवु पारमार्थिकवे (सत्यवादुदे) एंब अभिप्रायदिंद हेळुवरु— सनकादिगळु अंदु– हे श्रीहरिये– नीनु अमंगलमनःसुळ्ळ दुष्टजनर हृदयदल्लिद्दाग्यू अदृश्यनागिरुवि. अत्यंतसमीपदल्लिरतक्कवनु तोरुवदिल्ल-वेंब मातु इदु स्तुतिप्रसंगवाद्दरिंद संभविसिगोळ्ळलि (इरलि) निजवाद संगतियल्लवेंदरे हेळुवरु--- ' अनंतराद्धः ' एनू उळियदंइद्द अघटितघटकमाहात्म्येयुळ्ळवनाद्दरिंद आ माहात्म्य गळल्लि इदू ओंदु अंशदशमाहाभ्येयंदर्थवु, इंथ माहात्म्ययुळ्ळ नीनु ईदिवस नम्म कण्णेदुरिगे बंदिरुवि अंदरे नम्म कण्णिगे तोरुवि. याव लक्षणवुळ्ळवनागि नमगे तोरुवि एंदरे— निन्निंद (श्रीहरियिंद) उत्पन्ननाद आ ब्रह्मदेवनेंब हेसरुळ्ळ नम्म तंदेयिंद नीनु याव याव स्वरूपलक्षणवुळ्ळवनेंदु रहस्यदिंद उपदिष्टनागि नम्म किविगळ रंध्रदिंद हृदयगुहावन्नु प्रवेशमाडि इदूवरेगे नम्मिंद ध्यानमाडिसिगोळ्ल्पट्टिद्दियो, अदे प्रकारवे ईग्ये नम्म कण्णिगे तोरुवि. हींगे हेळुवदरिंद ई सनकादिगळु सच्चिदानंदस्वरूपियाद श्रीहरियन्ने कंडरेंदर्थवे होर्तु माया-मयरूपवन्नु कंडरेंदल्ल. ई श्लोकदल्लिय ' एव ' कारदिंद सनकादिगळिगे ब्रह्मदेवनु उपदेशमाडिद भगवद्रूपवू अवरु कण्णिलेकंड भगवद्रूपवू एकप्रकारवादद्देंदु दृढपडिसुवदु. ॥ ४६ ॥

विदितैर्लब्धैर्दृढैर्बलैर्भक्तियोगैर्विरागाविषयेषु शोभनाध्यासबुद्धिविधुराः अतएवोद्ग्रंथयउन्मूलिताहंकारबंधाः उत्पाटितपुत्रभार्यादिस्नेहरूपहृदयग्रंथयोवा मुनयः सर्वज्ञाः इतोपि नेदंतत्कालोपपन्नमायामयरूपं किंतु साक्षाज्जगज्जन्मादिकारणमितिभावेन स्तुवंतीत्याह तंत्वामिति । हेभगवन्नः पित्रा जन्मादिकारणत्वेनोपदिष्टः तथेदानीं चक्षुर्विषयश्च तं त्वां परमात्मनः परब्रह्मणस्तत्त्वमनारोपितं रूपं विदाम विद्मः कीदृशं त्वां संप्रति इदानीमेषां लोकानां सत्वेनगुणेन रतिं सुखं रचयंतमुत्पादयंतं सृष्टयादौ प्रवर्तमानस्यानारोपितरूपत्वे किंप्रमाणमित्याशंक्य सम्यग्ज्ञानिज्ञानं मानमित्याहुरित्याह यत्तइति तवानुभावस्य जगत्सृष्ट्यादिमहिम्नोनुभावेन निश्चयज्ञानेन परमहंसाः यत्तत्वं विदुरुपास्यापरोक्षीकुर्वते तादृक्तत्त्वात्मकं त्वां विद्मइत्यन्वयः ॥४७॥

तं त्वां विदाम भगवन्परमात्मतत्त्वं सत्वेन संप्रति रतिं रचयंतमेषां ॥ यत्तेनुभावविदितैर्दृढभक्तियोगैरुद्ग्रंथयो हृदि विदुर्मुनयोनुरागाः ॥ ४७ ॥ ॥ ॥ ॥ ॥ ॥

ई कण्णेदुरिगे तोरुव भगवद्रूपवु तत्कालक्के (योग्यवाद) उपयुक्तवाद मायामयस्वरूपवेंदल्लवु, इदे साक्षाज्जगज्जन्मादिकारणवाद रूपवेंब अभिप्रायदिंद इन्नादरू स्तोत्रमाडुवरु एंदु हेळुवरु— ' हे भगवन् ' हे श्रीहरिये नम्म तंदेयाद ब्रह्मदेवनिंद नीने जगज्जन्मादिकारणनेंदु यावप्रकारकेळिद्देवो अदेप्रकार ईग्ये नम्म कण्णिगे तोरिद नित्तन्ने अनारोपितवाद अंदरे यथार्थस्वरूपियाद परब्रह्मनेंदु तिळियुवेवु. मत्तू नित्त स्वरूपवु यावप्रकारद्दंदरे—ईग्ये ई लोकगळिगे सत्वगुणदिंद सुग्ववन्नुंटुमाडतक्कदु सृष्टिमोदलावुगळल्लि उद्युक्तनादवनम्वरूपवु आरोपितवागदे यथार्थवेंबविषयक्के एनु प्रमाणवेंदरे यथार्थज्ञानिगळ ज्ञानवे प्रमाणवेंदु हेळुवरु—नित्त जगत्सृष्ट्यादिमहिमेगळ निश्चयज्ञानदिंद दृढवाद भक्तियन्नु होंदि वैराग्यक्के संबंधपडदे इद्द वस्तुगळाल्लि इदु (ई वस्तुवु) हितकर-वादद्देंब बुद्धियन्नु परित्यजिसि ' उद्ग्रंथयः आद्दरिंदले अहंकारबंधवन्नु एनूइल्लदंते (बेरुदशिले) कित्तिहाकि अथवा हेंडति मक्कळु तम्मवरेंब स्नेहरूपवाद हृदयग्रंथियन्नु कित्तिहाकिद सर्वज्ञराद

परमहंसरु याव नित्त यथार्थस्वरूपवन्नु तिळिदु उपासनेमाडि अपरोक्षहोंदिरुवरो अदे यथार्थस्वरूपवुळ्ळ नित्तन्नु नावु तिळिदिरुवेवु. (कंडिरुवेवु) एंदर्थवु. ॥ ४७ ॥

इतोप्युपनिषत्कामिन्या परिष्वक्तं ब्रह्म त्वमेव यतो भगवत्कथारसायनस्वादुज्ञा मुक्तावानंदसमृद्धिहेतुभूतभक्तिज्ञानमंतरेण दर्शनमात्रेणापरिपक्वभक्तिज्ञानानां पुंसां योग्यां मुक्तिं नाकांक्षतइत्याह नात्यंतिकमिति आत्यंतिकं प्रसादं भगवद्दर्शनमात्रेण लिंगशरीरात्ययसमये विद्यमानभक्तिज्ञानपरिपाकाभावात् सम्यगनभि-व्यक्तानंदं मोक्षमपि न विगणयंति विशिष्टोयमिति न बहुमन्यंते भक्तिज्ञानपरिपाकात् किंचित्पूर्वंच मुच्यते । दर्शनेन हरेस्तत्र नानंदः पूर्णतां व्रजे-दितिवचनात् तव भक्त्या कथामृतपानतृप्तत्वात् भ्रुवउन्नयैरुज्जृंभणविशेषैरर्पितभयमन्यत्पारमेष्ठ्यादिपदं किंच किमु वक्तव्यं कुशलाइत्यनेन "मुमुक्षोःकेवलोभक्तो मुक्तावपिसुखीभवे-"दित्यतो मोक्षेच्छुभ्योऽनपेक्षकाणां मुक्तावानंदोद्रेकः स्यादितिभक्त्यापादनमेव साधीयानिति बुद्धिपाटवं सूचयति कीर्तन्यं कीर्तनीयं तीर्थं शुद्धं यशो यस्य स तथा तस्य अत्र मुक्तीनां बाहुविध्यात्तदधिकारिणांच तथात्वान्मुक्तावपि भेदःपारमार्थिकः तद्दातुरेकत्वेनाणुरपि स्वगतो भेदो नास्ति अनेकत्वे मिथो वैषम्येण नाश्यत्वापत्तेः प्रमाणविरोधाच्चेतिद्योतितं ॥ ४८ ॥

नात्यंतिकं विगणयंत्यपि ते प्रसादं किंचान्यदर्पितभयं भ्रुव उन्नयैस्ते ॥ येंग त्वदंघ्रिशरणा भवतः कथायाः कीर्तन्यतीर्थयशसः कुशला रसज्ञाः ॥ ४८ ॥ ॥ ॥ ॥ ॥ ॥

इन्नादरू उपनिषत् एंब कामिनीस्त्रीयिंद दृढालिंगितनाद (अंदरे उपनिषत्गळिंद दृढवागि हिडियल्पट्ट मुख्यप्रतिपाद्यनाद) परब्रह्मवस्तुवु नीने आदकारण नित्त कथेगळेंब रसायनद रुचियन्नु बल्लवरु; मुक्तियल्लि आनंदसमृद्धियागुवदक्के कारणवाद, श्रीहरिय चरणारविंदद भक्तिज्ञानगळन्नु बेडुवदु बिट्टु आ श्रीहरिय दर्शनमात्रदिंदले भक्तिज्ञानगळ परिपाकविल्लद पुरुषरिगे योग्यवाद मुक्तियन्नु अपेक्षिसुवदिल्लवेंदु हेळुवरु–' हे अंग ' परमप्रीत्यास्पदनाद श्रीहरिये याव भक्तरु मकलप्रकारदिंदलू नित्त पादकमलवन्ने शरणागतरागिरुवरो अवरु, कीर्तनमाडुवदक्के योग्यवाद पवित्रकरवाद यशःसुळ्ळ नित्त कथेय रसज्ञानवुळ्ळवराद्दरिंद कुशलरागि ' आत्यंतिकं प्रसादं ' (तमगिंत अधमाधिकारिगळिगे भगवद्दर्शनमात्रदिंद आत्यंतिकप्रसादवुंटागि आगुव मोक्षवु तमगे) भगवद्दर्शनदिंद लिंगशरीर भंगवागुवसमयदल्लि इरतक्कष्टु भक्तिज्ञानगळ परिपाकविल्लद्दरिंद सारियागि प्रकटवागदेइद्द आनंदवुळ्ळ मोक्षवन्नादरू इदु श्रेष्ठवादद्देंदु गणनामाडुवदिल्लवु. ' भक्तिज्ञानगळु परिपक्कवागदे स्वल्पु पूर्वदल्लिये भगवद्दर्शनदिंद केलवरु मुक्तरागुवरु. आदरे अवरिगे मुक्तियल्लि आनंदवु पूर्णवागुवदिल्लवु ' एंब ब्रह्मतर्कग्रंथद वचनविद्दरिंद, आ उत्तमभक्तरु भक्तियिंद नित्त कथामृतपानदिंद तृप्त-रादकारण अंथ मोक्षवन्ने लक्षिसेगेतरुवदिल्लवंते, इन्नु नित्त हुब्बुहारिसोणमात्रदिंदले केळगे बीळतक्क भयवुळ्ळ पारमेष्ठ्यपदवे मोदलादद्दन्नु अवरु गणनेमाडुवदिल्लवेंदेनु हेळतक्कदु, आ भक्तरिगे कुशल्लरु एंब विशेषणकोडुवदरिंद ' मोक्षापेक्षियकिंतलू आ मोक्षवन्नुसह अपेक्षमादिद्द केवलभक्तनु मुक्तियल्लि विशेषसुखवुळ्ळवनागुवनु एंब प्रमाणानुसारवागि मोक्षापेक्षि गळाद भक्तरकिंत अनपेक्षभक्तरिगे आ मुक्तियल्लि आनंदवु उक्केरुवदु, आदकारण मुक्तियन्नु बेडुवदक्किंत भक्तियन्नु बेडुवदे उत्तमवादद्देंदु ब्रह्मकौशल्यवु सूचिसुवदु, मुक्तियु

अनेकप्रकारविरुवदु. आ मोक्षक्के अधिकारिगळू बहुजनरिरुवरु. आदकारण मुक्तियल्लि परस्परभेदवु सत्यवादहु. अनेकभेदवुळ्ळ मोक्षकोडतक्कवनुमात्र ओब्बने इरुवनु अवनल्लि रामकृष्णमोदलाद रूपगळिगे लेशमात्रवू भेदविल्लवु आ मोक्षकोडतक्कवरु बहुजनरादरे परस्पर वैषम्यदिंद नाशप्रसंगवु बंदीतु, मत्तु ई मातु प्रमाणविरुद्धवू आगुवदु. ॥ ४८ ॥

(ई श्लोकक्के यादुपत्यव्याख्यानवु ईमेले हेळिद विजयध्वजतीर्थर अभिप्रायवन्नु स्पष्टमाडतक्कद्दागि केलवु रहस्यार्थवुळ्ळद्दादकारण आ व्याख्यानवन्नुसह बरेदु अदर अर्थवू बेरेयल्पडुवदु)—यादुपत्यव्याख्या— मुनयः किं इतर साधारणमोक्षादिकमुद्दिश्य हृदि विदुः नेत्याह—नात्यंतिकमिति ॥ अत्र ये भगवतः कथायाः रसज्ञाः भगवत्कथाश्रवणादिजनितापरोक्षज्ञानेन स्वरूपसुखानुभववंतः ते आत्यंतिकप्रसादं—अत्यर्थप्रमादं तदुत्तरभाविनं मोक्षमपि न विगणयंतीत्युक्त्या जीवन्मुक्तानां ब्रह्मदर्शनेन मोक्षात्पूर्वमपि स्वरूपानंदाभिव्यक्तिरूपा मुक्तिरस्तीति प्रतीयते मा कथं पुनः श्रवणाद्यनुष्ठाने वैय्यर्थ्यप्रसंगादतोत्राभिमतानंदव्यक्तिं प्रमाणेनैव दर्शयति । भक्तिज्ञानेति ।— भक्तिज्ञानपरिपाकात्किंचित्पूर्वंच मुच्यते ॥ दर्शनेन हरेस्तत्र नानंदः पूर्णतां व्रजेदिति ब्रह्मतर्कं ॥— भक्तिज्ञानपरिपाकात् तत्साध्यादात्यंतिकप्रसादात् पूर्वमपि हरिदर्शनेन किंचिन्मुच्यते प्रायःस्वरूपानंदव्यक्तिमानुभवतीत्यर्थः तर्हि पुनः श्रवणादिवैय्यर्थ्यमित्यतउक्तं ॥ नेति ॥ तत्र तदा पूर्णतां स्वयोग्यतापेक्षया तदर्थं पुनः श्रवणादिकमितिभावः । नन्वेवं कथमेषां आत्यंतिकप्रमादविगणनं मूलोक्तं संभवति । स्वयोग्यतानंदपूर्त्यर्थं तदपेक्षया आवश्यकत्वादित्यतोत्राभिप्रेतमर्थं दर्शयति ॥ अतइति ॥ यत एवं ज्ञानिनां ब्रह्मदर्शनमात्रेण प्रायःस्वरूपानंदाभिव्यक्तिः प्रमाणसिद्धा अतः साऽनपेक्षिणामुत्तमाधिकारिणां मोक्षेच्छुभ्योऽधमाधिकारिभ्यो तदपेनाक्षियेतियावत्। आनंदोद्रेकःउत्कृष्टानंदाभिव्यक्तिरूपाभवतीत्यर्थः । अत्रानपेक्षिणामित्युक्त्या स्वयोग्यानंदपूर्त्यपेक्षापि तेषांनास्तीति सूचयति ॥ ततश्च किमित्यतआह तेषामिति ॥ अनपेक्षिणामुत्तमाधिकारिणामित्यर्थः ॥ परिपाकतः भक्तिज्ञानयोरितिशेषः अधमाधिकारिप्राप्यमुक्त्यपेक्षयापि अधिकमुक्तिप्राप्तेरधमाधिकारिभिः प्राप्तमात्यंतिकप्रसादमपि नविगणयंतीत्युक्तमितिशेषः ॥ तथाचोत्तमाधिकारिणो ये कथाया रसज्ञाः ब्रह्मसाक्षात्कारप्राप्त स्वरूपानंदानुभववंतस्ते अधमाधिकारिषु जायमानं आत्यंतिकप्रमादमपि नविगणयंति स्वेषामिदानींमेव तन्मोक्षसुखापेक्षया अधिकसुखस्य लाभादिति मूलाभिप्रायइतिभावः ॥ ब्रह्मदर्शनमात्रेणानपेक्षाणां मोक्षेऽच्छूनांमुक्त्यपेक्षया अधिकानंदप्राप्तिर्भवर्तात्येव कुतइत्यतोत्र प्रमाणमाह ॥ मुमुक्षोरिति ॥—मुमुक्षोः केवलो भक्तो मुक्तावपि सुखीभवेदितिच—॥—केवलो निरपेक्षः । सुखी अधिकसुखवान् । अपि शब्देन न केवलं जीवन्मुक्तावित्यस्य लाभात् प्रकृतसिद्धिरिति ज्ञातव्यं ततश्चायं श्लोकार्थः ॥ हे अंग— त्वदंघ्रिरेव शरणं आश्रयो येषांते तथा त्वद्भक्ता इति यावत् । कीर्तन्यं कीर्तनीयं तीर्थं शुद्धं यशो यस्य स तथा तस्य भगवतः कथायाः रसज्ञाः तच्छ्रवणादिप्राप्तब्रह्मदर्शनाभिव्यक्तकिंचित्स्वरूपसुखानुभववंतः कुशलाः नीचोच्चविदः ते उत्तमाधिकारिणः ते तव अधिकारिषु जायमानं आत्यंतिकं भक्तिज्ञानपरिपाकानंतरभाविनं मोक्षात्यवहितपूर्वकालीनं प्रसादमपि तज्जन्यं मोक्षमर्पीतियावत् नविगणयंति नबहुमन्यंते ॥ स्वेषामिदानींमेव तदपेक्षया अधिकसुखप्राप्तेः ते ध्रुवउन्नयैः उज्जृंभणविशेषैः अर्पितं पतनभयं यस्य तदन्यत्स्वर्गादिकमविगणयंतीति किमु वक्तव्यमिति । (यादुपत्यव्याख्यानद अर्थवु) हिंदिन श्लोकदल्लि—सकलविषयपरित्यागमाडिद मुनिगळु श्रीहरियन्नु तम्म हृदयदल्लि तिळिदु नोडुवरेंदु हेळल्पट्टितु । आदरे आ मुनिगळु एल्लजनरू अपेक्षिसतक्क साधारणमोक्षद सलुवागि श्रीहरियन्नु तम्म हृदयदल्लि तिळियुवरेनु, अल्लवेंदु हेळुवरु (नात्यंतिकं एंब श्लोकदिंद) इल्लि भवतःकथारसज्ञाः अंदरे—श्रीहरिय कथाश्रवणमननादिगळिंद उत्पन्नवाद आ श्रीहरिय अपरोक्षज्ञानदिंद स्वरूपसुखद अनुभववुळ्ळ उत्तमाधिकारिगळु (एंदर्थवु) अवरु ' आत्यंतिकं प्रसादं ' मोक्षक्के कारणवाद निन्न अत्युत्तमप्रसादवन्नू अदर अनंतरवे दोरेयतक्क मोक्षवन्नूसह गणनेमाडुवदिल्ल. (लक्ष्मिगे तरुवदिल्ल) एंदु हेळुवदरिंद, जीवन्मुक्तरिगे ब्रह्मापरोक्षदर्श-

